यष्टी हिमा गुरुः स्वाद्वी चक्षुष्या बलवर्णकृत् ।
सुस्निग्धा शुक्रलाकेश्या स्वर्य्या पित्तानिलास्रजित् ।
व्रणशोथविषच्छर्दितृष्णाग्लानिक्षयापहा ।

---

* सं०—यष्टीमधु । हिन्दी—मुलहठी, मीठी लकड़ी । बं०—यष्टीमधु । म०—ज्येष्ठमध । गु०—जेठोमधनो मूल, जेठोमधनो शीशे । क०—यष्टिमधु, वल्लि यष्टिमधु । तै०—यष्टीमधुकमु । इं०—लिक्योरिस रूट (Liquorice root) फा०—वेखमेहे कूमझु । अ०—असलुस् नुकल्सरख्यसूस । अस्य गुणाः—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

१ कांपिल्लनामानि गुणाश्च—

कांपिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रेचनोऽपि च ।१४७।
कांपिल्लः कफपित्तास्रकृमिगुल्मोदरव्रणान् ।
हन्ति रेची कटूष्णश्च मेहानाहविषाश्मनुत् ॥१४८॥

२ आरग्वधनामानि गुणाश्च—

आरग्वधो राजवृक्षः शंपाकश्चतुरंगुलः ।
आरेवतो व्याधिघातः कृतमालः सुवर्णकः ॥१४९॥

मधुरं यष्टिमधुकं किंचित्तिक्तं च शीतलम् ।
चक्षुष्यं पित्तहृद्रुच्यं शोषतृष्णाव्रणापहम् ॥
(राजनिघण्टुः)

१ सं०—काम्पिल्य, काम्पिल्ल, कम्पिल्ल। हि०—कबीला। बँ०-कमलागुण्डि, गुण्डारोचनी। म०-कपिला। गु०-कपीलो। क०—काम्पिल्लकं। इं०—केमिला, राटलेरा (Kamila, Rattlera) फा०—कन्विलाय। अ०—किन्वीर।

२ संस्कृत—आरग्वध, राजवृक्ष, शम्पाक। हिन्दी—अमलतास, धनबहेड़ा। बँ०—सोनालु, शोंदाल, एखालनाडी, बानरनाडी। म०-बाहवा, बाव्याप्रोंगां तीलग। गु०—गरमलो, गरमालोनो गोल। क०—हेगाके। तै०—रेल्लकाया। इं०—पुंडिंगपाइपट्टी, पर्जिग, कासियापल्प (Punding

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

कर्णिकारो दीर्घफलः स्वर्णाङ्गः स्वर्णभूषणः ।
आरग्वधो गुरुः स्वादुः शीतलः स्रंसनो मृदुः ।१५१।
ज्वरहृद्रोगपित्तास्रवातोदावर्त्तशूलनुत् ।
तत्फलं स्रंसनं रुच्यं कोष्ठपित्तकफापहम् ।।२५२।।
ज्वरे तु सततं पथ्यं कोष्ठशुद्धिकरं परम् ।

१ कट्वीनामानि गुणाश्च—

कट्वी तु कटुका तिक्ता कृष्णभेदा कटंभरा ।।१५३।।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी ।
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी ।१५४।
कटुका कटुका पाके तिक्ता रुक्षा हिमा लघुः ।
भेदनी दीपनी हृद्या कफपित्तज्वरापहा ।।१५५।।
प्रमेहश्वासकासास्रदाहकुष्ठकृमिप्रणुत् ।

Pipetree, Purging, Cassia Pulp.) फा०—खर्बकेसियाह । अ०—खर्बके अस्वद, खर्बकेअबीयद ।

१ सं०—कटुका, तिक्ता, कट्वी । हि०—कुटकी । बँ०—कटकी । म०—कुटकी, काली कुटकी । गु०—कडु । क०—केदार कटुकी । ते०—काटक रोहिणी, जल्लकोलकर । इं०—ब्लैक हेलीबोर (Black Hellebore) अ०—ख्यारे शंबर ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

१ किरातस्य नामानि गुणाश्च—

किराततिक्तः कैरातः कटुतिक्तः किरातकः ।१५६।
काण्डतिक्तोऽनार्यतिक्तो भूनिम्बो रामसेनकः ।
किरातकोऽन्यो नैपालः सोऽर्द्धतिक्तो ज्वरान्तकः ॥
किरातः सारको रूक्षः शीतलस्तिक्तको लघुः ।
सन्निपातज्वरश्वासकफपित्तास्रदाहनुत् ॥१५८॥
कासशोथतृषाकुष्ठज्वरव्रणकृमिप्रणुत् ।

---

१ सं०—किराततिक्त, कैरात, कटुतिक्त। हि०—चिरायता। बँ०—चिरता, नेपालेर निम्ब। म०—किराइत, काडे किराइत, फलकिराइत। गु०—करिमातु। क०—बेलबंउचु। तै०—क०—वेलानेमु। इं०—चिरेटा (Ghirata) फा०—नेनिहाद। अ०—कसबुझ, झारिरा। अस्य गुणाः—

भूनिम्बो वातलस्तिक्तो व्रणरोपणकारकः ।
सरः शीतः पथ्यकरो लघू रूक्षस्तृषापहः ॥
कफं पित्तं ज्वरं कुष्ठं कण्डूं शोथं कृमींस्तथा ।
सन्निपातज्वरं दाहं शूलं मेहं व्रणन्तथा ॥
श्वासं कासं च प्रदरं शोषं चार्शोऽरुचिं जयेत् ।

(निघण्टुरत्नाकरः)

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitized by eGangotri

१ इन्द्रयवनामानि गुणाश्च—

उक्तं कुटजबीजं तु यवमिन्द्रयवं तथा ॥१५९॥
कलिङ्गं चापि कालिङ्गं तथा भद्रयवं स्मृतम् ।
क्वचिदिन्द्रस्य नामैव भवेत्तदभिधायकम् ।१६०।
फलानीन्द्रयवास्तस्य तथा भद्रयवा अपि ।
ऐन्द्रं यवं त्रिदोषघ्नं संग्राहि कटु शीतलम् ॥१६१॥
ज्वरातीसाररक्तार्शःकृमिवीसर्पकुष्ठनुत् ।
दीपनं गुदकीलास्रवातास्रश्लेष्मशूलजित् ।१६२।

---

१ सं०-कुटजबीज, यव, इन्द्रयव। हि०-कुडा, कोरैया। बं०-कुडचिगाछ, कुटराज। म०-काला कुडा, सफेद कुडा। गु०-कडी दुधला। क०-कोड सिगेयमेरनु। तै०-अंकुटु-चेट्टु, अर्गिशंचेट्टु, तुम्मिकचेटु, अंकेलु, चरालुकुष्ठ। उत्कल-कुडिया। इं०-ओवललीव्ड रोज़बे (Ovalleaved Rosebay) अ०-तिबाज। अस्य श्वेतजातेर्गुणाः-

कुटजः कटुतिक्तोष्णः कटुश्चोष्णोऽग्निदीपकः।
पाचकस्तुवरो रूक्षो ग्राहको रक्तदोषहा ॥

(निघण्टुरत्नाकरे)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1] मदननामानि गुणाश्च—

मदनश्छर्दनः पिण्डी राठः पिण्डीतकस्तथा।
करहाटो मरुबकः शल्यको विषपुष्पकः ॥१६३॥
मदनो मधुरस्तिक्तो वीर्य्योष्णो लेखनो लघुः।
वान्तिकृद्विद्रधिहरः प्रतिश्यायव्रणान्तकः ॥१६४॥
रूक्षः कुष्ठकफानाहशोथगुल्मव्रणापहः।

[2] रास्नानामानि गुणाश्च—

रास्ना युक्तरसा रस्या सुवहा रसना रसा ॥१६५॥

---

१ सं०—मदन, छर्दन। हि०—मैनफल, करहर। बँ०—मयनाकाँटा। क०—गेल। गु०—ढोल। क०—वोनगरे रण्य, वोनगरे एरंडु। तै०—वसन्तकडिमि चेट्टु। ता०—मडुककरय। उ०—पातर। नैपाली—मैदल। इं०—बुशीगार्डिनिया (Bushy Gardinia) अ०—जोजुल्कै।

२ सं०—रास्ना, युक्तरसा। हिन्दी—रासन, रायसन, रहसनी। बँ०—रास्ना। म०—नावलीच्या मुल्या। गु०—रासना। क०—रसनाकेदारे प्रसिद्धा। तै०—रासना पुडका, किइम्मिचक्क अन्तर दामर। फा०—रासुन। अ०—जंजबीलशामी। अस्या गुणा यथाह राजनिघण्टौ—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा ।
रास्नामपाचनी तिक्ता गुरूष्णा कफवातजित् १६६
शोथश्वाससमीरास्रवातशूलोदरापहा ।
कासज्वरविषाशीतिवातकामयहिध्महृत् ॥१६७॥

❀ नाकुलीनामानि गुणाश्च—

नाकुली सुरसा नागसुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाक्षीविषनाशिनी ॥१६८॥

रास्ना तु त्रिविधा प्रोक्ता मूलं पत्रं तृणं तथा ।
ज्ञेयौ मूलदलौ श्रेष्ठौ तृणरास्ना तु मध्यमा ॥
शोण्डलनिघण्टौ चास्य गुणाः—

रास्नोष्णावातशोथामवातवातामयाञ्जयेत् ।

❀ सं०—नाकुली, सुरसा । हि०—नाई, नाकुली केन्द्र, नचुलकन्द, हरकाई चन्दा । बँ०—नाकुली, सुगन्धनाकुली । म० मुंगुसवेल, नाईसापसंद । क०—विषमुंगरीद्वय । ते०—पद्मपुचेट्टु । फा०—छोटा चांदा । अस्या गुणानाह गणनिघण्टौ—

नाकुली कटुका तिक्ता तथोष्णा कृमिरोगहृत् ।
वृश्चिकोन्दुरसर्पादिविषं नाशयति क्षणात् ।
तुवरा च त्रिदोषघ्नी कन्देऽप्येते गुणाः स्मृताः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

नाकुली तुवरी तिक्ता कटुकोष्णा विनाशयेत् ।
भोगिलूतावृश्चिकाखुविषज्वरकृमिव्रणान् ॥१६९॥

माचिकानामानि गुणाश्च

माचिका प्रस्थिकांबष्ठा तथाम्बाम्बालिकांबिका ।
मयूरविदला केशी सहस्रा बालमूलिका ॥१७०॥
माचिकाम्ला रसे पाके कषाया शीतला लघु ।
पक्वातीसारपित्तास्रकफकण्ड्वामयापहा ॥१७१॥

❀ तेजोवतीनामानि गुणाश्च—

तेजस्विनी तेजवती तेजोह्वा तेजनी तथा ।
तेजस्विनी कफश्वासकासास्यामयवातहृत् ॥१७२॥
पाचन्युष्णा कटुस्तिक्तारुचिवह्निप्रदीपनी ।

❀ सं०-तेजोवती, तेजस्विनी हि०-बँ०-तेजबल । म०-तेजबल, तिर्यानी । गु०-तेजबल । दक्षिणी०—जलघरी । इं०—टूथ एचट्री (Tooth achetree) अस्या गुणाः—

तेजिनी कफहृद्रोगमुखदन्तादिरोगजित् ।
हिक्काग्निमान्द्यमर्शांसि कण्ठरोगस्य नाशिनी ॥

(शोंडलनिघण्टुः)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

❀ ज्योतिष्मतीनामानि गुणाश्च—

ज्योतिष्मती स्यात्कटभी ज्योतिष्का कङ्गुनीति च ॥
पारावतपदी पण्या लता प्रोक्ता ककुन्दनी ।
ज्योतिष्मती कटुस्तिक्ता सरा कफसमीरजित् १७४
अत्युष्णा वामनी तीक्ष्णा वह्निबुद्धिस्मृतिप्रदा ।

× कुष्ठनामानि गुणाश्च—

कुष्ठरोगाह्वयं वाप्यं परिभाव्यं तथोत्पलम् ॥१७५॥
कुष्ठमुष्णं कटु स्वादु शुक्रलं तिक्तकं लघु ।
हन्ति वातास्रवीसर्पं कासकुष्ठमरुत्कफान् ॥१७६॥

† पुष्करमूलनामानि गुणाश्च—

उक्तं पुष्करमूलं तु पौष्करं पुष्करं च तत् ।

❀ संस्कृत—ज्योतिष्मती, कटभी। हिन्दी-मालकांगुनी, बड़ी मालकांगुनी। बँ०—लता फट्की, बडलताफट्की। गु०—मालकांगणी। म०—मालकांगोणी। क०—कौंगुएरड्ड। तै०—वावजी। इँ०—स्टाफ्ट्री (Stafftree) फा०—काल।

× सं०—कुष्ठ, रोगाह्वय, परिभाव्य, उत्पल। हिन्दी—कूठ।

† सं०—पुष्करमूल। हि०-पोहकरमूल। बँ०-कुष्ठविशेष, पुष्करमूल। गु०-पोकरमूल। क०-पुष्करमूल। अस्य गुणाः-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पद्मपत्रं च काश्मीरं कुष्ठभेदमिमं जगुः ॥१७७॥
पुष्करं कटुकं तिक्तमुक्तं वातकफज्वरान् ।
हन्ति श्वासारुचिश्वासान् विशेषात्पार्श्वशूलनुत् ॥

† हेमाह्वानामानि गुणाश्च—

कटुपर्णी हैमवती हेमक्षीरी हिमावती ।
हेमाह्वा पीतदुग्धा च तन्मूलं चोकमुच्यते ।१७९।
हेमाह्वा रेचनी तिक्ता भेदन्युत्क्लेशकारिणी ।
कृमिकण्डुविषानाहकफपित्तास्रकुष्ठनुत् ॥१८०॥

पुष्करं पार्श्वरुग्वातकासशोथज्वरापहम् ।
श्वासोर्ध्ववातपाण्डुघ्नं हिक्कादोषनिवारणम् ॥

† संस्कृत--कटुपर्णी, स्वर्णक्षीरी, क्षीरिणी । हिन्दी—सत्यानासी, कटेरी, पिसोला । बँगला--स्वर्णक्षीरी, शोणाखिरुई मराठी--कांधेधोत्रा, फिरंगीधोत्रा । गु०--दारुड़ी । कनाडी--चिक्कणिकेय भेद । ता०—ब्रह्मदण्डु विरइ । इं०—गैम्बोज थिस्टल (Gambogo Thistle) अस्या गुणानाह गणनिघण्टौ—

तस्याः क्षीरं बिन्दुमात्रं नेत्रे क्षिप्तं घृतप्लुतम् ।
शुक्लं च तमिस्रांसं च नेत्रांशस्यैव नाशयेत् ॥

CC0. Uma Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ शृङ्गीनामानि गुणाश्च—

शृंगी कर्कटशृंगी च स्यात्कुलीरविषाणिका ।
अजशृंगी च वक्रा च कर्कटाख्या च कीर्तिता १८१
शृङ्गी कषाया तिक्तोष्णा कफवातक्षयज्वरान् ।
श्वासोर्ध्ववातत्रुट्कासहिक्कारुचिवमीर्हरेत् ॥१८२॥

† कट्फलनामानि गुणाश्च—

कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च ।
श्रीपर्णिका कुमुदिका भद्रा भद्रवतीति च ॥१८३॥

❀ संस्कृत—शृंगी, कर्कटशृङ्गी । हिन्दी—काकड़ासिंगी । बं०—काकड़ाशृङ्गी । म०—काकड़ा शिंगी । गु०—काकड़ासिंगी । कनाडी—कर्कटिशृङ्गी । तै०—कर्कटीशृङ्गी । अस्या गुणानाह निघण्टुरत्नाकरे—

कर्कटीशृंगिका तिक्ता चोष्णा च तुवरा गुरुः ।
वातहिक्कातिसारघ्नी बालानां च हितावहा ॥

† स०—कट्फल, सोमवल्क । हिन्दी—कायफर, कायफल । बं०—कायफल, कायशाल । म०—कुम्याची शाल, कुम्याची फल । गु०—कायफल । क०—किरुसिवन्नि । तै०—पापर बुडमु । अरबी—दारशीशवान । फारसी—उद्दलवर्क ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

कटफलस्तुवरस्तिक्तः कटुर्वातकफज्वरान् ।
हन्ति श्वासप्रमेहार्शःकासकण्ड्वामयारुचीः ।१८४।

× भार्ङ्गीनामानि गुणाश्च—

भार्ङ्गी भृगुभवा पद्मा फञ्जी ब्राह्मणयष्टिका ।
ब्राह्मण्यंगारवल्ली च खरशाकश्च हंजिका ॥१८५॥
भार्ङ्गी रूक्षा कटुस्तिक्ता रुच्योष्णा पाचनी लघुः ।
दीपनी तुवरा गुल्मरक्तजिन्नाशयेद्ध्रुवम् ॥१८६॥
(इति क्लीबे अमरः प्राह ।)

शोथकासकफश्वासपीनसज्वरमारुतान् ।

१-अश्मभेदनामानि गुणाश्च—

पाषाणभेदकोऽश्मघ्नो गिरिभिद्भिन्नयोजनी।१८७।

× सं०—भार्ङ्गी, भृगुभवा । हिन्दी-भारङ्गी, भँगरैया । बँगला—बामुन हाटी । म०—गु०—भारंगी । क०—किर्हदेगु । तै०—भण्टभारंगी । नैपाली—चूया । गुणाः—

भार्ङ्गी तु कटुतिक्तोष्णा कासश्वासविनाशिनी ।
शोफव्रणक्रिमिघ्ना च दाहज्वरनिवारिणी ॥

१-सं०—पाषाणभेद, अश्मघ्न । हिन्दी—पाखानभेद । बँ०—पाथरकुची, पाथरकुचा । म०—गु०—पाषाण-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अश्मभेदो हिमस्तिक्तः कषायो बस्तिशोधनः ।
मेदतो हन्ति दोषार्शोगुल्मकृच्छ्राश्महृद्रुजः ।१८८।
योनिरोगान्प्रमेहांश्च प्लीहशूलव्रणानि च ।

× धातकीनामानि गुणाश्च—

धातकी धातुपुष्पी च वह्निज्वाला च सा स्मृता १८९
धातकी कटुका शीता मदकृत्तुवरा लघुः ।
तृष्णातीसारपित्तास्रविषक्रिमिविसर्पजित् ॥१९०॥

१-मंजिष्ठानामानि गुणाश्च—

मञ्जिष्ठा विकसा जिंगी समंगा कालमेषिका ।
मण्डूकपर्णी मण्डीरी भण्डी योजनवल्ल्यपि॥१९१॥

मेद । क०—आलेलगया । तै०—तेलनुरुपिण्डी । इँगलिश-आईरिस्प (Irissp) फा०—गोशाद । अ०—जिंतियाना । गुणानाह शोण्डलनिघण्टौ—

अश्मभिद्वस्तिरुङ्मूत्रकृच्छ्रतोदाहवातनुत् ।
शीतवीर्यो गुरुः स्निग्धस्तथातीसारनाशनः ॥

× सं०—धातकी । हि०—धायके फूल । बँ०—धाइ-फूल । म०—धायटी । गु०—धावणी । क०—धायिफूल । ते०—धातुकी पुड्ड, पुब्बु ।

१-सं०—मंजिष्ठा । हि०—मजीठ । बँ०—मंजिष्ठा । म०—मंजिष्ठा । गु०—मजीठ । क०—मंजिष्ठा । ते०—मंजिष्ठ

Dr. Umila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रसायन्यरुणा काला रक्तांगी रक्तयष्टिका ।
मण्डीतकी च गण्डीरी मंजूषा वस्त्ररञ्जनी ॥१९२॥
मञ्जिष्ठा मधुरा तिक्ता कषाया स्वरवर्णकृत् ।
गुरुरुष्णा विषश्लेष्मशोथयोन्यक्षिकर्णरुक् ॥१९३॥
रक्तातीसारकुष्ठास्रवीसर्पव्रणमेहनुत् ।

× कुसुंभनामानि गुणाश्च—

स्यात्कुसुम्भं वह्निशिखं वस्त्ररञ्जकमित्यपि ॥१९४॥
कुसुम्भं वातलं कृच्छ्ररक्तपित्तकफापहम् ।

÷ लाक्षानामानि गुणाश्च—

लाक्षा पलंकषालक्तो यावो वृक्षामयो जतुः१९५॥

तीठी, ताम्रवल्ली । ता०—मंजिष्ठी । इं०—मेडरूट (Maddarroot) फा०—रुनास । अ०—फुवहतु सिवग ।

× सं०—कुसुम्भ । हि०—कुसुम । बं०—कुसुम-फूल । म०—कर्डीचे फल, कर्डया । गु०—कुसुम्बो, लत्तबंगारमु । इं०—आफिसिनल कार्थेमस (Oflicinal Carthemus) फा०—गुलेमाश्कर, तुख्मकायशा । अ०—अखरीच, हवुलअस्फर ।

÷ सं—लाक्षा, पलंकषा । हि०—लाख, लाही । बं०—लाहा । म०—गु०—लाख । क०—अरगु । ते०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लाक्षा वर्ण्या हिमा बल्या स्निग्धा च तुवरा लघुः।
अनुष्णा कफपित्तास्रहिक्काकासज्वरप्रणुत्॥१९६॥
व्रणोरःक्षतवीसर्पकृमिकुष्ठगदापहा।
अलक्तको गुणैस्तद्वद्विशेषाद्व्यङ्गनाशनः॥१९७॥

× हरिद्रानामानि गुणाश्च—

हरिद्रा कांचनी पीता निशाख्या वरवर्णिनी।
कृमिघ्ना हलदी योषित्प्रियाहट्टविलासिनी १९८॥
हरिद्रा कटुका तिक्ता रूक्षोष्णा कफपित्तनुत्।
वर्ण्या त्वग्दोषमेहास्रसोषपाण्डुव्रणापहा॥१९९॥

लाक्षा। इं०—शेललाक (Shell lac) फा०—लाक। अरबी—लुक थोएल। अस्या गुणानाहात्रेयसंहितायाम्—

अलक्तको रजोरोधी रक्तपित्तक्षयापहः।
प्रदरञ्चोपदाहं च सरक्तं क्षपयेद्ध्रुवम्॥

× संस्कृत—हरिद्रा, कांचनी, पीता। हि०—हल्दी। बं०—हलुद। म०—हलद। गु०—हलदर। क०—अर्शिनए। तै०—पुसुपु। इं०—टर्मेरिक (Turmaric)

Untla Shyama Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

× आम्रगन्धिहरिद्रानामानि गुणाश्च—

दार्वी मेदा सुगन्धा च दार्वी दारुकदारु च ।
कर्पूरा पद्मपत्री स्यात्सुरभी सुरनायका ॥२००॥

आम्रगन्धिहरिद्रा या सा शीता वातला मता ।
पित्तहृन्मधुरा तिक्ता सर्वकण्डूविनाशिनी ॥२०१॥

१-अरण्यहरिद्रागुणाः—

अरण्यहलदीकन्दः कुष्ठवातास्रनाशनः ।

× सं०—दार्वी, कर्पूरहरिद्रा । हि०—आमा हल्दी, कपूर हल्दी । बं०—आम आदा । म०—आंबे हलद । गु०—आँबा हलदर । क०—हुली अर्शना । तै०—कारु पसुपु । इं०—मैंगो जिंजर (Mangoginger) । अस्या गुणानाह ग्रन्थान्तरे—

अम्ला रुचिप्रदा लम्बी दीपना च वरा सरा ।
कफं चोग्रव्रणं कासं हिक्कां श्वासं ज्वरं जयेत् ।
अभिवातभवं शोथं लेपाच्छीघ्रं विनाशयेत् ॥

१-संस्कृत—अरण्यहलदी । हि०—वनहलदी, जंगली हरिद्रा । बं०—वनहलुद । म०—शोली, रानहलद । गु०—वनहलदर । तै०—अडविपसुपु । तामिल-कस्तुरिमञ्जल ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

× दारुहरिद्रानामानि गुणाश्च—

दार्वी दारुहरिद्रा च पर्जन्या पर्जनीति च २०२॥
कटंकटेरी पीता च भवेत्सैव पचम्पचा ।
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च ।२०३।
पीतद्रुश्च हरिद्द्रुश्च पीतदारु कपोतकम् ।
दार्वी निशागुणा किन्तु नेत्रकर्णास्यरोगनुत् ।२०४।

+ रसांजनोत्पत्तिर्नामानि गुणाश्च—

दार्वीक्वाथसमं क्षीरं पादं पक्त्वा यदा घनम् ।
तदा रसांजनं ख्यातं नेत्रयोः परमं हितम्२०५॥

× सं०—दार्वी, दारुहरिद्रा । हि०—दारुहलदी । बं०—दारुहरिद्रा । म०—दारुहलद । गु०—दारुहलदर । क०—भरदर्शिना । तै०—मनपसुपु । फा०—दारचोव । अ०—दारहदा । अस्या गुणमाह—

दार्वी तद्वद्विशेषेण कफाभिष्यन्दनाशिनी ।

+ सं०—रसाञ्जन । हि०—रसौत । म०—क०—रसांजन । बं०—रसवत । गु०—रसवती । तै०—रसांजनमु । इं०—इस्ट्रेक्ट आफ इण्डियन ब्रेबेरी (Extract of Indian Brebery) अ०—हुजुज । अस्य गुणानाह गणनिघण्टौ—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रसांजनं तार्क्ष्यशैलं रसगर्भं च तार्क्ष्यजम् ।
रसांजनं कटु श्लेष्मविषनेत्रविकारनुत् ॥२०६॥
उष्णं रसायनं तिक्तं छेदनं व्रणदोषहृत् ।

+ बाकुचीनामानि गुणाश्च—

अवल्गुजा बाकुची स्यात्सोमराजी सुपर्णिका।२०७।
शशिलेखा कृष्णफला सोमा पूतफलीति च ।
सोमवल्की कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता ॥२०८॥
बाकुची मधुरा तिक्ता कटुपाका रसायनी ।
विष्टम्भहृद्धिमा रुच्या सरा श्लेष्मास्रपित्तनुत्।२०९
रूक्षा हृद्या श्वासकुष्ठमेहज्वरकृमिप्रणुत् ।
तत्फलं पित्तलं कुष्ठकफानिलहरं कटु ॥२१०॥
केश्यं त्वच्यं वमिश्वासकासशोथामपाण्डुनुत्।

रसाजनं कटु श्लेष्मविषनेत्रविकारनुत् ।
उष्णं रसायनं तिक्तं छेदनं व्रणदोषहृत् ॥

× सं०—अवल्गुजा, बाकुची । हिन्दी—बायची, बावची, बकुची । बँ०—हाकुल, सोमराज । म०—बावचीनाजी । क०—बाउचिगे । तै०—तिप्पतोगे, नेलवयलिये । तामिल—वोगिट्ठलु। इं०—एस्क्यूलेंट फ्लाकोर्टिया (Esculent Flacourtia)

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

१-चक्रमर्दनामानि गुणाश्च—

चक्रमर्दः प्रपुन्नाटो दद्रुघ्नो मेषलोचनः ॥२११॥
पद्माटः स्यादेडगजः चक्री पुन्नाट इत्यपि ।
चक्रमर्दो लघुः स्वादुरूक्षः पित्तानिलापहः ॥२१२।
हृद्यो हिमः कफश्वासकुष्ठदद्रुकृमीन् हरेत् ।
हन्त्युष्णं तत्फलं कुष्ठकण्डुदद्रुविषानिलान् ।२१३।
गुल्मकासकृमिश्वासनाशनं कटुकं स्मृतम् ।

× अतिविषानामानि गुणाश्च—

विषा त्वतिविषा विश्वा शृंगी प्रतिविषारुणा ।२१४।
शुक्लकन्दा चोपविषा भंगुरा घुणवल्लभा ।
विषा सोष्णा कटुस्तिक्ता पाचनी दीपनी हरेत् २१५
कफपित्तातिसारामविषकासवमिक्रिमीन् ।

१-सं०—चक्रमर्द । हिन्दी—चकवन, पवाड, पमार । बं०—चाकुण्डा, एडांचि । म०—तरोटा । गु०—कुवाधियो । क०—चगचे । तै०—ताट्यमु । इं०—ओवललीव्ड केशिया (Ovelleaved cassia) फा०—संजीसबोया ।

× सं०—अतिविषा । हि०—अतीस । बं०—आतइच । म०—अतिविष । गु०—अतलसनी कली । क०—अतिविषा । तै०—अतिवासम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

+सावरलोध्रपट्टिकालोध्रनामानि गुणाश्च—

लोध्रस्तिल्लस्तिरीटश्च सावरो गालवस्तथा ॥२१६॥
द्वितीयः पट्टिकालोध्रः क्रमुकः स्थूलबल्कलः ।
जीर्णपत्रो बृहत्पत्रः पट्टीलाक्षः प्रसादनः ॥२१७॥
लोध्रो ग्राही लघुः शीतः चक्षुष्यः कफपित्तनुत् ।
कषायो रक्तपित्तासृग्ज्वरातीसारशोथहृत् ॥२१८॥

+रसोननामानि गुणाश्च—

लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम् ।
अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः ॥२१९॥
यदाऽमृतं वैनतेयो जहार सुरसत्तमात् ।
तदा ततोऽपतद्बिन्दुः स रसोनोऽभवद्भुवि ॥२२०॥
पञ्चभिश्च रसैर्युक्तो रसेनाम्लेन वर्जितः ।
तस्माद्रसोन इत्युक्तो द्रव्याणां गुणवेदिभिः ॥२२१॥
कटुकश्चापि मूलेषु तिक्तः पत्रेषु संस्थितः ।
नाले कषाय उद्दिष्टो नालाग्रे लवणः स्मृतः ।२२२॥

+सं०—लोध्र, तिल्ल, तिरीट । हि०—लोध, पठानी लोध । बँ०—लोधकाष्ठ, पटियालालोध । म०—लोध । गु०—लोदर, पठानी लोदर । क०—लोध । तै०—तगोलेदु चेट्टुम् । अ०—मुगाम ।

×सं०—लशुन, रसोन । हि०—लहसुन ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बीजे तु मधुरः प्रोक्तो रसस्तद्गुणवेदिभिः ।
रसोनो बृंहणो वृष्यः स्निग्धोष्णः पाचनः सरः २२३
रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः।
बलवर्णकरो मेधाहितो नेत्र्यो रसायनः ॥२२४॥
हृद्रोगजीर्णज्वरकुक्षिशूल—
विबन्धगुल्मारुचिकासशोफान् ।
दुर्नामकुष्ठानलसादजन्तु—
समीरणश्वासकफांश्च हन्ति ॥२२५॥

१-पलांडुनामानि गुणाश्च—

पलाण्डुर्यवनेष्टश्च दुर्गन्धो मुखदूषकः ।
पलाण्डुस्तु गुणैर्ज्ञेयो रसोनसदृशो बुधैः ॥२२६॥
स्वादुः पाके रसेनोष्णः कफकृन्नातिपित्तलः।
हरते केवलं वातं बलवीर्यकरो गुरुः ॥२२७॥

× भल्लातकनामानि गुणाश्च—

भल्लातकं त्रिषु प्रोक्तमरुष्कोऽरुष्करोऽग्निकः।
तथैवाग्निमुखी भल्ली वीरवृक्षश्च शोफकृत् ॥२२८॥

१-सं० —पलाण्डु । हिन्दी—प्याज ।
× सं० —भल्लातक । हि० —भिलावा । बँगला—भेला । म० [illegible] । गु० [illegible] । [illegible] बीज ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भल्लातकफलं पक्वं स्वादुपाकरसं लघु।
कषायं पाचनं स्निग्धं तीक्ष्णोष्णं छेदि भेदनम् २२९
मेध्यं वह्निकरं हन्ति कफवातव्रणोदरम्।
कुष्ठार्शोग्रहणीगुल्मशोथानाहज्वरक्रिमीन् ॥२३०॥
तन्मज्जा मधुरा वृष्या बृंहणी वातपित्तहा।
वृन्तमारुष्करं स्वादु पित्तघ्नं केश्यमग्निकृत् ।२३१॥
भल्लातकः कषायोष्णः शुक्रलो मधुरो लघुः।
वातश्लेष्मोदरानाहकुष्ठार्शग्रहणीगदान् ॥२३२॥
हन्ति गुल्मज्वरश्वित्रवह्निमान्द्यक्रमिव्रणान्।

+ भंगानामानि गुणाश्च—

भङ्गा गञ्जा मातुलानी मादनी विजया जया २३३

तै०—नाल्लाजीडी। तामिल—शानकोट्टई। द्राविड़—भिलवना। इं०—मार्किङ्गनट, मलाकाबीन (Markingnut, Malacabean) फा०—बिलादुर। अ० हबुलकल्ब।

+सं०—भंगा, गंजा, मातुलानी, विजया, जया। हिन्दी—भाँग, भंग, गाँजा। बं०—सिद्धि। म०—भाँग, गांजा। बर्मा-बिन। गु०—भांग्य। तै०—जनपरितुल गांजाई। इं०—इण्डियन हेम्प (Indian Hemp) फा०—कैन्नाबिस। अ०—कनबकेब।

Dr. Jamila Chandra Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भङ्गा कफहरी तिक्ता ग्राहिणी पाचनी लघुः ।
तीक्ष्णोष्णा पित्तला मोदमदवाग्वह्निवर्द्धनी ।२३४।

१-खसतिलनामानि गुणाश्च—

तिलभेदः खसतिलः खाखसश्चापि संस्मृतः ।
स्यात्खाखसफलोद्भूतं वल्कलं शीतलं लघु ।२३५।
ग्राहि तिक्तं कषायं च वातकृत्कफकासहृत् ।
धातूनां शोषकं रूक्षं मदकृद्वाग्विवर्द्धनम् ॥२३६॥
मुहुर्मोहकरं रुच्यं सेवनात्पुंस्त्वनाशनम् ।

× अहिफेननामानि गुणाश्च—

उक्तं खसफलं क्षीरमाफूकमहिफेनकम् ॥२३७॥
आफूकं शोषणं ग्राहि श्लेष्मघ्नं वातपित्तलम् ।
तथा खसफलोद्भूतवल्कलप्रायमित्यपि ॥२३८॥

१-सं०—खसतिल, तिलभेद । हि०—पोस्ता दाना, खसखसका फल । बँ०—खाकसी । म०—पोस्त, अफूचीं बोंडें । गु०—अफीणना डोंडवा । इँ०—पोपी काप्स्यूलस (Poppycapsules) फा०--कोकनार । अ०--अबुनास ।

× सं०—अहिफेन, आफूक । हि०—अफीम । बँ०—आफिंग । म०—अफू, कडवी । गु०—अफीण । क०—अफेन । तै०—नाल्लामंदु । इँ०—ओपियम् (Opium) फा०—फ्यून तियाक । अ०—लबनुल खसखास ।

Dr. Kamalesh Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ खसबीजनामानि गुणाश्च—

उच्यन्ते खसबीजानि ते खाखसतिला अपि ।
खसबीजानि बल्यानि वृष्याणि सुगुरूणि च ।२३९।
शमयन्ति कफं तानि जनयन्ति समीरणम् ।

× सैन्धवनामानि गुणाश्च—

सैन्धवोऽस्त्री शीतशिवं पाणिमन्थं च सिन्धुजम् २४०
सैन्धवं लवणं स्वादु दीपनं पाचनं लघु ।
स्निग्धं रुच्यं हिमं वृष्यं सूक्ष्मं नेत्र्यं त्रिदोषहृत् २४१

१-गडाख्यनामानि गुणाश्च—

शाकम्भरीयं कथितं गडाख्यं रोमकं तथा ।

❀ सं०—खसबीज । हिन्दी—खसखस, खसखसके दाने । बँ०—पोस्तदाना । तै०—ता०-मसगस । म०-खसखस । गु०—खरखस । इँ०—पोपी सीड्स (Poppy Seeds) । फा०—तुख्मे कोकनार । अ०—हबुल कोकनार ।

× सं०—सैन्धव । हि०—सेंधा नमक । बँ०—सैन्धव लवण । म०—सेंधे लोण । गु०—सिंधा लुण । क०—सैंधवम् । तै०—सिंध उपु । इँ०—क्लोराइड आफ सोडियम (Chloride of Sodium) फा०—नमके संग । अ०—मिलहे हिन्दी ।

१-सं०—शाकम्बरीय, गडाख्य । हि०—साँभर नोन ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गडाख्यं लघु वातघ्नमत्युष्णं भेदि पित्तलम् ।२४२।
तीक्ष्णोष्णं चापि सूक्ष्मं चाभिष्यन्दि कटुपाकि च ।

+ सामुद्रनामानि गुणाश्च—

सामुद्रं यत्तु लवणमक्षीवं वशिरं च तत् ॥२४३॥
सामुद्रजं सागरजं लवणोदधिसम्भवम् ।
सामुद्रं मधुरं पाके सतिक्तं मधुरं गुरु ॥२४४॥
नात्युष्णं दीपनं भेदि सक्षारमविदाहि च ।
श्लेष्मलं वातनुत्तिक्तमरूक्षं नातिशीतलम्॥२४५॥

× विडनामानि गुणाश्च—

विडं पाक्यं च कृतकं तथा द्रविडमासुरम् ॥२४६॥

बँ०—सामर लुण । म०—साम्बर लोण । गु०—बडागरु-मीठ । क०—गाढ लवण । फा०—मिलहे अबकीर ।

+ सं०—सामुद्र लवण। हिन्दी—समुद्रनोन, पांगा। बँ०—करकच नुन । म०—मीठ । गु०—मीठु । क०—बडागर लवण । तै०—उपुं । इँ०—साल्ट (Salt) । फा०—नमक । अ०—मिलह शीरीं ।

× सं०—विड लवण । हिन्दी—सोंचर नोन, कटली नोन । बँ०—विट नोन । म०—विड लोण । गु०—विड लवण । अस्य गुणानाह राजवल्लभे—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

विडं सक्षारमूर्ध्वाधःकफवातानुलोमनम् ।
दीपनं लघु तीक्ष्णोष्णं रूक्षं रुच्यं व्यवायि च।२४७।
विबन्धानाहविष्टम्भो दर्दगौरवशूलनुत् ।

+ सौवर्चलनामानि गुणाश्च—

सौवर्चलं स्याद्रुचकं मन्थपाकं च धातुमत् ॥२४८॥
रुचकं रोचनं भेदि दीपनं पाचनं परम् ।
सस्नेहं वातनुन्नातिपित्तलं विशदं लघु ॥२४९॥
औद्भिदं पांशु लवणं यज्जातं भूमितः स्वयम् ।
क्षारं गुरु कटु स्निग्धं शीतलं वातनाशनम्॥२५०॥

विडं लवणमुत्क्लेदि वह्नेर्बलविवर्धनम् ।
मलवातामविष्टम्भशूलाटोपविबन्धनुत् ॥

+ सं०—सौवर्चल । हि०—काला नोन । बँ०—सचल लवण । म०—पादे लोण । गु०—संचल । क०--सौवर्चल । तै०—नाल उप्पु । इं०—अनाकुआ सोडियम क्लोराइड (Unaqua Sodium Chloride) फा०—नमक-शिया । अ०—मला अस्वद ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

चणकाम्लकगुणाः

चणकाम्लकमत्युष्णं दीपनं दन्तहर्षणम् ।
लवणाम्लरसं रुच्यं शूलाजीर्णविबन्धनुत् ॥२५१॥

+यवक्षार-स्वर्जिका-सुवर्चिकाया नामानि गुणाश्च—

पाक्यः क्षारो यवक्षारो यावशूको यवाग्रजः ।
स्वर्जिकापि स्मृतः क्षारः कापोतः सुखवर्चकः।२५२।
कथितः स्वर्जिकाभेदो विशेषज्ञैः सुवर्चिकः ।
निहन्ति शूलवातामश्लेष्मश्वासगलामयान् ।२५३।
पाण्ड्वर्शोग्रहणीगुल्मानाहप्लीहहृदामयान् ।
स्वर्ज्जिकाल्पगुणा तस्माद्विशेषाद्गुल्मशूलहृत् ॥
सुवर्चका स्वर्ज्जिकावद्बोद्धव्या गुणतो जनैः ।

१-सौभाग्यनामानि गुणाश्च—

सौभाग्यं टङ्कणं क्षारं धातुद्रावकमुच्यते ॥२५५॥

+सं०-यवक्षार, स्वर्जिका । हि०-सज्जी । बँ-०साजिखार, साजिमाटी । म०-साजिखार । गु०-साजीखार । क०-साजिखारु । इं०-कार्बोनेट आफ सोडा (Carbonate of soda) फा०-संजार कलीया । अ०-कलीब शब्बुल अस्फर ।

१-सं०-सौभाग्य, टंकण । हि०-सोहागा । बँ०-सोहागा । म०-स्वागीखार । गु०-टंकण पटियो । क०-टंकण खारू ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

टङ्कणं वह्निकृद्रूक्षं कफहृद्वातपित्तकृत् ।

क्षारद्वयक्षारत्रयस्य च मिश्रणम्—

स्वर्जिका यावशूकश्च क्षारद्वयमुदाहृतम् ॥२५६॥

टंकणेन युतं तत्तु क्षारत्रयमुदीरितम् ।

मिलितस्तूक्तगुणवद्विशेषाद्गुल्महृत्परम् ॥२५७॥

क्षाराष्टकस्य गुणाः—

पलाशवज्रिशिखरिचिंचार्कतिलनालजः ।

यवजः स्वर्ज्जिका चेति क्षाराष्टकमुदाहृतम् ।२५८।

क्षारा एतेऽग्निना तुल्या गुल्मशूलहरा भृशम् ।

+ चुक्रनामानि गुणाश्च—

चुक्रं सहस्रवेधि स्याद्रसाम्लं शुक्तमित्यपि॥२५९॥

चुक्रमत्यम्लमुष्णं च दीपनं पाचनं परम् ।

शूलगुल्मविबन्धामवातश्लेष्महरं परम् ।

वमितृष्णास्यवैरस्यहृत्पीडावह्निमांद्यहृत् ॥२६०॥

इति हरीतक्यादिवर्गः ।

तै०-एलिगारमु । इं०-बोराक्स बोबोरेट सोडा (Borax Boborate of soda) फा०-तीगार । अ०-बुरग ।

+ सं०—चुक्र । हि०—चूक ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitized by eGangotri

कर्पूरादिवर्गः ।

❀ कर्पूरनामानि गुणाश्च—

पुंसि क्लीवे च कर्पूरो हिमाह्वो हिमवालुकः ।
घनसारश्चन्द्रसंज्ञो हिमनामापि स स्मृतः ॥१॥
कर्पूरः शीतलो वृष्यः चक्षुष्यो लेखनो लघुः ।
सुरभिर्मधुरस्तिक्तः कफपित्तविषापहः ॥२॥
दाहतृष्णास्यवैरस्यमेदोदौर्गन्ध्यनाशनः ।
कर्पूरो द्विविधः प्रोक्तः पक्वापक्वप्रभेदतः ॥३॥
पक्वात्कर्पूरतः प्राहुरपक्वं गुणवत्परम् ।

चीनसंज्ञककर्पूरगुणाः—

चीनसंज्ञस्तु कर्पूरः कफक्षयकरः स्मृतः ॥४॥
कुष्ठकंडूवमिहरस्तथा तिक्तरसश्च सः ।

❀ सं०—कर्पूर, हिमाह्व, हिमवालुक । हि०—कपूर । बँ०—कर्पूर । म०—कापूर । गु०—कपूर । क०—कर्पूर । तै०—कर्पूरामु । इं०—कैम्फर (Camphar) । फा०—कापूर । अ०—काफूर । अस्य गुणानाह सुश्रुतसंहितायाम्—

सतिक्तः सुरभिः शीतः कर्पूरो लघुलेखनः ।
तृष्णायां मुखशोषे च वैरस्ये चापि पूजितः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

❀ कस्तूरीनामानि—

मृगनाभिर्मृगमदः कथितस्तु सहस्रभित् ॥५॥
कस्तूरिका च कस्तूरी वैधमुख्या च सा स्मृता।

कस्तूरीभेदाः—

कामरूपोद्भवा कृष्णा नैपाली नीलवर्णयुक् ॥६॥
काश्मीरे कपिलच्छाया कस्तूरी त्रिविधा स्मृता।
कामरूपोद्भवा श्रेष्ठा नैपाली मध्यमा भवेत् ॥७॥
कश्मीरदेशसंभूता कस्तूरी ह्यधमा स्मृता।
कस्तूरिका कटुस्तिक्ता क्षारोष्णा शुक्रला गुरुः॥८॥
कफवातविषच्छर्दिशीतदौर्गन्ध्यदोषहृत्।

लताकस्तूरिकागुणाः—

लताकस्तूरिका तिक्ता स्वाद्वी वृष्या हिमा लघुः॥९॥
चक्षुष्या छेदनी श्लेष्मतृष्णावस्त्यास्यरोगहृत्।

❀ सं०—मृगनाभि, मृगगद। हि०—कस्तूरी। बँ०-मृगनाभि। म०—गु०—क०—कस्तूरी। तै०—कास्तूरी। इं०—मस्क (Musk)। फा०—मुश्क। अ०—मिस्क।

कस्तूर्याः पंच भेदनाह राजनिघण्टुकारः—

साप्येका खरिका ततश्च तिलक ज्ञेया कुलित्थापरा।
पिण्डान्यापि च नायिकेति च परा या पंचभेदाभिधा॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

गन्धमार्जारवीर्य्यगुणाः—

गन्धमार्जारवीर्य्यन्तु वीर्य्यकृतत्कफवातहृत् ।१०।
कण्डुकुष्ठहरं नेत्र्यं सुगन्धं स्वेदगन्धनुत् ।

❀ चन्दननामानि गुणाश्च—

श्रीखण्डं चन्दनं न स्त्री भद्रश्रीस्तैलपर्णिका ॥११॥
गन्धसारो मलयजस्तथा चन्द्रद्युतिश्च सः ।
स्वादे तिक्तं कषे पीतं छेदे रक्तं तनौ सितम् ॥१२॥
ग्रन्थिकोटरसंयुक्तं चन्दनं श्रेष्ठमुच्यते ।
चन्दनं शीतलं रूक्षं तिक्तमाह्लादनं लघु ॥१३॥
श्रमशोषविषश्लेष्मतृष्णापित्तास्रदाहनुत् ।

+ हरिचन्दननामानि गुणाश्च—

कलम्बकंतु कालीयं पीताभं हरिचन्दनम् ॥१४॥

❀ सं०-चन्दन, श्रीखण्ड । हि०-बँ०-म०-तै०-चन्दन । गु०—सुखण्ड । इँ०—सेंडल वुड (sandal wood) फा०-संदल अबीयद ।

चन्दनं शीतलं रूक्षं तिक्तमाह्लादनं लघु ।
हृद्यं वर्ण्यं विषश्लेष्मतृष्णापित्तास्रदाहजित् ॥

+ सं०—कलम्बक, कालीय, हरिचन्दन, पीतकाष्ठ । हि०—कलम्बक, पीला चन्दन । बँ०—कलम्बा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

हरिप्रियं कालसारं तथा कालानुसार्य्यकम् ।
कालीयकं रक्तगुणं विशेषाद्व्यङ्गनाशनम् ॥१५॥

❀ रक्तचन्दननामानि गुणाश्च—

रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम् ।
तिलपर्णीरक्तसारं तत्प्रवालफलं स्मृतम् ॥१६॥
रक्तं शीतं गुरु स्वादु छर्दितृष्णास्रपित्तहृत् ।
तिक्तं नेत्रहितं वृष्यं ज्वरव्रणविषापहम् ॥१७॥

÷ पतंगनामानि गुणाश्च—

पतंगं रक्तसारं च सुरंगं रञ्जनं तथा ।
पटरञ्जकमाख्यातं धत्तूरं च कुचनन्दनम् ॥१८॥

❀ सं०—रक्ताङ्ग, क्षुद्रचन्दन । हि०—लाल चन्दन । बँ०—म०—रक्तचंदन । गु०—रतांजली । क०—रक्त चंदन । तै०—एर्रगंधपुचेक्क । ता०—शेनशाण्डनम् । इं०—रेड सेण्डल वुड (Red sandalwood) फा०—सन्दले सुर्ख । अ०—सन्दले अहमर ।

÷ सं०—पतङ्ग, रक्तसार । हि०—क०गु०—म०-पतंग-वृक्ष । बँ०—बकम् काष्ठ । तै०—औकनु कट्टु । ता०—कटङ्गी । इं०—सेपन वुड (Sapan wod) फा०—अ०—बकम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

पतङ्गं मधुरं शीतं पित्तश्लेष्मव्रणास्रनुत् ।
हरिचन्दनवद्वेद्यं विशेषाद्दाहनाशनम् ॥१९॥
चन्दनानि तु सर्वाणि सदृशानि रसादिभिः ।
गन्धेन तु विशेषोऽस्ति पूर्वं श्रेष्ठतमं गुणैः ॥२०॥

÷ अगुरुनामानि तद्भेदो गुणाश्च—

अगुरु प्रवरं लोहं राजार्हं योगजं तथा ।
वंशिकं कृमिजं चापि कृमिजग्धमनार्य्यकम् ॥२१॥
अगूरूष्णं कटु त्वच्यं तिक्तं तीक्ष्णं च पित्तलम् ।
लघु कर्णाक्षिरोगघ्नं शीतवातकफप्रणुत् ॥२२॥
कृष्णं गुणाधिकं तत्तु लोहवद्धारि मज्जति ।
अगुरुप्रभवः स्नेहः कृष्णागुरुसमः स्मृतः ॥२३॥

÷ सं०—अगुरु । हि०—अगर । बँ०—म०—गु०—क०—ता०—अगुरु । तै०—हरु गुहचेट्टु । इं०—ईगल वुड (Eagle wood) अ०—उदगरकी । फा०—कशवेववा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

१-देवदारुनामानि गुणाश्च—

देवदारु स्मृतं दारु भद्रदार्विन्द्रदारु च।
मस्तदारु द्रुकिलिमं किलिमं सुरभूरुहः ॥२४॥
देवदारु लघु स्निग्धं तिक्तोष्णं कटुपाकि च।
विबन्धाध्मानशोथामतन्द्राहिक्काज्वरास्रजित् ।२५।
प्रमेहपीनसश्लेष्मकासकण्डुसमीरनुत् ।

२ सरलनामानि गुणाश्च—

सरलः पीतवृक्षः स्यात्तथा सुरभिदारुकः ॥२६॥
सरलो मधुरस्तिक्तः कटुपाकरसो लघुः।
स्निग्धोष्णः कर्णकण्ठाक्षिरोगरक्षोहरः स्मृतः ॥२७॥
कफानिलस्वेददाहकासमूर्च्छाव्रणापहः।

१-सं०—देवदारु, भद्रदारु। हि०—बँ०—देवदारु। म०—तेल्या देवदारु। गु०—देवदार। क०—चोवडा देवदारु। तै०—जेक्का। फा०—देवदारु। अ०—शजर तुलजीन। इङ्गलिश—पाइन्स डीपोदर।

-२-सं०—सरल, पीनवृक्ष। हि०—धूपवृक्ष। बँ०—सरल काष्ठ। म०—गु०—सरल देवदार। तें०—सरल देवदरि चेट्टु। ता०—सरल देवदारी। इँ०—लांग लीव्ड पाइन (Longleaved pine)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१-तगरनामानि गुणाश्च—

कालानुसार्य्यं तगरं कुटिलं नहुषं नतम् ॥२८॥
अपरं पिण्डतगरं दण्डहस्तं च बर्हिणम् ।
तगरद्वयमुष्णं स्यात् स्वद्विं स्निग्धं लघु स्मृतम् ।२९।
विषापस्मारशूलाक्षिरोगदोषत्रयापहम् ।

२-पद्मकनामानि गुणाश्च—

पद्मकं पद्मगन्धि स्यात्तथा पद्माह्वयं स्मृतम् ॥३०॥
पद्मकं तुवरं तिक्तं शीतलं वातलं लघु ।
विसर्पदाहविस्फोटकुष्ठश्लेष्मास्रपित्तनुत् ॥३१॥
गर्भसंस्थापनं वृष्यं वमिव्रणतृषाप्रणुत् ।

१-सं०—तगर, कालानुसार्य । हि०—गु०—क०—तगर । बँ०—तगरपादुका । म०—गौडे तगर । तै०—गन्धि तगर पुचेट्टु । उत्कल—बाणिकलरा । तै०—चम्मा । अ०—अशारुन । अस्य गुणानाह शोंडलनिघंटौ—

तगरं कुष्ठजित्प्रोक्तं दृक्शीर्षव्याधिजिल्लघु ॥

२—सं०—पद्मक, पद्मगंधि । हि०—पद्माख । बँ०—म०—पद्मकाष्ठ । गु०—पद्मवलकड । तै०—पद्मपुचेक्का ।

Dr. Umesh Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

+ गुग्गुलुनानामानि जातिश्च—

गुग्गुलुर्देवधुपश्च जटायुः कौशिकः पुरः ॥३२॥
कुम्भोलूखलकं क्लीबे महिषाक्षः पलंकषः ।
महिषाक्षो महानीलः कुमुदः पद्म इत्यपि ॥३३॥
हिरण्यः पञ्चमो ज्ञेयो गुग्गुलोः पञ्च जातयः ।
मृगाञ्जनसवर्णस्तु महिषाक्ष इति स्मृतः ॥३४॥
महानीलस्तु विज्ञेयः स्वनामसमलक्षणः ।
कुमुदः कुमुदाभः स्यात् पद्मो माणिक्यसन्निभः ।३५।
हिरण्याख्यस्तु हेमाभः पञ्चानां लिङ्गमीरितम् ।
महिषाक्षो महानीलो गजेन्द्राणां हितावुभौ ॥३६॥
हयानां कुमुदः पद्म स्वस्त्यारोग्यकरौ परौ ।
विशेषेण मनुष्याणां कनकः परिकीर्त्तितः ॥३७॥
कदाचिन्महिषाक्षश्च मतः कैश्चिन्नृणामपि ।

गुणाः—

गुग्गुलुर्विशदस्तिक्तो वीर्य्योष्णः पित्तलः सरः ।३८।

+ सं०—गुग्गुल, कालनिर्यास । हि०—गूगुल । बँ०—गुग्गुल । गु० -म०—गूगुल । क०—इडवोल । ते०—गुग्गिल पुचेट्टु महिसाछी । इं०—इण्डियन डेलियम् (Indian Dellium) । फा०—बोएज हुदान । अ०—मुश्किले अर्जक ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कषायः कटुकः पाके कटुरूक्षो लघुः परः ।
भग्नसन्धानकृद्वृष्यः सूक्ष्मस्वर्यो रसायनः ॥३९॥
दीपनः पिच्छिलो बल्यः कफवातव्रणापचीः ।
मेदोमेहाश्मवातांश्च क्लेदकुष्ठाममारुतान् ॥४०॥
पिण्डिकाग्रंथिशोफार्शोगण्डमालाकृमीञ्जयेत् ।
माधुर्याच्छमयेद्वातं कषायत्वाच्च पित्तहा ॥४१॥
तिक्तत्वात्कफजित्तेन गुग्गुलुः सर्वदोषहा ।
स नवो बृंहणो वृष्यः पुराणस्त्वतिलेखनः ॥४२॥
स्निग्धः काञ्चनसंकाशः पक्वजम्बूफलोपमः ।
नूतनो गुग्गुलुः प्रोक्तः सुगंधिर्यस्तु पिच्छिलः ।४३।
शुष्को दुर्गंधकश्चैव त्यक्तप्रकृतिवर्णकः ।
पुराणः स तु विज्ञेयो गुग्गुलुर्वीर्य्यवर्जितः ॥४४॥
अम्लं तीक्ष्णमजीर्णं च व्यवायं भ्रममातपम् ।
मद्यं रोषं त्यजेत्सम्यग्गुणार्थी पुरसेवकः ॥४५॥

× श्रीवासनामानि गुणाश्च

श्रीवासः सरसस्रावः श्रीवेष्टो यक्षधूपकः ।
श्रीवासो मधुरास्तक्तः स्निग्धोष्णस्तुवरः सरः ।४६॥

सं०--श्रीवास । हि०--गंधबिरोजा । बँ०--टार्पिन तेल । म०--सरलडिंक । गु०--गन्धबिरोजा । क०--श्रीवेष्टक । ता०-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पित्तलो वातमूर्द्धाक्षिस्वररोगक्षयापहः ।
रक्षोघ्नः स्वेददौर्गन्ध्ययूकाकण्डूव्रणप्रणुत् ॥४७॥

❀ रालनामानि गुणाश्च—

रालस्तु शालनिर्य्यासस्तथा सर्जरसः स्मृतः ।
देवधूपो यक्षधूपस्तथा सर्वरसश्च सः ॥४८॥
रालो हिमो गुरुस्तिक्तः कषायो ग्राहको हरेत् ।
दोषास्रस्वेदवीसर्पज्वरव्रणविषादिकाः ॥४९॥

१—कुंदुरुनामानि गुणाश्च—

कुन्दुरुस्तु मुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि ।५०।

पिनैमारु । इं०—गमकोपल सेंडजैक (Gumcopal sandajack) । फा०—संदरुस । अ०—संदरुस ।

❀ सं०—राल, सालनिर्यास । हि० राल । बँ०—धूना, धूनी । म०—राळयिबली । गु०—राल । क०—सर्जरस । इं०—यलो राइज़िन (Yellow Risin) फा०—राल मगरेबी । अ०—किकहर ।

१—सं०—कुन्दुरु, कुन्द । हि०—कुन्दुरु, गुन्दव-रोसा । बँ०—कुन्दुरु खोटी । म०—अवल गन्दर । गु०—

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitized by eGangotri

कुन्दुरुर्मधुरस्तिक्तस्तीक्ष्णस्त्वच्यः कटुर्हरेत् ।
ज्वरस्वेदग्रहालक्ष्मीमुखरोगकफानिलान् ॥५१॥

[1]–सिह्लकनामानि गुणाश्च—

सिह्लकस्तु तुरुष्कः स्याद्यतो यवनदेशजः ।
कपितैलं स चाख्यातः तथा च कपिनामकः ॥५२॥
सिह्लकः कटुकः स्वादुः स्निग्धोष्णः शुक्रकान्तिकृत् ।
वृष्यः कण्ठ्यः स्वेदकुष्ठज्वरदाहग्रहावहः ॥५३॥

[2]–जातीफलनामानि गुणाश्च—

जातीफलं जातिकोषं मालतीफलमित्यपि ।

किन्दुरु । क०—इबड बोल । इं०—ओलिलेनम् (Olidanum) फा०–कन्दुर रूमी । अ०--कुन्दुरुम । गुणाः–

शर्करासहितं मेहं वृषणस्य व्यथां हरेत् ॥

[1]–सं०—सिह्लक, कपिनामा । हिन्दी—शिलारस (शिलाजीत । बं०–म०–गु०—शिलारस । क०—पिण्डतैल । इं०–लिक्विड एम्बर (Liquid amber) फा०–सलारस । अ०—उसारेकमिया । द्रा०—कपितेल ।

[2]–सं०—जालीफल । हि०—बं०—म०–जायफल । गु०—क०—जाईफल । तै०—जादिकाया । ता०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

जातीफलं रसे तिक्तं तिक्तोष्णं रोचनं लघु ।५४।
कटुकं दीपनं ग्राहि स्वर्य्यं श्लेष्मानिलापहम् ।
निहन्ति मुखवैरस्यं मद्यदौर्गन्ध्यकृष्णताः ॥५५॥
कृमिकासवमिश्वासशोषपीनसहृद्रुजः ।

१-जातीपत्रीनामानि गुणाश्च—

जातीफलस्य त्वक् प्रोक्ता जातिपत्री भिषग्वरैः ।५६।
जातीपत्री लघुः स्वादुः कष्टूष्णा रुचिवर्णकृत् ।
कफकासवमिश्वासतृष्णाकृमिविषापहा ॥५७॥

२-लवंगनामानि गुणाश्च—

लवङ्गं देवकुसुमं श्रीसंज्ञं श्रीप्रसूनकम् ।
लवङ्गं कटुकं तिक्तं लघु नेत्रहितं हिमम् ॥५८॥

जोदिकराय । बर्मा—जादिक्तु । इ०—नट मेग (Nut meg) फा०—जोभोबुवा । अ०—जोझ उतलीब ।

१-सं०—जातिपत्री । हि०—जावित्री । बँ०—जैड़ी । म०—जायत्री । गु०—जावत्री । क०—जायपत्री । ते०—जायपत्री । गु०—जावपत्री । क०—जायपत्री । तै०—जाजिपत्री । इँ०—मेस (Mace) । फा०—जवित्री । अ०—बिसबासा ।

२ सं०—लवंग । हि०—लौंग । बँ०—म०—लवंग । गु०—लवोंग । क०—लवंगकलिका । तै०—लवंगलु । ता०—किरम् बेर । इँ०—क्लैव्ज (Claves) फा०—मेहक । अ०—करनफूल

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

दीपनं पाचनं रुच्यं कफपित्तास्रनाशनम् ।
तृष्णां छर्दिं तथाध्मानं शूलमाशु विनाशयेत् ।५९।
कासं श्वासं च हिक्कां च क्षयं क्षपयति ध्रुवम् ।

१-बहुलानामानि गुणाश्च—

एला स्थूला च बहुला पृथ्वीका त्रिपुटीति च ।६०।।
भद्रैला बृहदेला च चन्द्रबाला च निष्कुटिः ।
स्थूला च कटुका पाके रसे चानिलकृल्लघुः ।६१।।
रूक्षोष्णा श्लेष्मपित्तास्रकण्डूश्वासतृषापहा ।
हृल्लासविषवस्त्यास्यशिरोरुग्वमिकासनुत् ।।६२।।
रसे तु कटुका शीता लघ्वी वातहरी मता ।

२-उपकुंचिकानामानि गुणाश्च—

सूक्ष्मोपकुंचिका तुत्था कोरङ्गी द्राविडी त्रुटिः ।
एल सूक्ष्मा कफश्वासकासार्शोमूत्रकृच्छ्रहृत् ।६३।।

१-सं०-एला, स्थूल एला। हि०-बड़ी इलायची। बँ०-एलायच। म०--धोरवेला। गु०--मोटी एलची। क०—परङ्गलक्की। तै०—तग एलाकुलु, एलुक चेट्टु। ता०—एलम्। इँ०--लार्ज कार्डामोम (Large cardamom) फा०—हैलकला। अ०—काकलेकिवार।

२-सं०--उपकुंचिका, तुत्था। हि०--छोटी इलायची, गुज-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

+ त्वक्पत्रनामानि गुणाश्च—

त्वक्पत्रं च वराङ्गं स्याद् भृंगचोचं तथोत्कटम्।६४।
त्वचं लघूष्णं कटुकं स्वादु तिक्तं च रूक्षकम्।
पित्तलं कफवातघ्नं कण्ड्वामारुचिनाशनम्॥६५॥
हृद्धस्तिरोगवातार्शःकृमिपीनसशुक्रहृत्।

दारुसितानामानि गुणाश्च—

त्वक् स्वाद्वी तु तनुत्वक् स्यात्तथा दारुसिता मता ६६
उक्ता दारुसिता स्वाद्वी तिक्ता चानिलपित्तहृत्।
सुरभिः शुक्रला वर्ण्या मुखशोषतृषापहा ॥६७॥

राती इलायची। बँ०-छोट एलाच, गुजराती इलाइच। म०-वैलची। गु०-एलची कागदी। तै०-एलाकु। द्रा०-एली-कुल्लकापु। इँ०-शिलसर कार्डामोम् (Seleser cardamom) फा०—हैलहिलहाल। अ०-काकिलेसिगार।

+सं०-त्वक्पत्र, मृग, रामेष्ट। हि०-तज, दालचीनी। बँ०-दारुचिनी। म०-दालचिनी। गुजराती-कनाड़ी-तज। तै०-सनलिगु। ता०-कारुवाकरु उपट्टाई। इँ०-सिन्नामल बार्क (sinnamal Bark) फा०—दाचिनी। अ०—सार्तीखा। अस्य गुणानाह राजनिघण्टौ—

त्वचं तु कटुकं शोथं कफकासविनाशनम्।
शुक्रामशमनं चैव कण्ठशुद्धिकरं लघु॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

+ तमालपत्रनामानि गुणाश्च—

पत्रं तमालपत्रं च तथा स्यात्पत्रनामकम् ।
पात्रकं मधुरं किञ्चित्तीक्ष्णोष्णं पिच्छिलं लघु ।६८।
निहन्ति कफवातार्शोहृल्लासारुचिपीनसान् ।

÷ नागपुष्पनामानि गुणाश्च—

नागपुष्पः स्मृतो नागः केसरो नागकेसरः ॥६९॥
चाम्पेयो नागकिञ्जल्कः कथितः काञ्चनाह्वयः ।
नागपुष्पं कषायोष्णं रूक्षं लघ्वामपाचनम् ॥७०॥
ज्वरकण्डूतृषास्वेदच्छर्दिहृल्लासनाशनम् ।
दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम् ॥७१॥

+ सं०—तमालपत्र। हिन्दी—तेजपात, तेजपत्र। म०—गु०—तमालपत्र। क०—पत्रक। तै०—आकुपत्री। इं०—फोलिया नालाबाथी (Folianalabathy) फा०—सादरसू। अ०—साजिज।

÷ सं०—नागपुष्प, नागकेसर। हि०—म०—क०—नागकेशर। बं०—नागेश्वर। ता०—नांगल। तै०—नागकेशरालु। अ०—नागमुष्क। अस्य गुणाः—

केसरं विषवीसर्परक्तार्शोवमिकुष्ठहृत् ।
उच्छ्वासमुखदौर्गन्ध्यतृष्णापित्तवलासजित् ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्रिजातचतुर्जातनामानि गुणाश्च—

त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम् ।
नागकेसरसंयुक्तं चतुर्जातकमुच्यते ॥७२॥
तद्द्वयं रोचनं रूक्षं तीक्ष्णोष्णं मुखगन्धहृत् ।
लघुपित्ताग्निकृद्वृष्यं कफवातविषापहम् ॥७३॥

× कुंकुमनामानि जातिश्च—

कुंकुमं घुसृणं रक्तं काश्मीरं पीतकं वरम् ।
सङ्कोचं पिशुनं धीरं वाह्लीकं शोणिताभिधम् ॥७४॥
काश्मीरदेशजे क्षेत्रे कुंकुमं यद्भवेद्धितम् ।
सूक्ष्मकेसरमारक्तं पद्मगन्धि तदुत्तमम् ॥७५॥
वाह्लीकदेशसञ्जातं कुंकुमं पाण्डुरं मतम् ।
केतकीगन्धयुक्तं तन्मध्यमं सूक्ष्मकेसरम् ॥७६॥
कुंकुमं पारसीके यन्मधुगन्धि तदीरितम् ।
ईषत्पाण्डुरवर्णं तत् ह्यधमं स्थूलकेसरम् ॥७७॥

× सं०—कुंकुम, घुसृण। हि०—केसर। बं०—कुंकुमकेशर। म०—गु०—केशर। क०—कुंकुम। तै०—कुंकुमपुवु। इं०—सेफ्रन। द्रा०-कुंकुमपूव। फा०-जरकीमास। अ०-जाफरान।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

गुणाः—

कुंकुमं कटुकं स्निग्धं शिरोरुग्व्रणजन्तुजित् ।
तिक्तं वमिहरं वर्ण्यं व्यङ्गदोषत्रयापहम् ॥७८॥

× गोरोचनानामानि गुणाश्च—

गोरोचना तु माङ्गल्या वन्द्या गौरी च रोचना ।
गोरोचना हिमा तिक्ता वश्या मङ्गलकान्तिदा ।७९।
विषालक्ष्मीग्रहोन्मादगर्भस्रावक्षतास्रजित् ।

+ नखनामानि गुणाश्च—

नखं व्याघ्रनखं व्याघ्रायुधं तच्चक्रकारकम् ॥८०॥
नखं स्वल्पं नखी प्रोक्ता हनुर्हट्टविलासिनी ।
नखद्वयं ग्रहश्लेष्मवातास्रज्वरकुष्ठनुत् ॥८१॥

× सं०—गोरोचना, मांगल्या । हि०—गोरोचन, गोलोचन । बँ०—गोरोचना । म०—गु०—क०—गोरोचन । तै०—गोरोचनमु । इँ०—गोलस्टोन विजूर (Gollstone Bijoor) फा०—गायरोहन । अ०—हजरुलबक्कर ।

+ सं०—नख, व्याघ्र-नख । हि०—नख, नखी । बँ०—नख, गंधद्रव्य । म०—नखला, वाघनख । गु०—नखला । क०—नख, वाघनख । इँ०—शेल (Shell) फा०—ग्राहकसर । अ०—इकलिलुल्मुलुक ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitized by eGangotri

लघूष्णं शुक्रलं वर्ण्यं स्वादु व्रणविषापहम् ।

× ह्रीबेरनामानि गुणाश्च—

बालं ह्रीबेरवर्हिष्ठोदीच्यं केशाम्बुनाम च ॥८२॥

बालकगुणाः—

बालकं शीतलं रूक्षं लघुदीपनपाचनम् ॥८३॥
हृल्लासारुचिवीसर्पहृद्रोगामातिसारजित् ।

वीरणनामानि गुणाश्च—

स्याद्वीरणं वीरतरुर्वीरं च बहुमूलकम् ॥८४॥
वीरणं पचनं शीतं स्तम्भनं लघुतिक्तकम् ।
मधुरं ज्वरनुद्भ्रांतिमदजित्कफपित्तहृत् ॥८५॥
तृष्णास्रविषवीसर्पकृच्छ्रदाहव्रणापहम् ।

+ उशीरनामानि गुणाश्च—

वीरणस्य तु मूलं स्यादुशीरं नलदं च तत् ॥८६॥

× सं०—ह्रीबेर, बालक । हि०—सुगंधबाला । बँ०—बाल्य, गंधबाला । म०-बाल्या । गु०—बालो । कर्णाटकी-बालदवेरु, खसमुष्टिवेल । तै०—वाटिवेल्लु । फा० असारुं ।

+ सं०—उशीर, नलद, अमृणाल । हि०—खस, वीरन । बँ०—व्याणारमूल । म०—कालावाला । गु०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अमृणालं च सेव्यं च समगन्धकमित्यपि ।
उशीरं पाचनं शीतं स्तम्भनं लघु तिक्तकम् ॥८७॥
मधुरं ज्वरहृद्वांतिमदनुत्कफपित्तनुत् ।
तृष्णास्रविषवीसर्पदाहकृच्छ्रव्रणापहम् ॥८८॥

× जटामासीनामानि गुणाश्च—

जटामासी भूतजटा जटिला च तपस्विनी ।
मांसीतिक्ता कषाया च मेध्या कान्तिबलप्रदा ।८९।
स्वाद्वी हिमा त्रिदोषास्रदाहवीसर्पकुष्ठनुत् ।

+ शिलापुष्पनामानि गुणाश्च—

शैलेयं तु शिलापुष्पं वृद्धं कालानुसार्य्यकम् ॥९०॥

कालावालो । क०—कालदवेस । तै०—अवरुगटी । ता०—वेतेवर । अस्य गुणानाह राजवल्लभे—

उशीरं स्वेददौर्गन्ध्यदाहपित्तास्ररोगजित् ।

× सं० - जटामासी, भूतजटा । हि०—जटामासी, बालछड़ । म०—तै०—जटामासी । गु०—बालछड़ । क०—आकाश जटामांसी । इं०—स्पिकनार्ड (Spike nard) फा०—सुबूल । अ०—सुबुलत्तीब ।

+ सं०—शैलेय, शिलापुष्प, शैलाख्य । हि०—भूरि छरीला, पत्थरका फूल । बं०—शैलेज । म०—दगडफूल ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

शैलेयं शीतलं हृद्यं कफपित्तहरं लघु ।
कण्डुकुष्ठाश्मरीदाहविषहृल्लासरक्तजित् ॥९१॥

× मुस्तकनामानि गुणाश्च—

मुस्तकं न स्त्रियां मुस्तं त्रिषु वारिदनामकम् ।
कुरुविन्दोऽपरो भद्रमुस्तो नागरमुस्तकः ॥९२॥
मुस्तं हिमं कटु ग्राहि तिक्तं दीपनपाचनम् ।
कषायकफपित्तास्रतृड्ज्वरारुचिजन्तुजित् ॥९३॥
अनूपदेशे यज्जातं मुस्तकं तत् प्रशस्यते ।
अनूपदेशे यज्जातं मुस्तकं तत् प्रशस्यते ।
तत्रापि मुनिभिः प्रोक्तं वरं नागरमुस्तकम् ॥९४॥

+ कर्चूरनामानि गुणाश्च—

कर्चूरो वैधमुख्यश्च द्राविडः कालिपकः शटी ।
कचूरो दीपनो रुच्यः कटुकस्तिक्त एव च ॥९५॥

गु०—पत्थरफूल । क०—कलहू, कलडू । तै०—शैलेयम-नेद्गव्यमु । फा०—दहाल । अ०—आशीना ।

× सं०—मुस्तक, बालेय । हि०—मोथा, नागरमोथा । बँ०—मुताथा । म०—मोथे, नागरमोथे । गु०—मोथ्य । क०—मुस्ता । तै०—तुंगमुस्त । ता०—कोरय । द्रा०—गरमोटा । फा०—शादकफी । अ०—मुष्कजमीन ।

+ सं०—कर्चूर । हि०—कचूर, काली हरदी । बँ०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुगन्धिः कटुपाकः स्यात्कुष्ठार्शोव्रणकासनुत् ।
उष्णो लघुर्हरेच्छ्वासगुल्मवातकफक्रिमीन् ।९६।

× मुरानामानि गुणाश्च—

मुरा गन्धकुटी दैत्या सुरभिः शालपर्णिका ।
मुरा तिक्ता हिमा स्वाद्वीलघ्वी पित्तानिलापहा ।९७।
ज्वरासृग्भूतरक्षोघ्नी कुष्ठकासविनाशिनी ।

+ पलाशीनामानि गुणाश्च—

शठी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिका ॥९८॥
गन्धारिका गन्धवपुर्वधूः पृथुपलाशिका ।
भवेद्गन्धपलाशी तु कषाया ग्राहिणी लघुः ॥९९॥

एकांगी । म०—कचोरा । गु०—कचूरी । क०—कचोरा । तै०—काचोरालु । इं०—लौंग जेडसारो (Long Zedsaro) फा०—जरंबाद । अ०—एरकुल काफूर ।

× सं०-मुरा, गन्धिनी, शालपर्णी । हि०-एकांगी मुरा । बँ०-मुरासांसी। म०-एकांगीमुरा । क०-मुरे । गु०-मोरमांसी ।

+सं०—शटी, पलाशी । हि०—गंधपलाशी, कचूरभेद । बँ०—शटी, आम आदा । म०—कपूरकचरी । क०—गन्धशटी । तै०—किचलिरागड्डलि । अ०—जरंबाद ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तिक्ता तीक्ष्णा च कटुकानुष्णास्यमलनाशिनी।
शोथकासव्रणश्वासशूलहिध्मग्रहापहा ॥१००॥

× प्रियंगुनामानि गुणाश्च—

प्रियंगु फलिनी कांता लता च महिलाह्वया।
गुन्द्रा गन्धफली श्यामा विष्वक्सेनाङ्गनाप्रिया ॥
प्रियंगुः शीतला तिक्ता तुवरानिलपित्तहृत्।
रक्तातिसारदौर्गंध्यस्वेददाहज्वरापहा ॥१०२॥
गुल्मतृड्विषमेहघ्नी तद्वद्गन्धप्रियंगुका।
तत्फलं मधुरं रूक्षं कषायं शीतलं गुरु ॥१०३॥
विबन्धाध्मानबलजित् संग्राहि कफपित्तजित्।

+ रेणुकानामानि गुणाश्च—

रेणुका राजपुत्री च नन्दिनी कपिला द्विजा ॥१०४॥

× सं०—प्रियंगु। हि०—फूलप्रियंगु। बँ०—प्रियंगु। म०—गह्वला। गु०—धडला। क०—नेपिंलगु। तै०—प्रेंकणपुकेट्टु। ता०—प्रियंगु।

+ सं०—रेणुका, राजपुत्री। हि०—सँभालूके बीज। बँ०—रेणुक। म०—रेणुकबीज। गु०—हरेणु। क०—रेणुका। तु०—येट्टी।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitized by eGangotri

भस्मगन्धा पाण्डुपुत्री स्मृता कौन्तीह रेणुका।
रेणुका कटुका पाके तिक्तानुष्णा कटुर्लघुः ॥१०५॥
पित्तला दीपनी मेध्या पाचनी गर्भपातनी।
वलासवातकृच्चैव तृट्कण्डुविषदाहनुत् ॥१०६॥

× ग्रन्थिपर्णनामानि गुणाश्च–

ग्रन्थिपर्णं ग्रन्थिकं च काकपुच्छं च गुत्थकम्।
नीलपुष्पं सुगन्धश्च कथितं तैलपर्णिकम् ॥१०७॥
ग्रन्थिपर्णं तिक्ततीक्ष्णं कटूष्णं दीपनं लघु।
कफवातविषश्वासकंडूदौर्गंध्यनाशनम् ॥१०८॥

स्थौणेयकनामानि गुणाश्च–

स्थौणेयकं बर्हिबर्हं शुक्रबर्हं च कुक्कुरम्।
शीर्णरोमशुकं चापि शुकपुष्पं शुकच्छदम् ॥१०९॥
स्थौणेयकं कटु स्वादु तिक्तं स्निग्धं त्रिदोषनुत्।
मेधाशुक्रकरं रुच्यं रक्षोऽश्रीज्वरजन्तुजित्॥११०॥
हन्ति कुष्ठास्रतृड्दाहदौर्गन्ध्यतिलकालकान्।

निशाचरनामानि गुणाश्च–

निशाचरो धनहरः कितवो गणहासकः ॥१११॥

× सं०—ग्रन्थिपर्ण। हि०—गठिवन। बँ०—गैंटेला। म०—गठोना। क०—गाठिवन।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रोचकः शङ्कितश्चण्डो दुष्पत्रः क्षेमको रिपुः।
रोचको मधुरस्तिक्तः कटुः पाके कटुर्लघुः ॥११२॥
तीक्ष्णो हृद्यो हिमो हन्ति कुष्ठकण्डूकफानिलान्।
रक्षोऽश्रीस्वेदमेदोस्रज्वरगन्धविषव्रणान् ॥११३॥

+तालीसपत्रनामानि गुणाश्च—

तालीसमुक्तं पत्राढ्यं धात्रीपत्रं च तत्स्मृतम्।
तालीसं लघु तीक्ष्णोष्णं श्वासकासकफानिलान् ११४
निहन्त्यरुचिगुल्मामवह्निमान्द्यक्षयामयान्।

×कक्कोलनामानि गुणाश्च—

कक्कोलं कोलकं प्रोक्तं तथा कोशफलं स्मृतम्।११५
कक्कोलं लघु तीक्ष्णोष्णं तिक्तं हृद्यं रुचिप्रदम्।

+सं०—तालीसपत्र, धात्रीपत्र। हि०—बँ०—क०—गु०—तालीसपत्र। म०—लघु तालीसपत्र। तै०—तालीशपत्री। द्रा०—पनिअल। फ०—जरनव। अ०—तालीसख।

×सं०—कङ्कोल, कोलक। हि०—शीतल चीनी, कबाब चीनी। बँ०—काँकला म०—कंकोल। गु०—चणकबाब। क०—कक्कोलद्वय। तै०—कबाब चीनी। इँ०—क्यूबेब पेपर (Cubeb Pepper) फा०—कबाबह। अ०—कबास।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

गन्धकोकिलागन्धमालतीगुणाः—

आस्यदौर्गन्ध्यहृद्रोगकफवातामयान्ध्यहृत् ।११६।
स्निग्धोष्णा कफहृत्तिक्ता सुगन्धा गन्धकोकिला।
गन्धकोकिलया तुल्या विज्ञेया गन्धमालती ।११७।

+ लामज्जकनामानि गुणाश्च—

लामज्जकं सुनागं स्यादमृणालं लयं लघु।
इष्टकापथकं सेव्यं नलदं चावदातकम् ॥११८॥
लामज्जकं हिमं तिक्तं लघु दोषत्रयास्रजित्।
त्वगामयस्वेदकृच्छ्रदाहपित्तास्ररोगनुत् ॥११९॥

÷ एलवालुकनामानि गुणाश्च—

एलवालुकमैलेयं सुगन्धि हरिवालुकम्।
ऐलवालुकमेलालु कापित्थं फलमीरितम् ॥१२०॥
एलवालु कटुकं पाके कषाये शीतलं लघु।
हन्ति कण्डूव्रणच्छर्दितृट्कासारुचिहृद्रुजः ॥१२१।

+ सं० लामज्जक। हि०—लामज्जक। बँ०—गंधबेणा। म०—लावज। गु०—सुगंधि पीलु। तै०—तेल्लवट्टिवेरु।

÷ सं०—एलावालुक। हि०—एलुवा। बँ०—एलवालुका। तै०—कुमुखुउम। म०—वेलची।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

बलासविषपित्तास्रकुष्ठमूत्रगदक्रिमीन् ।

कुटन्नटनामानि गुणाश्च—

कुटन्नटं दासपुरं बालेयं परिपेलवम् ॥१२२॥
प्लवगोपुरगोनर्दनकैवर्त्तीमुस्तकानि च ।
मुस्तावत्पेलवपुटं शुक्राभं स्याद्वितुन्नकम् ॥१२३॥
वितुन्नकं हिमं तिक्तं कषायं कटु कान्तिदम् ।
कफपित्तास्रवीसर्तकुष्ठकण्डूविषप्रणुत् ॥१२४॥

+स्पृक्कानामानि गुणाश्च—

स्पृक्काऽसृक् ब्राह्मणी देवी मरुन्माला लता लघु ।
समुद्रान्ता वधूः कोटिवर्षालङ्कोपिकेत्यपि ॥१२५॥
स्पृक्का स्वाद्वी हिमा वृष्या तिक्ता निखिलदोषनुत् ।
कुष्ठकण्डूविषस्वेददाहास्रज्वररक्तहृत् ॥१२६॥

पर्पटीनामानि गुणाश्च—

पर्पटी रंजना कृष्णा जतुका जननी जनी ।
जतुकृष्णाग्निसंस्पर्शा जतुकृच्चक्रवर्तिनी ॥१२७॥
पर्पटी तुवरा तिक्ता शिशिरा वर्णकृल्लघुः ।
विषव्रणहरी कण्डूकफपित्तास्रकुष्ठनुत् ॥१२८॥

+सं०—स्पृक्का । हि०—असवरग । बँ०—पिडिशाक । म०—स्पृक्का, गगौना । क०—हिक्के । तै०—स्पृक्कुथमंडुद्रव्यमु ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नलिकानामानि गुणाश्च—

नलिका विद्रुमलता कपोतचरणा नटी ।
धमन्यञ्जनकेशी च निर्मथ्या सुषिरा नली ।१२९।
नलिका शीतला लघ्वी चक्षुष्या कफपित्तहृत् ।
कृच्छ्राश्मवाततृष्णास्रकुष्ठकण्डूज्वरापहा ॥१३०॥

प्रपौण्डरीकनामानि गुणाश्च—

प्रपौण्डरीकं पौण्ड्र्यं चक्षुष्यं पौण्डरीयकम् ।
पौण्ड्र्यं मधुरं तिक्तं कषायं शुक्रलं हिमम् ॥१३१॥
चक्षुष्यं मधुरं पाके वर्ण्यं पित्तकफप्रणुत् ।

+पुदिनामानि गुणाश्च—

व्यञ्जनो वान्तिहारी च रुचिष्यः शोकशोभनः १३२
व्यजनो वान्तिहारी च रोचनी शोकशोभना ।
पुदनस्तु गुरुः स्वादू रुच्यो हृद्यः सुखावहः ।१३३।
मलमूत्रस्तम्भकरः कफकासमदापहः ।
अग्निमान्द्यविषूचिघ्नः संग्रहण्यतिसारहा ॥१३४॥
जीर्णज्वरकृमींश्चैव नाशयेदिति कीर्तितम् ॥१३५॥

+सं०—व्यंजन, वान्तिहारी । हि०—पोदीना । बं०—म०—पुदिना । गु०—फोदिनो । इं०—टालरेडमेन्ट (Tallredment) । फा०—नोअना । अ०—हवा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गुडूच्यादिवर्गः ।

यदा लंकेश्वरो मानी रावणो राक्षसाधिपः ।
रामपत्नीं वनात्सीतां जहार मदनातुरः ॥१॥
ततस्तं बलवान् रामो रिपुं जायापहारिणम् ।
वृतो वानरसैन्येन जघान रणमूर्द्धनि ॥२॥
हते तस्मिन् सुरारातौ रावणे बलगर्विते ।
देवराजः सहस्राक्षः परितुष्टो हि राघवे ॥३॥
तत्र ये वानराः केचिद्राक्षसैर्निहता रणे ।
तानिन्द्रो जीवयामास संसिच्यामृतवृष्टिभिः ॥४॥
ततो येषु प्रदेशेषु कपिगात्रात्परिच्युताः ।
पीयूषबिन्दवः पेतुस्तेभ्यो जाता गुडूचिका ॥५॥

+गुडूचीनामानि गुणाश्च—

गुडूची मधुपर्णी स्यादमृतामृतवल्लरी ।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादिनीति च ॥६॥

+सं०—गुडूची, मधुपर्णी । हि०—गिलोय, गुरुच । बँ०—गुलंच । म०—गुलबेल । गु०—गलो । क०—अमरदवल्ली । तै०—तिप्पतिगा । ता०—सिन्दी । इं०—गुलांचा (Gulancha) । फा०—अ०—गिलोई । अस्या गुणानाह राजनिघण्टा—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जीवंती तंत्रिका सोमा सोमवल्ली च कुण्डली ।
चक्रलक्षणिका धारा विशल्या च रसायनी ॥७॥
चन्द्रहासा वयस्या च मण्डली देवनिर्मिता ।
गुडूची कटुका तिक्ता स्वादुपाका रसायनी ॥८॥
संग्राहिणी कषायोष्णा लघ्वी बल्याग्निदीपनी ।
दोषत्रयामतृड्दाहमेहकासाँश्च पाण्डुताम् ॥९॥
कामलाकुष्ठवातास्रज्वरकृमिवमीर्हरेत् ॥

+ ताम्बूलीनामानि गुणाश्च—

ताम्बूलवल्ली ताम्बूली नागिनी नागवल्लरी ॥१०॥

ज्ञेया गुडूची गुरुरुष्णवीर्या तिक्ता कषाया ज्वरनाशिनी च ।
दाहार्तितृष्णावमिरक्तवातप्रमेहपाण्डुभ्रमिहारिणी च ॥

+ सं०—ताम्बूल, नागवल्ली । हि०—पान । बँ०—पान । म०—नागवेल । म०—नागवेल । गु०—पानवेला । क०—नागरवल्ली । तै०—तामलपाकु । ता०—वेट्टिलीं । इं०—बीटलीफ् (Beatleaf) फा०—वर्गन्त बोल । अ०—पान । अस्य गुणानाह राजनिघण्टौ—

नागवल्ली कटुस्तीक्ष्णा तिक्ता पीनसवातजित् ।
कफकासहरा रुच्या दाहकृद्दीपनी परा ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

ताम्बूलं विशदं रुच्यं तीक्ष्णोष्णं तुवरं सरम् ।
बल्यं तिक्तं कटु क्षारं रक्तपित्तकरं लघु ॥११॥
बल्यं श्लेष्मास्यदौर्गन्ध्यमलवातश्रमापहम् ।

× बिल्वनामानि गुणाश्च—

बिल्वः शाण्डिल्यशैलूषो मालूरश्रीफलावपि ॥१२॥
गन्धगर्भः शलाटुश्च कण्टकी च सदाफलः ।
श्रीफलस्तुवरस्तिक्तो ग्राही रूक्षोऽग्निपित्तकृत् ॥
वातश्लेष्महरो बल्यो लघुरुष्णश्च पाचनः ।

× गंभारीनामानि गुणाश्च—

गंभारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ॥१४॥

× सं०--बिल्व, शाण्डिल्य, शैलूष । हि० -बँ०--म०--बेल । गु०--बिलोबिलु । क०--बेललु । तै०- मारेडी पंडु-बिल्व । हा०--बिल्वपाकाम । इं--बेङ्गालकिन्स (Bengal kins) । अस्य गुणानाह राजवल्लभे—

फलेषु परिपक्वेषु ये गुणाः समुदाहृताः ।
बिल्वादन्यत्र विज्ञेया बिल्वमामं गुणोत्तरम् ॥

× सं—गंभारी, भद्रपर्णी । हि० -कुम्भेर, खम्भारी । बँ०--गम्भारी । म०--शिवण गंभारी । गु०--शवन्य । क०--सीवनी । तै०—साल्लागुबुटी चेट्टु ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

काश्मरी कश्मरी हीरा काश्मर्यः पीतरोहिणी।
कृष्णवृन्ता मधुरसा महाकुसुमकापि च ॥१५॥
काश्मरी तुवरा तिक्ता वीर्योष्णा मधुरा गुरुः।
दीपनी पाचनी मेध्या मेदनी भ्रमशोथजित् ॥१६॥
दोषतृष्णामशूलार्शोविषदाहज्वरापहा ।
तत्फलं बृंहणं वृष्यं गुरु केश्यं रसायनम् ॥१७॥
वातपित्ततृषारक्तक्षयमूत्रविबन्धनुत् ।
स्वादु पाके हिमं स्निग्धंतुवराम्लंविशुद्धिकृत् ॥१८॥
हन्याद्दाहतृषावातरक्तपित्तक्षतक्षयान् ।

× पाटलानामानि गुणाश्च—

पाटली पाटला मोघा मधुदूती फलेरुहा ॥१९॥
कृष्णवृन्ता कुबेराक्षी काचस्थाल्यलिवल्लभा।
ताम्रपुष्पी च कथिता परा स्यात्पाटला सिता ॥२०॥
मुष्कको मोक्षको घण्टा पाटलिः काष्ठपाटला।
पाटला तुवरा तिक्तानुष्णा दोषत्रयापहा ॥२१॥

× सं०—पाटला, मोथा। हि०—पाढल, कठपाडर। बँ०—पारुल। म०—रक्तपाडल। गु०—राता फूलना। क०—हाडरी। तै०—कलाल। [illegible]

Urmila Kashyap Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

अरुचिश्वासशोथार्शश्छर्दिहिक्कातृषाहरी।
पुष्पं कषायं मधुरं हिमं हृद्यं कफास्रनुत् ॥२२॥
पित्तातिसारहृत्कण्ठ्यं फलं हिक्कास्रपित्तहृत्।

+अग्निमन्थनामानि गुणाश्च—

अग्निमन्थो जया सा स्यात् श्रीपर्णी गणकारिका २३।
जया जयन्ती तर्कारी नादेयी वैजयन्तिका।
अग्निमन्थः श्वयथुनुद्वीर्योष्णः कफवातहृत् ॥२०॥
पांडुनुत् कटुकस्तिक्तस्तुवरो मधुरोऽग्निदः।

×श्योनाकनामानि गुणाश्च—

श्योनाकः शोषणश्च स्यान्नटकट्वङ्गटुण्टुकाः ॥२५॥
मण्डूकपर्णपत्रोर्णशुकनाशकटुंनटाः।
दीर्घवृन्तोऽरलुश्चापि पृथुशिम्बः कटम्भरः ॥२६॥

+सं०—अग्निमन्थ, अरणी। हि०—अरणी। बँ०—मणिर। म०—धीरऐरण। म०—ऐरण, अरणी। क०—नरुबल। तै०—नेलिचेट्टु। अस्य गुणानाह शोंडलनिघण्टौ-

अग्निमन्थो गुरुस्तिक्तो वातशोफामजित्सरः।

×सं०—श्योनाक, शोषण। हि०—सोनापाठा, एरलु, टेंटु। बँ०—सोना पाता, सोनालु। म०—टेटु। गु०—अरलू। क०—शोणा। तै०—पेद्दामानु। ता०—पन।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

श्योनाको दीपनः पाके कटुकस्तुवरो हिमः ।
ग्राही तिक्तोऽनिलश्लेष्मपित्तकामामनाशनः ।२७।
टुण्टुकस्य फलं बालं रूक्षं वातकफापहम् ।
हृद्यं कषायं मधुरं रोचनं लघु दीपनम् ॥२८॥
गुल्मार्शःकृमिहृत्प्रौढं गुरुवातप्रकोपनम् ।

बृहत्पञ्चमूलनामानि गुणाश्च—

श्रीफलः सर्वतोभद्रा पाटला गणिकारिका ।
श्योनाकः पञ्चभिश्चैतैः पञ्चमूलं महन्मतम् ॥२९॥
पञ्चमूलं महत्तिक्तं कषायं कफवातनुत् ।
मधुरं श्वासकासघ्नमुष्णं लघ्वग्निदीपनम् ॥३०॥

+शालपर्णीनामानि गुणाश्च—

शालपर्णी स्थिरा सौम्या त्रिपर्णी पीवरी गुहा।
विदारिगन्धा दीर्घाङ्घ्रिर्दीर्घपत्रांशुमत्यपि ॥३१॥
शालपर्णी गुरुश्छर्दिज्वरश्वासातिसारजित् ।
शोषदोषत्रयहरी बृंहण्युक्ता रसायनी ॥३२॥

+सं०—शालपर्णी, त्रिपर्णी । हि०—सरिवन । बँ०—शालपानी । म०—सालवण । गु०—शालिपर्णी । क०—मुरुलबोने । तै०—शीयाकुपत्रा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तिक्ता विषहरी स्वादुः क्षतकासकृमिप्रणुत् ।

× पृश्निपर्णीनामानि गुणाश्च—

पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिपर्णिका ॥३३॥
क्रोष्टुविन्ना सिंहपुच्छी कलशी धावनी गुहा ।
पृश्निपर्णी त्रिदोषघ्नी वृष्योष्णा मधुरा सरा ॥३४॥
हन्ति दाहज्वरश्वासरक्तातीसारतृड्वमीः ।

❀ बृहतीनामानि गुणाश्च—

वार्ताकी क्षुद्रभण्टाकी महती बृहती कुली ॥३५॥
हिंगुली राष्ट्रिका सिंही महोटी दुष्प्रधर्षणी ।
बृहती ग्राहिणी हृद्या पाचनी कफवातहृत् ॥३६॥
कटुतिक्तास्यवैरस्यमलारोचकनाशिनी ।
उष्णा कुष्ठज्वरश्वासशूलकासाग्निमान्द्यजित् ॥३७॥

× सं०—पृश्निपर्णी, पृथक्पर्णी । हि०—पिठवन । बँ०—चाकुले, चाकुलिया । म०—पीठवण । गु०—पृष्टिपर्णी । क०—तोरेमोउ । तै०—क्वोलाकुपन्न ।

❀ सं०—बृहती, क्षुद्रभण्टाकी । हि०—कटाई, बरहंटा । बँ०—व्याकुड । म०—डोरली । गु०—उभीभोरंगणी । क०—हेरगुल्ल । तै०—पेद्दामुलंगा, ककुसायी ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

❀ कण्टकारीनामानि—

कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका ।
कण्टारिका कण्टकिनी धावनी बृहती तथा ॥३८॥
क्षुद्रायां क्षुद्रभण्टाक्यां बृहतीति निगद्यते ।

बृहतीभेदाः—

श्वेता क्षुद्रा चन्द्रहासा लक्ष्मणा क्षुद्रदूतिका ॥३९॥
गर्भदा चन्द्रमा चन्द्री चन्द्रपुष्पा प्रियंकरी ।
कण्टकारी सरा तिक्ता कटुका दीपनी लघुः ॥४०॥

गुणाः—

रूक्षोष्णा पाचनी कासश्वासज्वरकफानिलान् ।
निहन्ति पीनसं पार्श्वपीडाकृमिहृदामयान् ॥४१॥
तयोः फलं कटु रसे पाके च कटुकं भवेत् ।
शुक्रस्य रेचनं भेदि तिक्तं पित्ताग्निकृल्लघु ॥४२॥
हन्यात्कफमरुत्कण्डूकासमेदःकृमिज्वरान् ।
तद्वत्प्रोक्ता सिताक्षुद्रा विशेषाद्गर्भकारिणी ॥

❀ सं०—कण्टकारी, क्षुद्रा, व्याघ्री। हि०—कटेरी, भटकटैया। बँ०—कण्टकारी। म०—रिंगणी। गु०—वेठी भोरिंगणी। क०—नेल्लागुल्लु। तै०—रेवटी मुलंगा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀गोक्षुरनामानि गुणाश्च—

गोक्षुरः क्षुरकोऽपि स्यात्त्रिकण्टः स्वादुकण्टकः ।
गोकण्टको भक्षटंको वनशृङ्गाट इत्यपि ॥४४॥
पलंकषा श्वदंष्ट्रा च तथा स्यादिक्षुगन्धिका ।
गोक्षुरः शीतलः स्वादुर्बलकृद्वस्तिशोधनः ॥४५॥
मधुरो दीपनो वृष्यः पुष्टिदश्चाश्मरीहरः ।
प्रमेहश्वासकाशार्शःकृच्छ्रहृद्रोगवातनुत् ॥४६॥

लघुपञ्चमूलकं गुणाश्च—

शालपर्णी पृश्निपर्णी वार्ताकी कण्टकारिका ।
गोक्षुरः पञ्चभिश्चैतैः कनिष्ठं पञ्चमूलकम् ॥४७॥
पञ्चमूलं लघु स्वादु बल्यं पित्तानिलापहम् ।
नात्युष्णं बृंहणं ग्राहि वरश्वासाश्मरीप्रणुत् ॥४८॥

दशमूलनामानि गुणाश्च—

उभाभ्यां पञ्चमूलाभ्यां दशमूलमुदाहृतम् ।
दशमूलं त्रिदोषघ्नं श्वासकासशिरोरुजः ॥४९॥
तन्द्राशोथज्वरानाहपार्श्वपीडारुचीर्हरेत् ।

❀सं०—गोक्षुर, क्षुरक। हि०—गोखुरू। बं०—गोखरि। म०—सराटे। गु०—गोखरू। तै०—आलेरु। अस्य गुणनाह राजवल्लभे—गोक्षुरो मूत्रकृच्छ्रघ्नो बल्यो वृष्योऽनिलापहः।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

❀जीवन्तीनामानि गुणाश्च—

जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ॥५०॥
माङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ।
जीवन्ती शीतला स्वादुः स्निग्धा दोषत्रयापहा ॥
रसायनी बलकरी चक्षुष्या ग्राहिणी लघुः ।

+मुद्गपर्णीनामानि गुणाश्च—

मुद्गपर्णी काकपर्णी शूर्पपर्ण्यल्पिका सहा ॥५२॥
काकमुद्गा च सा प्रोक्ता तथा मार्जारगन्धिका ।
मुद्गपर्णी हिमा रूक्षा तिक्ता स्वाद्वी च शुक्रला ॥५३॥
चक्षुष्या क्षतशोथघ्नी ग्राहिणी ज्वरदाहनुत् ।
दोषत्रयहरी लघ्वी ग्रहण्यर्शोऽतिसारजित् ॥५४॥

❀ सं०—जीवन्ती, जीवनी, जीवा । हि०—ढोंडी (जीवन्ती) बँ०—जीवई । म०—जीवन्ती । गु०—राडारुडी । क०—हिरियाहलि ।

+ सं०—मुद्गपर्णी । हि०—मुगवन । बँ०—मुगानि । म०—वनमूग । गु०—अडवाड मगवेल्य । क०—कोहसरु । तै०—कारुपेसारा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

+माषपर्णीनामानि गुणाश्च—

माषपर्णी सूर्यपर्णी काम्बोजी हयपुच्छिका।
पाण्डुलोमशपर्णी च कृष्णवृन्ता महासहा ॥५५॥
माषपर्णी हिमा तिक्ता रूक्षा शुक्रबलासकृत्।
मधुरा ग्राहिणी शोथवातपित्तज्वरास्रजित् ॥५६॥

जीवनीयगणनामानि गुणाश्च—

अष्टवर्गः सयष्टीको जीवन्ती मुद्गपर्णिका।
माषपर्णीगणोऽयं तु जीवनीय इति स्मृतः ॥५७॥
जीवनो मधुरश्चापि नाम्ना स परिकीर्तितः।
जीवनीयगणः प्रोक्तः शुक्रकृद् बृंहणो हिमः ॥५८॥
गुरुर्गर्भप्रदः स्तन्यकफकृत्पित्तरक्तहृत्।
तृष्णां शोषं ज्वरं दाहं रक्तपित्तं व्यपोहति ॥५९॥

×शुक्लरक्तैरण्डनामानि गुणाश्च—

शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्वहस्तकः।

+सं०— माषपर्णी, सूर्यपर्णी, काम्बोजी। हि०—मखवन, बनउर्दी, जंगली उड़द। बं०—मासाणी। म०—रान उडीद। गु०—अडवाड, अउदबेल। क०—रानो डिंडुका उट्टु। तै०—कारुमीनुरु।

×सं०—एरण्ड, आमण्ड, चित्र। हि०—अरण्ड, रेंड,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

पञ्चांगुलो वर्धमानो दीर्घदण्डो व्यडम्बकः ॥६०
रक्तोऽपरोरुदूकः स्यादुरुबूको रुबुस्तथा ।
व्याघ्रपुच्छश्च वातारिश्चञ्चुरुत्तानपत्रकः ॥६१॥
एरण्डयुग्मं मधुरमुष्णं गुरु विनाशयेत् ।
शूलशोथकटीबस्तिशिरःपीडोदरज्वरान् ॥६२॥
ब्रध्नश्वासकफानाहकासकुष्ठाममारुतान् ।
एरण्डपत्रं वातघ्नं कफक्रिमिविनाशनम् ॥६३॥
मूत्रकृच्छ्रहरं चापि पित्तरक्तप्रकोपनम् ।
वातार्यग्रदलं गुल्मबस्तिशूलहरं परम् ॥६४॥
कफवातकृमीन् हन्ति वृद्धिं सप्तविधामपि ।
एरण्डफलमत्युष्णं गुल्मशूलानिलापहम् ॥६५॥
यकृत्प्लीहोदरार्शोघ्नं कटुकं दीपनं परम् ।
तद्वन्मज्जा च विड्भेदी वातश्लेष्मोदरापहा ॥६६॥

आकारकरभनामानि गुणाश्च—

आकारकरभश्चैव कल्लकोऽथ ह्यकल्लकः ।

एरण्ड । बं०—भेराण्डा । म०—एरंड, एरंडोली । गु०—धोलो एरण्डो, रातो एरण्डो । क०—एरंडु आडलके । तै०—आमुडामु, आमिद पुचेट्टु । इं०—कास्टर आयल प्लांट, कास्टरसीड । Caster oil Plant, Caster seed)। फा०—बेदंजीर । अ०—खिरवा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अकल्लकोष्णो वीर्य्येण बलकृत्कटुको मतः ॥६७॥
प्रतिश्यायं च शोथं च वातं चैव विनाशयेत् ।

× शुक्लरक्तार्कनामानि गुणाश्च—

श्वेतार्को गणरूपःस्यान्मन्दरो वसुकोऽपि च ॥६८॥
श्वेतपुष्पः सदापुष्पः स बालार्कः प्रतापसः ।
रक्ताऽपरोर्कनामा स्यादर्कपर्णो विकीरणः ॥६९॥
रक्तपुष्पः शुक्लफलस्तथा स्फोटः प्रकीर्तितः ।
अर्कद्वयं सरं वातकुष्ठकण्डुविषव्रणान् ॥७०॥
निहन्ति प्लीहगुल्मार्शःश्लेष्मोदरशकृत्क्रिमीन् ।
अलर्ककुसुमं वृष्यं लघुदीपनपाचनम् ॥७१॥

× सं०–श्वेतार्क, गणरूप, रक्तार्क, अर्कपर्ण। हि०–सफेद मदार, लालमदार। बं०–आकन्द, श्वेत आकन्द। म०—रुई, पाँढरी रुई। क०–पक्के, मंदार पक्के। तै०–नीलजिल्लेडे घोली, तेलाजिल्लीडे। गु०–आकडो, मोलो आकडो। इं०–जाइगेंटिक सालोवर्ट (Gigantic swallowwort)। फा०–खुर्क, दुधे। अ०–उषर। अस्य गुणानाह धन्वन्तरिनिघण्टौ—

अर्कः कृमिहरस्तीक्ष्णः सरोऽर्शकफनाशनः ।
तत्पुष्पं कृमिदोषघ्नं हन्ति शूलोदराणि च ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अरोचकप्रसेकार्शःकासश्वासनिवारणम् ॥७२॥

रक्तार्कपुष्पं मधुरं सतिक्तं—
कुष्ठक्रिमिघ्नं कफनाशनं च ।
अर्शोविषं हन्ति च रक्तपित्तं
संग्राहि गुल्मे श्वयथौ हितं तत् ।७३।

क्षीरमर्कस्य तिक्तोष्णं स्निग्धं सलवणं लघु ।
कुष्ठगुल्मोदरहरं श्रेष्ठमेतद्विरेचनम् ॥७४॥

× सेहुण्डनामानि गुणाश्च—

सेहुण्डः सिंहतुण्डः स्याद्वज्री वज्रद्रुमोऽपि च ।
सुधासमन्तदुग्धा च स्नुक स्त्रियां स्यात्स्नुही गुडा ॥
सेहुण्डो रेचनस्तीक्ष्णो दीपनः कटुको गुरुः ।
शूलामष्ठीलिकाध्मानकफगुल्मोदरानिलान् ॥७६॥
उन्मादमेहकुष्ठार्शःशोथमेदोऽश्मपाण्डुताः ।
व्रणशोथज्वरप्लीहविषदूषीविषं हरेत् ॥७७॥

× सं०--स्नुही, सेहुण्ड । हि०--थूहर, सेहुण्ड । बं०--मनसा गाछ । म०--निवडुंग । गु०--थोरदांडलियो । क०--निवडिंगु । तै०--चेंमुडु । इं०--मिल्क्स् हेज, प्रिक्लीपियर (Milks hedge, Prickly Pear) फा०--लादनाम । अ०--जकम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उष्णवीर्य्यं स्नुहीक्षीरं स्निग्धं च कटुकं लघु ।
गुल्मिनां कुष्ठिनां चापि तथैवोदररोगिणाम् ॥७८॥
हितमेतद्विरेकाथ ये चान्ये दीर्घरोगिणः ।

× सेहुण्डभेदशातलानामानि गुणाश्च—

शातला सप्तला सारविमला विदला च सा ॥७९॥
तथा निगदिता भूरिफेना कर्मकषेत्यपि ।
शातला कटुका पाके वातला शीतला लघुः ॥८०॥
तिक्ता शोथकफानाहपित्तोदावर्तरक्तजित् ।

+ कलिहारीनामानि गुणाश्च—

कलिहारी तु हलिनी लाङ्गलीशुक्लपुष्प्यपि ॥८१॥
विशल्याग्निशिखानन्ता वह्निवक्त्रा च गर्भजुत् ।
कलिहारी सरा कुष्ठशोफार्शोव्रणशूलजित् ॥८२॥
सक्षारा श्लेष्मजित्तिक्ता कटुका तुवरापि च ।
तीक्ष्णोष्णकृमिहृल्लघ्वी पित्तला गर्भपातिनी ॥८३॥

× सं०—शातला । हि०—सातला । बँ०—सिजविशेष । म०—निवगुण्डाचा भेद । गु०—साथेर । क०—वडील सोतुली । फा०—एशन । अ०—सात्तर ।

+ सं०—कलिहारी, हलिनी । हि०—करियारी, कलियारी । बँ०—विषलांगली । म०—खड्यानाग । गु०—दुधियो, बछनाग । क०—[illegible] । ई०—[illegible], वेत्रा (wolfs bane) ।

Dr. Shyama Prasad Mukherji Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

× श्वेतरक्तकरवीरनामानि गुणाश्च—

करवीरः श्वेतपुष्पः शतकुम्भोऽश्वमारकः ।
द्वितीयो रक्तपुष्पश्च चण्डान्तः सगुडस्तथा ॥८४॥
करवीरद्वयं तिक्तं कषायं कटुकं च तत् ।
व्रणलाघवकृन्नेत्रकोपकुष्ठव्रणापहम् ॥८५॥
वीर्योष्णं कृमिकण्डुघ्नं भक्षितं विषवन्मतम् ।

× धत्तूरनामानि गुणाश्च—

धत्तूरधूर्तधुस्तूरा उन्मत्तः कनकाह्वयः ॥८६॥
देवताकितवस्तूरी महामोही शिवप्रियः ।
मातुलो मदनश्चास्य फले मातुलपुत्रकः ॥८७॥
धत्तूरो मदवर्णाग्निवातकृज्ज्वरकुष्ठनुत् ।
कषायो मधुरस्तिक्तो यूकालिक्षाविनाशनः ॥८८॥
उष्णो गुरुव्रणश्लेष्मकण्डूकृमिविषापहः ।

× सं०– करवीर, श्वेतपुष्प । हि०–कनेर, लाल या सफेद कनेर । बं०–करवी, लाल करवी । म०–कणेर, पांढरी, तांबदी । गु०–धोलाँ फुलनी, राता फुलनी कणेर । क०–बाकण लिंगे, केगणलिंगे । तै०–कानेर चेट्टु । इं०–स्वीट् सेण्टेड (Sweet sented) फा०–खरजेहरा । अ०–सुमुल, हिमारदकली ।

× सं०–धत्तूर, मदन, उन्मत्त । हि०–धतूरा । बं०–

Digitized by Siddhanta eGangotri Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

× वासकनामानि गुणाश्च—

वासको वासिका वासा भिषङ्माता च सिंहिका ॥
सिंहास्यो वाजिदन्तः स्यादाटरूषक इत्यपि ।
अटरूषो वृषनामा सिंहपर्णश्च सः स्मृतः ॥९०॥
वासको वातकृत्स्वर्यः कफपित्तास्रनाशनः ।
तिक्तस्तुवरको हृद्यो लघुः शीतस्तृडर्तिहृत् ॥९१॥
श्वासकासज्वरच्छर्दिमेहकुष्ठक्षयापहः ।

× पर्पटनामानि गुणाश्च—

पर्पटो वरतिक्तश्च स्मृतः पर्पटकश्च सः ॥९२॥
कथितः पांशुपर्यायः तथा कवचनामकः ।
पर्पटो हन्ति पित्तास्रभ्रमतृष्णाकफज्वरान् ॥९३॥

धतुरा । म०—धोत्रा, धोतरा । गु०—धतूरो । क०—मदकणिके । तै०—नाल्लाउम्मीते । ता०—उमततताई । इं०—थोर्न एपेल स्ट्रामोनियम (Thorn appele stramonium) अ०—जोजनसी तातूरा ।

× सं०—वासक, आटरूष । हि०—वासा, अडूसा, विसोंटा । बँ०—वासक । म०—अडुलसा । गु०—अरडुसो । क०—आडसोगे । तै०—आडासारं । ता०-अधोडोडे ।

× सं०—पर्पट, वरतिक्त । हि०—पित्तपापड़ा, दवन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संग्राही शीतलस्तिक्तो दाहनुद्वातलो लघुः ।

× निम्बनामानि गुणाश्च—

निम्बःस्यात्पिचुमर्दश्च पिचुमन्दश्च तिक्तकः ॥९४॥
अरिष्टः पारिभद्रश्च हिंगुनिर्यास इत्यपि ।
निम्बःशीतो लघुर्ग्राहीकटुपाकोऽग्निवातनुत् ॥९५॥
अहृद्यः श्रमतृट्कासज्वरारुचिकृमिप्रणुत् ।
व्रणपित्तकफच्छर्दिकुष्ठहृल्लासमेहनुत् ॥९६॥
निम्बपत्रं स्मृतं नेत्र्यं कृमिपित्तविषप्रणुत् ।
वातलं कटुपाकं च सर्वारोचककुष्ठनुत् ॥९७॥
नैम्बं फलं रसे तिक्तं पाके तु कटु भेदनम् ।
स्निग्धं लघूष्णं कुष्ठघ्नं गुल्मार्शःकृमिमेहनुत् ॥९८॥

पापड़ा । बँ०—चेत् पापड़ा । म०—सिरपठी, पित्तपापड़ा । गु०—पीत पापडो । क०—पर्पाटक । तै०—पार्पाटकमु । इँ०—जस्टिसि प्राकेरावेन्स (Justici Pracarabans) फा०—शातरा । अ०—बकलतलमलीक ।

× सं०—निम्ब । हि०—नीम । बँ०—निमगाछ । म०—कडूनिंब । गु०—लिंबड़ी । क०—वेड वेबु । तै०—वेय, टोयचेट्टु । ता०—वेपुम्भरम् । इँ०—निंबट्री (Nimbtree) फा०—तेतवनीम, दरख्त हक ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

+ महानिम्बनामानि गुणाश्च—

महानिम्बः स्मृतोद्रेको रम्यको विषमुष्टिकः।
केशमुष्टिर्निम्बकश्च कार्मुको जीव इत्यपि ॥९९॥
महानिम्बो हिमो रुक्षस्तिक्तो ग्राही कषायकः।
कफपित्तभ्रमच्छर्दिकुष्ठहृल्लासरक्तजित् ॥१००॥
प्रमेहश्वासगुल्मार्शोमूषिकाविषनाशनः ।

❀ पारिभद्रनामानि गुणाश्च—

पारिभद्रो निम्बतरुर्मन्दारः पारिजातकः ॥१०१॥
परिभद्रोऽनिलश्लेष्मशोथमेदःकृमिप्रणुत् ।
तत्पुष्पं पित्तरोगघ्नं कर्णव्याधिविनाशनम् ॥१०२॥

× काञ्चनारकोविदारनामानि गुणाश्च—

काञ्चनारः कांचनको गण्डारिः शोणपुष्पकः।

+ सं०—महानिम्ब । हि०—बकायन । बँ०—बोडा निम । म०—बकाणी निम्ब । गु०—बकान्य । क०—महाबेड । तै०—वेदया । ता०—मालाइवेतुवा वेप्पम् । फा०—आजाद दरख्त । अ०—वान हबुल ।

❀ सं०—पारिभद्र । हि०—फरहद । बँ०—पालते मान्दार । म०—पानरो । गु०—पडिरवो । क०—हरिबाल । तै०—मुल्लमोति चेट्टु मोट्टु गु । ता०—मुराक ।

× सं०—कांचनार, कोविदार । हि०—कचनार । बँ०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कोविदारश्चमरिकः कुद्दालो युगपत्रकः ॥१०३॥
कुण्डली ताम्रपुष्पश्चाश्मन्तकः स्वल्पकेसरी ।
कांचनारो हिमो ग्राही तुवरःश्लेष्मपित्तहृत् ॥१०४॥
कृमिकुष्ठगुदभ्रंशगण्डमालाव्रणापहः ।
कोविदारोऽपि तद्वत्स्यात्तयोः पुष्पं लघु स्मृतम् ॥
रूक्षं संग्राहि पित्तास्रप्रदरक्षयकासनुत् ।

× श्याम-श्वेत-रक्त-शिग्रुनामानि गुणाश्च—

शोभाञ्जनः शिग्रु तीक्ष्णगन्धकोऽक्षीवमोचकाः १०६
तद्बीजं श्वेतमरिचं मधुशिग्रुस्तु लोहितः ।
शिग्रुः सरः कटुः पाके तीक्ष्णोष्णो मधुरो लघुः ॥

कांचन । म०—कोरल । गु०—चम्पाकाटी । क०—कोचाले कचनार । तै०—देवकांचन । अस्य गुणाः—

कांचन्युक्ता शीर्षरुजं त्रिदोषं च विनाशयेत् ।
स्तन्यस्य वर्द्धनकरी ऋषिभिः सूक्ष्मदर्शिभिः ॥

× सं०—शोभाञ्जन, शिग्रु । हि०—सहिंजन । बँ०—सजिने । म०—शोगट, शेवगा । गु०—शरघषो । क०—विलियतुग्गि । तै०—मुलंगा । ता०—मोरंग । इँ०—हॉर्सरेडिश ट्री (Horse Redish Tree) ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

दीपनो रोपनो रूक्षः क्षारतिक्तो विदाहकृत् ।
संग्राही शुक्रलो हृद्यः पित्तरक्तप्रकोपनः ॥१०८॥
चक्षुष्यः कफवातघ्नो विद्रधिश्वयथुक्रिमीन् ।
मेदोऽपचीविषप्लीहगुल्मगण्डव्रणान् हरेत् ॥१०९॥
श्वेतः प्रोक्तगुणो ज्ञेयो विशेषाद्दीपनः सरः ।
प्लीहानं विद्रधिं हन्ति व्रणघ्नः पित्तरक्तकृत् ॥११०॥
मधुशिग्रुः प्रोक्तगुणो विशेषाद्दीपनः सरः ।
शिग्रुवल्कलपत्राणां स्वरसः परमार्तिहृत् ॥१११॥
चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनम् ।
अवृष्यं कफवातघ्नं तन्नस्येन शिरोर्तिहृत् ॥११२॥

❀ श्वेतनीलपुष्पापराजितानामानि गुणाश्च—

आस्फेता गिरिकर्णी स्याद्विष्णुक्रान्तापराजिता ।
अपराजिते कटू मेध्ये शीते कण्ठ्ये सुदृष्टिदे ॥११३॥
कुष्ठमूत्रत्रिदोषामशोथव्रणविषापहे ॥११४॥

† सिन्दुवारनामानि गुणाश्च—

सिन्दुवारः श्वेतपुष्पः सिन्दुकः सिन्दुवारकः ।

❀ सं०—अपराजिता । हि०—कोयल, नीली कोयल । अपराजिता । म०—गोकर्णी, काली पांढरी । गु०—गरणी । क०—विलीयगिरिकर्णिके । ते०—नीलगंटुना ।

† सं०—सिन्दुवार । हि०—सम्हालू, निर्गुण्डी, मेउड़ी ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

नीलपुष्पी तु निर्गुण्डी शेफाली सुवहा च सा।११५।
सिंदुकः स्मृतिदस्तिक्तः कषायः कटुको लघुः।
केश्यो नेत्रहितो हन्ति शूलशोथाममारुतान्॥११६॥
कृमिकुष्ठारुचिश्लेष्मव्रणान्नीला हि तद्विधा।
सिन्दुवारदलं जन्तुवातश्लेष्महरं लघु ॥११७॥

† कुटजनामानि गुणाश्च—

कुटजः कुटिजः कौटो वत्सको गिरिमल्लिका।
कालिङ्गश्चक्रशाखी च मल्लिकापुष्प इत्यपि॥११८॥
इन्द्रयवफलः प्रोक्तो वृष्यकः पाण्डुरद्रुमः।
कुटजः कटुको रूक्षो दीपनस्तुवरो हिमः॥११९॥
अर्शोतिसारपित्तास्रकफतृष्णामकुष्ठजित्।

बं०—निशिन्दा। म०—निर्गुण्डी। गु०—नागड्य, नागड्यनावी। क०—करियल्लकिमेउड़ी विलीयलोके। ता०—नोक्चि। तै०-तेलवाविली। इं०-फाईवलीव्ड चेष्ट ट्री (Five-leaved chast tree) फा०—परंगुष्ठ। अ०--असलुक।

† सं०—कुटज। हि०—कोरैया। बं०—कुडचि। म०--कडो। क०--कोडसिगेयमहनु। तै०—अंकेलुचंगलकुष्ठ। ता०—बेप्पालें। इं०—ओवल लीव्ड रोज़बे (Ovel leaved Rose bay) अ०—तिवाज।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

❀ करंजनामानि गुणाश्च—

करञ्जो नक्तमालश्च करजश्चिरबिल्वकः ॥१२०॥
घृतपूर्णः करञ्जोऽन्यः प्रकीर्यः पूतिकोऽपि च।
स चोक्तः पूतिकारञ्जः सोमबल्कश्च स स्मृतः।१२१।
करञ्जः कटुकस्तीक्ष्णो वीर्योष्णो योनिदोषहृत्।
कुष्ठोदावर्तगुल्मार्शोव्रणक्रिमिकफापहः ॥१२२॥
यत्पत्रं कफवातार्शःकृमिशोथहरं परम्।
भेदनं कटुकं पाके वीर्योष्णं पित्तलं लघु ॥१२३॥
तत्फलं कफवातघ्नं मेहार्शःकृमिकुष्ठजित्।
घृतपूर्णकरञ्जोऽपि करञ्जसदृशो गुणैः ॥१२४॥

तृतीयकरञ्जनामानि गुणाश्च—

उदकीर्यस्तृतीयोऽन्यः षड्ग्रंथो हस्तिवारुणी।
कर्कटी वायसी चापि करञ्जा करभञ्जिका ॥१२५॥
करञ्जी स्तम्भनी तिक्ता तुवरा कटुपाकिनी।
वर्योष्णा वमिपित्तार्शःकृमिकुष्ठप्रमेहजित् ॥१२६॥

❀ सं—करंज। हि०—कंजा, करंज। म०—गु०—करञ्ज। क०—नापसीयमरनु। ते०—कानुगचेट्टु। ता०—पुङ्गानारम्। इं०—स्मूथलीव्ड पोनगेमिया (Smooth Leaved Pongamia)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ श्वेतरक्तगुञ्जानामानि गुणाश्च—

श्वेता गुञ्जोच्चटा प्रोक्ता कृष्णला चापि सा स्मृता।
रक्ता सा काकचिञ्ची स्यात्काकणन्ती च रक्तिका॥
काकादनी काकपीलुः सा स्मृताङ्गारवल्लरी।
गुञ्जाद्वयं तु केश्यं स्याद्वातपित्तज्वरापहम्॥१२८॥
मुखशोषभ्रमश्वासतृष्णामदविनाशिनी।
नेत्रामयहरं वृष्यं बल्यं कण्डुव्रणापहम्॥१२९॥
कृमीन्प्रलुप्तकुष्ठानि रक्तबद्धबलापि च।

† कपिकच्छुनामानि गुणाश्च—

कपिकच्छूरात्मगुप्ता रिष्यप्रोक्ता च मर्कटी।१३०॥
अजहा कण्डुराव्यण्डा दुःस्पर्शा प्रावृषायणी।
लाङ्गूली शूकशिम्बी च सैव प्रोक्ता महर्षिभिः १३१।

❀ सं०- गुञ्जा, कृष्णला। हि०- घुँघुची, रत्ती। बँ०-- कुंच, सादाकुंच। म०--गुञ्जा। गु०--चणोठी राती। क०-- गुलगुंजे। तै०--चुविदे। ता०--करनि। इं०-बीड ट्री (Bead tree)। फा०-चश्मेखरूस। अ० हबसुर्ख, हब सुफेद।

† सं०—कपिकच्छु, आत्मगुप्ता। हि०—केंवाच, कौंच। बँ०—शुयाशिम्बी। म०—कुहिलींचेबीज। गु०-- कउँचो, नसुगुन्नी। तै०—पिल्लिअडुगु। ता०—पुनाइक, कालि। इं०—कौहेज (Chewhege)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

कपिकच्छुर्भृशं वृष्या मधुरा बृंहणी गुरुः ।
तिक्ता वातहरी बल्या कफपित्तास्रनाशिनी ।१३२।
तद्बीजं वातशमनं स्मृतं वाजीकरं परम् ।
मांसरोहिण्यतिविषा वृत्ता चर्मकषा कृषा ॥१३३॥

❀ रोहिणीनामानि गुणाश्च—

प्रहारवल्ली विकसा वीरवत्यपि कथ्यते ।
स्यान्मांसरोहिणी वृष्या सरा दोषत्रयापहा।१३४॥

चिल्लकगुणाश्च—

चिल्लको वातनिर्हारी श्लेष्मघ्नो धातुपुष्टिकृत् ।
आग्नेयो विषवैद्यस्य फलं मत्स्यनिषूदनम् ॥१३५॥

टंकारोलक्षणं गुणाश्च—

टङ्कारी वातजित्तिक्ता श्लेष्मघ्नी दीपनी लघुः ।
शोथोदरव्यथाहन्त्री हिता पीठविसर्पिणाम् ।१३६।

❀ सं०—रोहिणी । हि०—मांसरोहिणी । म०—क०—मांसरोहिणी । गु०—रोण्य । इं०—रेडवुड ट्री (Red wood tree) अस्या गुणानाह निघण्टुरहस्ये—

मांसरोहिणिका व्रण्या चोष्णा च रक्तपित्तजित् ।
सर्वो संग्रहणीं हन्ति नात्र कार्या विचारणा ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

† वेतसनामानि गुणाश्च—

वेतसो नम्रकः प्रोक्तो वानीरो वंजुलस्तथा।
अम्रपुष्पश्च विदलो रथः शीतश्च कीर्तितः ॥१३७॥
वेतसः शीतलो दाहशोथार्शोयोनिरुक्प्रणुत्।
हन्ति वीसर्पकृच्छ्रास्रपित्ताश्मरिकफानिलान् १३८

जलवेतसनामानि गुणाश्च—

नकुश्चकः परीव्याधो नादेयी जलवेतसः।
जलजो वेतसः शीतः संग्राही वातकोपनः ॥१३९॥

इज्जलनामानि गुणाश्च—

इज्जलो हिज्जलश्चापि निचुलश्चाम्बुजस्तथा।
जलवेतसवद्वेद्यो हिज्जलोऽयं विषापहः ॥१४०॥

❀ अङ्कोटनामानि गुणाश्च—

अङ्कोटो दीर्घकीलः स्यादङ्कोलश्च निकोचकः।

---

† सं०--वेतस, नम्रक। हि०-बेंत। बं०--वेत वायसा। म०—बेत, थोरवेत। गु०- नेतर। क०—वेडिमु। तै०—पौयारुवा। इं०-केन (Cane) फा०-बेत। अ०-खलाफ।

❀ सं०—अंकोट, निकोचक। हि०—ढेरा, टेरा। बं०—आँकड़। म०—अंकोली वृक्ष। गु०—अंकोल्य। क०—अंकुले। तै०—उडीक।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्कोटकः कटुस्तीक्ष्णः स्निग्धोष्णस्तुवरो लघु ।१४१।
रेचनः कृमिशूलामशोफग्रहविषापहः ।
विसर्पकफपित्तास्रमूषिकाहिविषापहः ॥१४२॥
तत्फलं शीतलं स्वादु श्लेष्मघ्नं बृंहणं गुरु ।
बल्यं विरेचनं वातपित्तदाहक्षयास्रजित् ॥१४३॥
❀ बला-महाबला-अतिबला-नागबलानामानिगुणाश्च
बला वाट्यालिका वाट्या सैव वाट्यालकापि च ।
महाबला पीतपुष्पा सहदेवी च सा स्मृता ॥१४४॥
ततोऽन्यातिबला रिष्यप्रोक्ता कङ्कतिका सहा ।
गाङ्गेरुकी नागबला भृषा ह्रस्वा गवेधुका ॥१४५॥
बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत् ।
स्निग्धं ग्राहि समीरास्रपित्तास्रक्षतनाशनम्।१४६।

❀ सं०-बला । हि०-बरियारा । बँ०-बेडेला । म०—लघुचिकणा । गु०—बलदाणा । क०—वेणेगरग । तै०—मुरपिडी । इँ०-हार्नबीम लीव्ड सिडा(Hornbeam leaved sida) हॉर्ट लीव्ड सिडा (Hort leaved sida) महाबलानामानि यथा-सं०-महाबला । हि०—सहदेई । बँ०—पीतपुष्पा । म०-भार्बुडी । गु०—सहदेवी । ता०—नेचिटी । म०—पिरिवा । क०-बेल्लदुरुवे । अतिबलानामानि यथा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

लक्ष्मणानामानि गुणाश्च—

पुत्रकारकरक्ताल्पबिन्दुभिर्लाञ्छिता सदा ।
लक्ष्मणा पुत्रजननी बस्तगन्धाकृतिर्भवेत् ॥१४७॥
कथिता पुत्रदा वंश्या लक्ष्मणा मुनिपुङ्गवैः ।

† स्वर्णवल्लीनामानि गुणाश्च—

स्वर्णवल्ली रक्तफला काकायुः काकवल्लरी॥१४८॥
स्वर्णवल्ली शिरःपीडां त्रिदोषं हन्ति दुग्धदा ।

× कार्पासीनामानि गुणाश्च—

कार्पासी तुण्डकेशी च समुद्रान्ता च कथ्यते ।१४९।
कार्पासको लघुः कोष्णो मधुरो वातनाशनः ।
तत्पलाशं समीरघ्नं रक्तकृन्मूत्रवर्द्धनम् ॥१५०॥

सं०—अतिबला । हि०—कँगही, कंघी । म०—विकंकती । गु०—खपाट्य । क०—मुलुदुरुवे । इंडियन मेलो (Indian malow) नागबलानामानि यथा—सं०—नागबला । गगरेन, गुलसकरी । बँ०—गोरच चाकुले । म०—गांगेटी । क०—बट्टगरुके ।

† सं०-स्वर्णवल्ली । हि०-सोनवेल । बँ०-स्वर्णवल्ली ।

× सं०-कार्पासी । हि०-कपास, बेनीर । बँ०-कार्पास ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

तत्कर्णपिंडकानादपूयास्रावविनाशनम् ।
तद्बीजं स्तन्यदं वृष्यं स्निग्धं कफकरं गुरु ॥१५१॥

❀ वंशनामानि गुणाश्च—

वंशस्त्वक्सारकर्मारत्वचिसारतृणध्वजाः ।
शतपर्वा यवफलो वेणुमस्करतेजनाः ॥१५२॥
वंशः सरो हिमः स्वादुः कषायो वस्तिशोधनः।
छेदनः कफपित्तघ्नः कुष्ठास्रव्रणशोथजित् ।१५३।
तत्करीरः कटुः पाके रसे रूक्षो गुरुः सरः ।
कषायः कफकृत्स्वादुर्विदाही वातपित्तलः॥१५४॥
तद्यवास्तु सरा रूक्षा कषायाः कटुपाकिनः ।
वातपित्तकरा उष्णा बद्धमूत्राः कफापहाः॥१५५॥

× नलनामानि गुणाश्च—

नलः पोटगलः शून्यमध्यश्च धमनस्तथा ।

म०-कापशी। क०-हत्ति, काडहत्ति। तै०—पत्तिवेट्ट। इं०-काटनप्लांट(Cotton plant)फा०-कुतुन। अ०-कुतुन।

❀ सं०—वंश। हि०-बाँस। बँ०-बाँश। म०-वेळू। गु०-बाँश। क०-यरडु विदीरु। तै०-कचिकई यबुरु। ता०-मनगिल। इं०--बम्बूकेन (Bamboocane) फा० कसब।

× सं०-नल। हि०-नरसल, नरकट। बँ०-नल, बडनल।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain, Digitization by eGangotri

नलस्तु मधुरस्तिक्तः कषायः कफरक्तजित् ।१५६।

❀ मुञ्जनामानि गुणाश्च—

भद्रमुञ्जः शरो बाणस्तेजनश्चेक्षुमण्डनः ।
मुञ्जो मुञ्जातको बाणः स्थूलदर्भः सुमेखलः ।१५७।
मुञ्जद्वयं तु मधुरं तुवरं शिशिरं तथा ।
दाहतृष्णाविसर्पास्रमूत्रकृच्छ्राक्षिरोगहृत् ॥१५८॥
दोषत्रयहरं वृष्यं मेखलासूपयुज्यते ।

× कासनामानि गुणाश्च—

कासः कासेक्षुरुद्दिष्टः स स्यादिक्षुरकस्तथा॥१५९॥
इक्ष्वालिकेक्षुगन्धा च तथा पोटगलः स्मृतः ।
कासः स्यान्मधुरस्तिक्तः स्वादुपाको हिमः सरः१६०
मूत्रकृच्छ्राश्मदाहास्रक्षतपित्ताक्षिरोगजित् ।

म०-नल, देवनल । गु०-नाली । क०—देवनाल । तै०—भुंगुरुण्डु । इं०-इंडियन टोबेको (Indian Tobaco)

❀ सं०-मुञ्ज । हि०-रामसर, मूँज । म०-मोल । बँ०-मुज, रामशर, सरपत । तै०—मुंजगड्डि, अनिस्फुलिंग ।

× सं०—कास । हि०-कांस । बँ०-केशे घास । ग०-कसई । गु०—कांसडो । क०-किरीय कागड्डु । तै०-रेल्लु ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

❀ गुन्द्रनामानि गुणाश्च—

गुन्द्रः पेटरको गुत्थः शृङ्गवेराभमूलकः ॥१६१॥
गुन्द्रः कषायो मधुरः शिशिरः पित्तरक्तजित् ।
स्तन्यः शुक्ररजोमूत्रशोधनो मूत्रकृच्छ्रहृत् ॥१६२॥

÷ एरकानामानि गुणाश्च—

एरका गन्द्रमूला च शिवगुन्द्रा शरीति च ।
एरका शिशिरा वृष्या चक्षुष्या वातकोपिनी ।१६३।
मूत्रकृच्छ्राश्मरीदाहपित्तशोणितनाशिनी ।

१-कुशनामानि गुणाश्च—

कुशो दर्भस्तथा बर्हिः सूच्यग्रो यज्ञभूषणः ॥१६४॥
ततोऽन्यो दीर्घपत्रः स्यात्क्षुरपत्रस्तथैव च ।
दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं हिमम् ॥१६५॥

❀ सं०—गुन्द्र, गुत्थ । हि०—गोंद पटेर । म०—पाणगवत । गु०—पान्यथडाडी । इं०—एलिफैंट ग्रास (Elephant grass)

÷ सं०—एरका, शिवगुन्द्रा । हि०—मेथी । बँ०—म०—एरका । गु०—एरका ।

१-सं०—कुश, दर्भ । हि०—कुशा, डाभ । बँ०—कुश । म०—लघुदर्भ, थोरदर्भ । गु०—दरभ, डाभ । क०—बिलीयबुदकुशि । तै०—कुशादुर्वालु ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मूत्रकृच्छ्राश्मरीतृष्णाबस्तिरुक्प्रदरास्रजित् ।

❀ कत्तृणनामानि गुणाश्च—

कत्तृणं रोहिषं देवजग्धं सौगन्धिकं तथा ॥१६६॥
भूतीकं ध्याम पौरं च श्यामकं धूपगन्धिकम् ।
रोहिषं तुवरं तिक्तं कटुपाकं व्यपोहति ॥१६७॥
हृत्कण्डुव्याधिपित्तास्रशूलकासकफज्वरान् ।

१--भूतृणनामानि गुणाश्च—

भूतीकं गुह्यबीजं च सुगन्धं गोमयप्रियम् ॥१६८॥
भूतृणं तु भवेच्छत्रा मालातृणकमित्यपि ।
भूतृणं कटुकं तिक्तं तीक्ष्णोष्णं रेचनं लघु ॥१६९॥
विदाहि दीपनं रूक्षमनेत्र्यं मुखशोधनम् ।
अवृष्यं बहुविट्कं च पित्तरक्तप्रदूषणम् ॥१७०॥

२-नीलदूर्वानामानि गुणाश्च—

नीलदूर्वारुहानन्ता भार्गवी शतपर्विका ।

❀सं०-कत्तृण, रोहिषतृण। हि०-रसघास, गंधेजघास। बँ०-रामकर्पूर। म०—रोहिष। क०-किरुगंजणी। तै०-कामंचिगड्डि। फा०—खवाल मामून। अ०—अजसवर।

१--सं०—भूतृण। हि०—भूतृण। गु०—भूत्रण। क०—परिमलद गंजीणम्।

२-सं०-दूर्वा, नीलदूर्वा। हि०-दूब, हरी दूब। बँ०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शष्पा सहस्रवीर्य्या च शतवल्ली च कीर्तिता ।१७१।
नीलदूर्वा हिमा तिक्ता मधुरा तुवरा हरेत् ।
कफपित्तास्रवीसर्पतृष्णादाहत्वगामयान् ॥१७२॥

+ श्वेतदूर्वानामानि गुणाश्च—

दूर्वा शुक्ला तु गोलोमी शतवीर्य्या च कथ्यते ।
श्वेतदूर्वा कषायास्यात्स्वाद्वी व्रण्या च दीपनी ।१७३।
तिक्ता हिमा विसर्पास्रतृट्पित्तकफदाहहृत् ।

× गण्डदूर्वानामानि गुणाश्च—

गण्डदूर्वा तु गण्डीरी मत्स्याक्षी शकुलादनी ।१७४।
गण्डदूर्वा हिमा लोहद्रावणी ग्राहिणी लघुः ।
तिक्ता कषाया मधुरा वातकृत्कटुपाकिनी ॥१७५॥
दाहतृष्णाबलासास्रकुष्ठपित्तज्वरापहा ।

+ विदारीकन्द-वाराहीकन्दनामानि गुणाश्च—

वाराहीकन्द एवान्यश्चर्मकारालुको मतः ॥१७६॥

दूर्वा, नीलदूर्वा । म०—दूर्वा, गण्डूरदूर्वा । गु०—ध्रो, लीली ध्रो । क०—हसुगरुके । तै०—दूर्वालु । ता०—अरुगम् पुल्लु । इं०—क्रीपिंग साइनोडन् (Creeping cynodon)

+ सं०—विदारीकन्द । हि०—बिलैयाकन्द । बँ०—भुइँ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनूपे स भवेद्देशे वाराह इव लोमवान् ।
विदारी स्वादुकन्दा च सा तु क्रोष्ट्री सिता मता १७७
इक्षुगन्धा क्षीरवल्ली क्षीरशुक्ला पयस्विनी ।
वाराही वरदा वृष्टिर्वदरेत्यभिधीयते ॥१७८॥
विदारी मधुरा स्निग्धा बृंहणी स्तन्यशुक्रदा ।
शीता स्वर्य्या मूत्रला च जीवनी बलवर्णदा ।१७९।
गुरुः पित्तास्रपवनदाहान् हन्ति रसायनी ।

÷ मुशलीनामानि गुणाश्च—

तालमूली तु विद्वद्भिर्मुशली परिकीर्तिता ॥१८०॥
मुशली मधुरा वृष्या वीर्योष्णा बृंहणी गुरुः ।
तिक्ता रसायनी हन्ति गुदजान्यनिलं तथा ।१८१।

× शतावरीनामानि गुणाश्च—

शतावरी बहुसुता भीरुरिन्दीवरी वरी ।

कुमडा । म०—भूईकोहला । गु०—फगवेलानो कन्द । क०—नेलकुंबल । तै०—नेलगुम्बुडु ।

÷ सं०—तालमूली, मुशली । हि०—काली मुसली, सफेद मुसली । बँ०—तालमूली । म०—काली मुसली, पाँढरी मुसली । गु०—काली मुसली, धोली मुसली । क०—नेलताड़ी । तै०—नियलताड़ी गड्डलु, नेलतारु ।

× सं०—शतावरी-महाशतावरी । हि०—सतावर, बड़ी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

नारायणी शतपदी शतवीर्या च पीवरी ॥१८२॥
महाशतावरी चान्या शतमूल्यूर्ध्वकण्टिका ।
सहस्रवीर्या हेतुश्च रिष्यप्रोक्ता महोदरी ॥१८३॥
शतावरी गुरुः शीता तिक्ता स्वाद्वी रसायनी ।
मेधाग्निपुष्टिदा स्निग्धा नेत्र्या गुल्मातिसारजित् १८४
शुक्रस्तन्यकरी बल्या वातपित्तास्रशोथजित् ।
महाशतावरी मेध्या हृद्या वृष्या रसायनी ॥१८५।
शीतवीर्या निहन्त्यर्शोग्रहणीनयनामयान् ।

अंकुरगुणाः—

तदङ्कुरस्त्रिदोषघ्नो लघुरर्शःक्षयापहः ॥१८६॥

+अश्वगन्धानामानि गुणाश्च—

गन्धान्ता वाजिनामादिरश्वगन्धा हयाह्वया ।

सतावर। बं०—शतमूली। म०—लघुशतावरी, आसवली। गु०—एकलकण्टो, शायनाशुआ। क०—करियआसडी एरडु आसडी। तै०—एदुमट्टी टेङ्गा चल्ल, चाल्ल गड्डलु। इं०—एस्पेरेग्स रेसिमोस (Asparags Recemouse) फा०—गुर्जदस्ति। अ०—शकाकुल मिश्री।

+ सं०—अश्वगन्धा। हि०—असगन्ध। बं०—अश्वगंधा। म०—आसकन्द। गु०—आसखंद। क०- आसादु।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाराहकर्णी वरदा बलदे कुष्ठगन्धिनी ॥१८७॥
अश्वगन्धानिलम्लेष्मश्वित्रशोथक्षयापहा ।
बल्या रसायनी तिक्ता कषायोष्णातिशुक्रला १८८

+ पाठानामानि गुणाश्च —

पाठाम्बष्ठाम्बष्ठकी च प्राचीना पापचेलिका ।
एकाष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका ।१८९
पाठोष्णा कटुका तीक्ष्णा वातश्लेष्महरी लघुः ।
हन्ति शूलज्वरच्छर्दिकुष्ठातीसारहृद्रुजः ॥१९०॥
दाहकण्डूविषश्वासकृमिगुल्मगरव्रणान् ।
श्वेता त्रिवृत् त्रिभण्डी स्यात् त्रिवृता त्रिपुटापि च ॥

× श्वेतनिशोथनामानि गुणाश्च —

सर्वानुभूतिः परलो निशोथो रेचनीति च ।

तै०—पिल्लिआँगा । इं०—विण्टलचेरी (Wintel Cherry) फा०—मेहमन बररी ।

+ सं०—पाठा, अम्बष्ठा । हि०—पाढ़ । बँ०—निमुक, आखाँदि । म०—पहाड़मूल । गु०—काली पाढ, करेटीमूय । तै०—पाठ चेट्टु । इं०—परेरा रूट (Parera Root)

× सं०—श्वेत निशोथ, त्रिवृत् । हि०—निसोथ, पनिलर । पं०—तेड़ी । म०—निशोत्तर, लेंडा । गु०—

Uma Shankar Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्वेता त्रिवृद्रेचनी स्यात् स्वादुरुष्णा समीरहृत् ॥
रूक्षा पित्तज्वरश्लेष्मपित्तशोथोदरापहा ।

❀ श्यामात्रिवृन्नामानि गुणाश्च—

त्रिवृच्छ्यामार्द्धचन्द्रा च पालिन्दी च सुषेणिका ॥
श्यामा त्रिवृत्ततो हीनगुणा तीव्रविरेचनी ।
मूर्च्छादाहमदभ्रान्तिकण्ठोत्कर्षणकारिणी ॥१९४।

× लघ्वीदन्तीनामानि गुणाश्च—

लघ्वी दन्ती विशल्या च स्यादुदुम्बरपर्ण्यपि ।
तथैरण्डफला शीघ्रा श्येनघण्टा घुणप्रिया ।१९५॥
वाराहाङ्गी च कथिता निकुम्भश्च मुकूलकः ।

नसोत्तर । क०—तिगडे । तै०—आजतेगडा । ता०—शिवदई । इं०—टरबीथरूट (Tnrbeath Root) फा०-निसोथ । अ०—तुरबुद ।

❀ सं०—श्यामनिसोथ । हिं०—काला निसोथ, श्याम-निलर । बं०—काल तेड्डो । क०—केयप्नेयतिगडे ।

× सं०—दन्ती, विशल्या । हि०—दन्ती, तिरफल । बं०—दन्ती गाछ । म०—लघुदन्ती । गु०—दाँत एटले नेपालना मूल । क०—दन्ती । तै०—दन्ती चेट्टु, कोण्ड अमुदुम् । इं०—क्रोटन् सीड्स् (CrotenSeeds) फा०-दन्द । अ०—हबल मलूक ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

+बृहद्दन्तीनामानि गुणाश्च—

द्रवन्ती शम्बरी चित्रा प्रत्यक्पर्ण्याखुपर्ण्यपि ।१९६
चित्रोपचित्रा न्यग्रोधी सुतश्रेणी तथा वृषा ।
दन्तीद्वयं सरं पाके रसे च कटु दीपनम् ॥१९७॥
गुदाङ्कुराश्मशूलार्शःकण्डुकुष्ठविदाहनुत् ।
तीक्ष्णोष्णं हन्ति पित्तास्रकफशोथोदरक्रिमीन् १९८

लघुदन्तीफलगुणाः—

क्षुद्रदन्तीफलं तु स्यान्मधुरं रसपाकयोः ।
शीतलं सृष्टविण्मूत्रं गरशोथकफापहम् ॥१९९॥

× बृहद्दन्तीफलनामानि गुणाश्च—

जयपालो दन्तिबीजं विख्यातं तिन्तिडीफलम् ।
जयपालो गुरुः स्निग्धो रेची पित्तकफापहः ।२००।

+ सं०—बृहद्दन्ती । हि०—मुगलाई अण्ड । म०—थोरवन्ती । गु०-रतनजोत । क०—एरण्डने दन्ती । इं०—दि फीजीसियण्ट (The Physiciant) फा०—शकार हुजुवा । अ०—अबुखलसा ।

× सं०—जयपाल, दन्तिबीज । हि०—जमालगोटा । बं०—ज़यपाल । म०—क०—जैपाल । गु०—नेपालो । इं०—पार्जिङ्ग नट्स (Parging Nuts) फा०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

+ऐन्द्रवारुणीनामानि गुणाश्च—

ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी च गवादनी ।
वारुणी च परा शुक्ला सा विशाला महाफला।२०१।
श्वेतपुष्पा मृगाक्षी च मृगैर्वारुर्मृगादनी ।
गवादनीद्वयं तिक्तं पाके कटु सरं लघु ॥२०२॥
वीर्य्योष्णं कामलापित्तकफप्लीहोदरापहम् ।
श्वासकासापहं कुष्ठगुल्मग्रन्थिव्रणप्रणुत् ॥२०३॥
प्रमेहमूढगर्भामगण्डामयविषापहम् ।

❀ नीलीनामानि गुणाश्च—

नीली तु नीलिनी तूली कालादोला च नीलिका ॥
रञ्जनी श्रीफली तुत्था ग्रामीणा मधुपर्णिका ।
क्लीतिका कालकेशी च नीलपुष्पा च सा स्मृता ॥

+सं०—इन्द्रवारुणी, ऐन्द्री । हि०—इन्द्रायण, फरफेंदु । बँ०—कुंदरुकी । म०—कांवडल । गु०—गावसुकण्ड । क०—झमेक्फे । ते०—एतिपुच्छा । इँ०—कोलोसिंथ (Colosinth) फा०—खुर्यजातल्ख । अ०—हंजल ।

❀सं- नीली, नीलिका । हि०--नील, लील । बँ०—नीलगाछ । म०—गुली । गु०—गली । क०-हिरीपनीलो । ते०—निलीजरटे । इँ०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नीलिनी रेचनी तिक्ता केश्या मोहभ्रमापहा।
उष्णा हन्त्युदरप्लीहवातरक्तकफानिलान्॥२०६॥
आमवातमुदावर्तं मदं च विषमुद्धतम्।

❀ शरपुङ्खानामानि गुणाश्च—

शरपुङ्खा प्लीहशत्रुर्नीलवृक्षाकृतिश्च सा ॥२०७॥
शरपुङ्खो यकृत्प्लीहगुल्मव्रणविषापहः।
तिक्तः कषायः कासास्रश्वासज्वरहरो लघुः॥२०८॥

वृद्धदारकनामानि गुणाश्च—

वृद्धदारक आवेगी छागान्त्री रिष्यगन्धिका।
वृद्धदारः कषायोष्णः कटुस्तिक्तो रसायनः ॥२०९॥
वृष्यो वातामवातार्शःशोथमेहकफप्रणुत्।
शुक्रायुर्बलमेधाग्निस्वरकान्तिकरः सरः ॥२१०॥

+यवासा-दुरालभानामानि गुणाश्च—

यासो यवासो दुःस्पर्शोः धन्वयासः कुनाशकः।

❀ सं०—शरपुंखा। हि०—सरफोंका। बं०—साद वन-नील। म०—उन्हाली। क०—पेरडुकोग्गि, मल्लुकोग्गि। तै०—प्रापोराचेटटु। ता०—कोल्लुकनकेल्लकि। इं०—परपल टेफ्रोसिया (Purple Tephrosia)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दुरालभा दुरालम्भा समुद्रान्ता च रोदनी ॥२११॥
गान्धारी कच्छुरानन्ता कषाया दुर्लभा ग्रहा।
यासः स्वादुः सरस्तिक्तस्तुवरः शीतलो लघुः।२१२।
कफमेदोमदभ्रान्तिपित्तास्रकुष्ठकासजित्।
तृष्णाविसर्पवातास्रवमिज्वरहरः स्मृतः ॥२१३॥
यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा।

मुण्डीनामानि गुणाश्च—

मुण्डी भिक्षुरपि प्रोक्ता श्रावणी च तपोधना॥२१४॥
श्रवणाह्वा मुण्डितिका तथा श्रवणशीर्षिका।
महाश्रवणिका त्वन्या सा स्मृता भूकदम्बिका।२१५।
कदम्बपुष्पिका च स्यादव्यथातितपस्विनी।
मुण्डी तिक्ता कटुः पाके वीर्य्योष्णा मधुरा लघुः २१६
मेध्या गण्डापचीकुष्ठकृमियोन्यर्तिपाण्डुनुत्।
श्लीपदारुच्यपस्मारप्लीहमेदोगुदार्तिहृत् ॥२१७॥
महामुण्डी च तुल्या हि गुणैरुक्ता महर्षिभिः।

अपामार्गनामानि गुणाश्च—

अपामार्गस्तु शिखरी ह्यथःशल्यो मयूरकः ॥२१८॥

दुरालभा। म०-धमासा। गु०--धमासो। क०--वल्लिदुरुवे। तै०--पिलरेगटि। फा०--बालाबर्दि। अ०--शकाई।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

कर्कटी दुग्रहा चापि क्रिणही खरमञ्जरी ॥२१९॥
अपामार्गः सरस्तीक्ष्णो दीपनस्तिक्तकः कटुः ।
पाचनो नाव्रनश्छर्दिकफमेदोऽनिलापहः ॥२२०॥
निहन्ति हृद्रुजाध्मार्शःकण्डुशूलोदरापचीः ।

रक्तापामार्गनामानि गुणाश्च—

रक्तोऽन्यो वशिरो वृन्तफलो धामार्गवोऽपि च २२१
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली ।
अपामार्गोऽरुणो वातविष्टम्भी कफहृद्धि सः।२२२।
रूक्षः पूर्णगुणैर्न्यूनः कथितो गुणवेदिभिः ।
अपामार्गफलं स्वादु रसे पाके च दुर्जरम् ॥२२३॥
विष्टम्भि वातलं रूक्षं रक्तपित्तप्रसादनम् ।

कोकिलाक्षनामानि गुणाश्च—

कोकिलाक्षस्तु काकेक्षुरिक्षुरः क्षुरिका क्षुरः ॥२२४॥
भिक्षुः काण्डेक्षुरप्युक्तः इक्षुगन्धेक्षुवालिका ।
क्षुरकः शीतला वृष्यः स्वाद्वम्लः पिच्छलस्तथा ॥
तिक्तो वातामशोथाश्मतृष्णादृष्ट्यनिलास्रजित् ।

अस्थिसंहारीनामानि गुणाश्च—

ग्रन्थिमानस्थिसंहारी वज्राङ्गी चास्थिशृंखला ।२२६।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

अस्थिसंहारकः प्रोक्तो वातश्लेष्महरोऽस्थियुक् ।
उष्णः सरः कृमिघ्नश्च दुर्नामा चाक्षिरोगहृत् ।२२७।
रूक्षः स्वादुर्लघुर्वृष्यः पाचनः पित्तलः स्मृतः ।
भिषग्वरैर्यथानाम फलं चापि प्रकीर्तितम् ॥२२८॥
कण्डूत्वग्विरहितमस्थिशृंखलायाः
माषार्द्धं द्विदलमकंचुकं तदर्द्धम् ।
संपिष्टं तदनु ततस्तिलस्य तैले
सम्पक्वं वटकमतीव वातहारि ॥२२९॥

महाजालनीनामानि गुणाश्च—

महाजालनिका चर्मरङ्गा स्यान्नीलपुष्पिका ।
आवर्तकी तिन्दुकिनी विभाण्डी रक्तपुष्पिका ।२३०।
महाजालनिका तिक्ता रेचनी कफपित्तजित् ।
हन्ति दाहोदरानाहशोफकुष्ठकफज्वरान् ॥२३१॥

कुमारीनामानि गुणाश्च—

कुमारी गृहकन्या च कन्या घृतकुमारिका ।
कुमारी मेदनी शीता तिक्ता नेत्र्या रसायनी ॥२३२॥
मधरा बृंहणी बल्या वृष्या वातविषप्रणुत् ।
गुल्मप्लीहयकृद्वृद्धिकफज्वरहरी भवेत् ॥२३३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

ग्रन्थ्यग्निदग्धविस्फोटपीतरक्तत्वगामयान् ।

श्वेतपुनर्नवानामानि गुणाश्च—

पुनर्नवा श्वेतमूला शोथघ्नी दीर्घपत्रिका ॥२३४॥
कटुः कषायानुरसा पाण्डुघ्नी दीपनी सरा ।
शोफानिलगरश्लेष्महरी व्रण्योदरप्रणुत् ॥२३५॥

रक्तपुनर्नवानामानि गुणाश्च—

पुनर्नवापरा रक्ता रक्तपुष्पा शिवाटिका ।
शोथघ्नी क्षुद्रवर्षाभूर्वृषकेतुः कठिल्लिका ॥२३६॥
पुनर्नवारुणा तिक्ता कटुपाका हिमा लघुः ।
वातला ग्राहिणी श्लेष्मपित्तरक्तविनाशिनी ॥२३७॥

एलायकनामानि गुणाश्च—

एलायकः कृष्णबालः कुमारी सारसोद्भवः ।

प्रसारिणीनामानि गुणांश्च----

प्रसारिणी राजबला भद्रपर्णी प्रतानिनी ॥२३८॥
सरणी सारणी भद्रबला चापि कटम्भरा ।
प्रसारिणी गुरुर्वृष्या बलसन्धानकृत्सरा ॥२३९॥
वीर्योष्णा वातहृत्तिक्ता वातरक्तकफापहा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ कृष्णसारिवानामानि गुणाश्च—

कृष्णा तु सारिवा श्यामा गोपी गोपवधूश्च सा ।२४०।
धवला सारिवा गोपी गोपकन्या च शारदी ।
स्फोटा श्यामा गोपवल्ली लतास्फोटा च चंदना २४१

सारिवागुणाः—

सारिवायुगलं स्वादु स्निग्धं शुक्रकरं गुरु ।
अग्निमान्द्यारुचिश्वासकासामविषनाशनम् ॥२४२॥
दोषत्रयास्रप्रदरज्वरातीसारनाशनम् ।

× भृङ्गराजनामानि गुणाश्च—

भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ॥२४३॥
अङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ।

❀ सं०-सारिवा, कृष्णसारिवा । हि०-सरिवन, सालसा । बँ०—अनन्तमूल । म०—श्वेत उपलसरी, कृष्ण उपलसरी, सुगंध उपलसरी । गु०—कपरी । तै०—नीलतिग । इँ०-इंडियन सारसा परिला (Indian Sarsa Parilla) ।

× सं०—भृंगराज, भृंगरज, मार्कव । हि०—भँगरैया, भँगरा । बँ०—भीमराज । म०—माका । गु०—भाँगरो । क०—फरुगमुरु । तै०—गुण्ट कलगरचेट्टु । इँ०—ट्रेलिंग इकलिप्टा (Traling Eclipta) फा०—जमर्दर । अ०—हजीज ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

भृङ्गारः कटुकस्तिक्तो रूक्षोष्णः कफवातनुत् ।२४४।
केश्यस्त्वच्यः कृमिश्वासकासशोथामपाण्डुनुत् ।
दन्त्यो रसायनो बल्यः कुष्ठनेत्रशिरोऽर्तिनुत् ॥२४५॥

१-शणपुष्पीनामानि गुणाश्च—

शणपुष्पी स्मृता घण्टारवा शणसमाकृतिः ।
शणपुष्पी कटुस्तिक्ता वामनी कफपित्तजित् ॥२४६।

२-त्रायमाणानामानि गुणाश्च—

बलभद्रा त्रायमाणा यामन्ती गिरिसानुजा ।
यामन्ती तुवरा तिक्ता सरा पित्तकफापहा ॥२४७॥
ज्वरहृद्रोगगुल्मार्शोभ्रमशूलविषप्रणुत् ।

३-मूर्वानामानि गुणाश्च—

मूर्वा मधुरसा देवी मोरटा तेजनी स्रुवा ॥२४८॥

---

१ सं०—शणपुष्पी, घण्टारवा। हि०—सनई, सन। बँ०—बनशणई। म०—ताग। गु०—शण। तै०—शणमतुवेल्ल। म०—गिलुगिच्चि। ता०—जेनप्पर। इं०—फ्लाक्सहेंप (Flaxhamp) फा०—लादना।

२ सं०—त्रायमाणा। हि०—त्रायमान। बँ०—बला, बाहुला। म०—त्रायमान। गु०—त्राहिमान्। क०—त्रायमाणा। फा०—अस्मक।

३ सं०—मूर्वा। हि०—मरोरी, चुरनहार। बँ०—मुर्वा,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ।
मूर्वा सरा गुरुः स्वादुस्तिक्ता पित्तास्रमेहनुत् ।२४९
त्रिदोषतृष्णाहृद्रोगकण्डूकुष्ठज्वरापहा ।

† काकमाचीनामानि गुणाश्च—

काकमाची ध्वांक्षमाची काकाह्वा चैव वायसी २५०
काकमाची त्रिदोषघ्नी स्निग्धोष्णा स्वरशुक्रदा ।
तिक्ता रसायनी शोथकुष्ठार्शोज्वरमेहजित् ॥२५१॥
कटुर्नेत्रहिता हिक्काछर्दिहृद्रोगनाशिनी ।

❀ काकनासानामानि गुणाश्च—

काकनासा तु काकाङ्गी काकतुण्डफला च सा २५२

मुर्गा । म०—मोरवेल । क०—मुहुरसि । तै०—बागचेट्टु । ता०—मरूल ।

† सं०—काकमाची । हि०—मकोय । बँ०—मदन, मधुनि । म०—लघुकावली । गु०—पीलुडी । क०—कावई, काके । इँ०—नाईट शेड (Night Shad) फा०—रोवा तरीख । अ०—एनबुस्सालव ।

❀ सं०—काकनासा । हि०—कौआठोडी । बँ०—केउयाठुँटी । म०—श्वेतकावली । क०—हिरीय कागे डोले । तै०—वेलुमसन्दि चेट्ट, पुसबुसिन्द चेट्ट ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitized by eGangotri

काकनासा कषायोष्णा कटुका रसपाकयोः ।
कफघ्नी वामनी तिक्ता शोथार्शःश्वित्रकुष्ठहृत् ॥२५३॥

+ काकजंघाननामानि गुणाश्च—

काकजंघा नदीकान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काका चापि प्रकीर्तिता ॥२५४॥
काकजंघा हिमा तिक्ता कषाया कफपित्तजित् ।
निहन्ति ज्वरकुष्ठास्रक्रिमिकण्डुविषप्रणुत् ॥२५५॥

नागपुष्पीनामानि गुणाश्च—

नागपुष्पी श्वेतपुष्पा नागरी रामदूतिका ।
नागरी रोचनी तिक्ता तीक्ष्णोष्णा कफपित्तनुत् २५६
विनिहन्ति विषं शूलं योनिदोषवमिक्रिमीन् ।

× मेषशृंगीनामानि गुणाश्च—

मेषशृंगी विशाणी स्यान्मेषवल्ल्याजशृंगिका ।२५७

+ सं०—काकजंघा । हि०—काकजंघा, मसी । बँ०—काँटा गुडकावली । म०—कागाचे झाड । गु०—क०—जीरीचिलेच । तै०—नालादुच्चीणीकें ।

× सं०—मेषशृङ्गी । हि०—मेढासींगी । बँ०—मेडाशिंगे । म०—मेंडफली । गु०—मडाशिंगी । क०—उरियमर । इं०—स्क्रिउट्री (Screwtree) अ०—किस्त । फा०—बकिस्त ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मेषशृंगी रसे तिक्ता वातला श्वासकासहृत् ।
रूक्षा पाके कटुस्तिक्ता व्रणश्लेष्माक्षिशूलनुत् ।२५८।
मेषशृंगीफलं तिक्तं कुष्ठमेहकफप्रणुत् ।
दीपनं स्रंसनं कासकृमिव्रणविषापहम् ॥२५९॥

+हंसपदीनामानि गुणाश्च—

हंसपादी हंसपदी कीटमाता त्रिपादिका ।
हंसपादी गुरुः शीता हन्ति रक्तविषव्रणान् ॥२६०॥
विसर्पदाहातीसारलूताभूतादिरोगनुत् ।

❀ सोमलतानामानि गुणाश्च—

सोमवल्ली सोमलता सोमक्षीरी द्विजप्रिया ॥२६१॥
सोमवल्ली त्रिदोषघ्नी कटुस्तिक्ता रसायनी ।

+ सं०—हंसपदी, कीटमाता । हि०—हंसपदी । बँ०—गोयालेलता । म०—लाल लाजालु । गु०—हंसराज । क०—नविलडी । तै०—हंसपादमु । इं०—मेंडनहेयर (Maiden hair) फा०—परस्या उशान । अ०—शारुलजीन, शारुलअर्द ।

❀ सं०—सोमवल्ली, सोमलता । हि०—सोमवल्ली । बँ०—म०— क०—सोमवल्ली । तै०—पल्लटाजी ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

❀ आकाशवल्लीनामानि गुणाश्च—

आकाशवल्ली तु बुधैः कथितामरवल्लरी ॥२६२॥
खवल्ली ग्राहिणी तिक्ता पिच्छिलाक्ष्यामयापहा।
तुवराग्निकरी हृद्या पित्तश्लेष्मामनाशिनी ॥२६३॥

† पातालगरुडीनामानि गुणाश्च—

छिलहिण्डो महामूलः पातालगरुडाह्वयः।
छिलहिण्डः परो वृष्यः कफघ्नः पवनापहः॥२६४॥

× वन्दानामानि गुणाश्च—

वन्दा वृक्षादनी वृक्षभक्ष्या वृक्षरुहापि च।
वन्दाकः स्याद्धिमस्तिक्तः कषायो मधुरो रसे २६५
माङ्गल्यः कफवातास्रक्षोत्रणविषापहः।

❀ सं०—आकाशवल्ली। हि०—आकाशवेल, अमरवेल। गु०—अमरवेल। क०—नेदमुदवल्ली। तै०—इन्द्रजाल। अ०—अफतिमून।

† सं०—पातालगरुडी। हि०—छिरेंटा। बं०—शिरेंदा। म०—तानीचा वेल। गु०—वेवडी ओलप। तै०—दूसरतोगे।

× सं०—वन्दा। हि०—बंदाल, बाँदा। बं०—बाँदु, परगाछा। म०—बाँदागुल। गु०—बाँदो। क०—बंदगिगे। तै०—[illegible]।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१-वटपत्रीनामानि गुणाश्च—

वटपत्री तु कथिता मोहनी रेवती बुधैः ॥२६६॥

वटपत्री कषायोष्णा योनिमूत्रगदापहा ।

हिंगुपत्रीनामानि गुणाश्च—

हिंगुपत्री तु कवरी पृथ्वीका पृथुका पृथुः ॥२६७॥

हिंगुपत्री भवेद्रुच्या तीक्ष्णोष्णा पाचनी कटुः ।

हृद्वस्तिरुग्विबन्धार्शःश्लेष्मगुल्मानिलापहा ।२६८।

वंशपत्रीनामानि गुणाश्च—

वंशपत्री वेणुपत्री पिङ्गा हिंगुशिवाटिका ।

वंशपत्रीगुणा विज्ञैर्वंशपत्रीव कीर्तिताः ॥२६९॥

मत्स्याक्षीनामानि गुणाश्च—

मत्स्याक्षी बाह्लिकी मत्स्यगन्धा मत्स्यादनीति च ।

मत्स्याक्षी ग्राहिणी सीता कुष्ठपित्तकफास्रजित् ॥

लघुस्तिक्ता कषाया च स्वाद्वी कटुविपाकिनी ।

सर्पाक्षीनामानि गुणाश्च—

सर्पाक्षी स्यात्तु गण्डाली तथा नाडीकलायका २७१

१-सं०—वटपत्री । हि०—वडपत्री । म०—वडवती । बं०—वडपाथरकुचि । तै०—पिण्डि । इं०—लैकोपेडियम् । (Lacopaidium) ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

सर्पाक्षी कटुका तिक्ता सोष्णा कृमिनिकृन्तनी।
वृश्चिकोन्दुरुसर्पाणां विषघ्नी व्रणरोपणी ॥२७२॥

+ शङ्खपुष्पीनामानि गुणाश्च—

शंखपुष्पी तु शंखाह्वा माङ्गल्यकुसुमापि च।
शंखपुष्पी सरा मेध्या वृष्या मानसरोगहृत् ॥२७३॥
रसायनी कषायोष्णा स्मृतिकान्तिबलाग्निदा।
दोषापस्मारभूतादिकुष्ठक्रिमिविषप्रणुत् ॥२७४॥

× अर्कपुष्पीमानि गुणाश्च—

अर्कपुष्पी क्रूरकर्मा पयस्या जलकामुका।
अर्कपुष्पी कृमिश्लेष्ममेहपित्तविकारजित् ॥२७५॥

१-लज्जालुनामानि गुणाश्च—

लज्जालुर्हि समीपत्रा समङ्गा जलकर्णिका।
रक्तपादी नमस्कारी नाम्ना खदिरकेत्यपि ॥२७६॥

+ सं०—शंखपुष्पी। हि०—शंखाहुली, कौडियाली। बं०—शंखाहुली, डानकुनी। म०—शंखावली। गु०—शंखावली। क०—शंखपुष्पी।

× सं०—अर्कपुष्पी। हि०—दुधियार, अर्कहुली। म०—शिरडोरि। गु०—खरणेर।

१-सं०—लज्जालु। हि०—लज्जावन्ती (छुईमुई)। बं०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लज्जालुः शीतला तिक्ता कषाया कफपित्तजित्।
रक्तपित्तमतीसारं योनिरोगान्विनाशयेत् ॥२७७॥

अलम्बुषानामानि गुणाश्च—

अलम्बुषा खरत्वक् च तथा मेदोगला स्मृता।
अलम्बुषा लघुः स्वादुः कृमिपित्तकफापहा ॥२७८॥

+ दुग्धिकानामानि गुणाश्च—

दुग्धिका स्वादुपर्णी स्यात्क्षीरावी जीरिवी तथा।
दुग्धिकोष्णा गुरू रूक्षा वातला गर्भकारिणी ॥२७९
स्वादुक्षीरी कटुस्तिक्ता सृष्टमूत्रमलापहा।
स्वादुर्विष्टंभनी वृष्या कफकोष्ठकृमिप्रणुत् ॥२८०॥

❀ भूम्यामलकीनामानि गुणाश्च—

भूम्यामलकिका प्रोक्ता शिवा तामलकीति च।

लाजुक। म०—लाजरी, संकोरणी। गु०—रिशामणी। क०—मुद्दिदरे मुरुटव।

+सं०—दुग्धिका। हि०—दुद्धी। बं०—खिरुई। म०—थोरदुधी। क०—मरिजवणोके। तै०—पिलपाल चेट्टु। फा०—निशाशत।

❀सं०—भूम्यामलकी। हि०—भुइँ आमला। बं०—भुइँ—

Chanmeg Gurukul Maha Kumbh

CC0. In Public Domain, Digitization by eGangotri

बहुपत्रा बहुफला बहुवीर्य्या जटापि च ॥२८१॥
भूधात्री वातकृत्तिक्ता कषाया मधुरा हिमा।
पिपासाकासपित्तास्रकफपाण्डुक्षतापहा ॥२८२॥

× ब्राह्मीनामानि गुणाश्च—

ब्राह्मी कपोतवङ्का च सोमवल्ली सरस्वती।
मण्डूकपर्णी माण्डूकी त्वाष्ट्री दिव्या महौषधी २८३॥
ब्राह्मी हिमा सरा तिक्ता लघुर्मेध्या च शीतला।
कषाया मधुरा स्वादुपाका पुष्पा रसायनी ॥२८४॥
स्वर्य्या स्मृतिप्रदा कुष्ठपाण्डुमेहास्रकासजित्।
विषशोथज्वरहरी तद्वन्मण्डूकपर्णिका ॥२८५॥

आमला। म०—भुइँ आमला। गु०—भो आवँली। क०—आरुनेल्लि। तै०—नेला उसीरीके।

× सं०-ब्राह्मी, माण्डूकी। हि०-ब्राह्मी, ब्रह्ममण्डूकी, चरेली। बं०--अधविर्णा, थुलकुडि। म०-ब्राह्मी। गु०—ब्राह्मी, विद्याब्राह्मी। क०-औदेलग। तै०--शम्बनी चेट्टु। ता०—वीथी। ई०—इण्डियन पेनी वर्ट (Indianpenuy wort) फा०—जरनब।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

× द्रोणपुष्पीनामानि गुणाश्च—

द्रोणा च द्रोणपुष्पी च फलपुष्पा च कीर्तिता ।
द्रोणपुष्पी गुरुः स्वादू रूक्षोष्णा वातपित्तकृत् ॥२८६
सतीक्ष्णा लवणा स्वादुपाका कटवी च भेदनी ।
कफामकामलाशोथतमकश्वासजन्तुजित् ॥२८७॥

+ सुवर्चलानामानि गुणाश्च—

सुवर्चला सूर्य्यभक्ता वरदा वरदापि च ।
सूर्य्यावर्ता रविप्रीता परा ब्रह्मसुवर्चला ॥२८८॥
सुवर्चला हिमा रूक्षा स्वादुपाका सरा गुरुः ।
अपित्तला कटुः क्षारा विष्टम्भकफवातजित् ॥२८९॥
अन्या तिक्ता कषायोष्णा सरा रूक्षा लघुः कटुः ।
निहन्ति कफपित्तास्रश्वासकासारुचिज्वरान् ।२९०
विस्फोटकुष्ठमेहास्रयोनिरुक्कृमिपाण्डुताः ।

× सं०—द्रोणपुष्पी । हि०—गूमा, गोमा । बं०—द्रोणपुष्पी, घलघसे । म०—कुंभा । गु०—कुबो । क०—तुम्ब । तै०—लतुगतुम्मि ।

+ सं०—सुवर्चला । हि०—हुरहुल, सोचली । बं०—सुडहुडे । म०—सूर्यफूल । गु०—सूरजमुखी । क०—हुरहुर । तै०—सूर्यकान्तिमु । इं०—सनफ्लावर (Sun flower) फा०—गुणे आफताबपरस्त । अ०—अरदमून ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

❀ वन्ध्याकर्कोटकीनामानि गुणाश्च—

वन्ध्याकर्कोटकी देवी कन्या योगेश्वरीति च ।२९१।
नागारिर्नागदमनी विषकण्टकिनी तथा ।
वन्ध्या कर्कोटकी लघ्वी कफनुद्व्रणशोधनी ।२९२।
सर्पदर्पहरी तीक्ष्णा विसर्पविषहारिणी ।

+ मार्कण्डिकानामानि गुणाश्च—

मार्कण्डिका भूमिचरी मार्कण्डी मृदुरेचनी ॥२९३॥
मार्कण्डिका कुष्ठहरी ऊर्ध्वाधःकायशोधनी ।
विषदुर्गंधकासघ्नी गुल्मोदरविनाशनी ॥२९४॥

× देवदालीनामानि गुणाश्च—

देवदाली तु वेणी स्यात्कर्कोटी च गरागरी ।

❀ सं०—वंध्याकर्कोटकी । हि० -वनककोड़ा । बँ०-तित्काँकरोल । म०—वाँझकर्टोली । गु०-वाँझ कण्टोली । क०—वजे महुआगुलु ।

+सं०—मार्कण्डिका । हि०—भुइँ खखसा । बँ०--काँकरोलभेद । म०—सोनामुखी । गु०—मीठी आवल्य । क०—तलाडवल्ली । तै०--नेलटंघडी । इँ० – अलेक्जंड्रियन सिना (Alexandriansena) फा०–सना । अ०-सना ।

× सं०--देवदाली । हि०-घघरबेल । बँ०–देयाताडा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देवताडो वृत्तकोपस्तथा जीमूष इत्यपि ॥२९५॥
पीतापरा खरस्पर्शा विषघ्नी गरनाशिनी ।
देवदाली रसे तिक्ता कफार्शःशोफपाण्डुताः ॥२९६॥
नाशयेद्वामनी तिक्तं क्षयहिक्काकृमिज्वरान् ।
देवदालीफलं तिक्तं कृमिश्लेष्मविनाशनम् ॥२९७॥
स्रंसनं गुल्मशूलघ्नमर्शोघ्नं वातिजित्परम् ।

❀ जलपिप्पलीनामानि गुणाश्च—

जलपिप्पल्यभिहिता शारदी शकुलादनी ॥२९८॥
मत्स्यादनी मत्स्यगन्धा लाङ्गलीत्यपि कीर्तिता ।
जलपिप्पलिका हृद्या चक्षुष्या शुक्रला लघुः ॥२९९॥
संग्राहिणी हिमा रूक्षा रक्तदाहव्रणापहा ।
कटुपाकरसा रुच्या कषाया वह्निवर्द्धनी ॥३००॥

म०—देवदाली । गु०—कुकडवेल्य । तै०—डातर गण्डि । क०—देवडंगर । इं०—ब्रिस्टलील्युफा (Bristaly Lufa) फा०—बंदाल ।

❀ सं०—जलपिप्पली । हि०—पनिसिगा, जलपीपर । बं०—काँचड़ा घास । म०—जलपिपली । गु०—रतवेलियो । क०—होमुगुलु । इं०—परपललिपा (purple Lipa) फा०—पीपल आवी । अ०— फेलफिलमाय ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ गोजिह्वानामानि गुणाश्च—

गोजिह्वा गोजिका गोजी दार्विका खरपर्णिनी।
गोजिह्वा वातला शीता ग्राहिणी कफपित्तनुत्।३०१।
हृद्या प्रमेहकासास्रव्रणज्वरहरी लघुः।

✕ नागदमनीनामानि गुणाश्च—

कोमला तुवरा तिक्ता स्वादुपाकरसा स्मृता॥३०२॥
विज्ञेया नागदमनी बला मोटा विषापहा।
नागपुष्पी नागपत्री महायोगेश्वरीति च॥३०३॥
बला मोटा कटुस्तिक्ता लघुः पित्तकफापहा।
मूत्रकृच्छ्रव्रणान् रक्षो नाशयेज्जालगर्दभम्॥३०४॥
सर्वग्रहप्रशमनी विशेषविषनाशिनी।
जयं सर्वत्र कुरुते धनदा सुमतिप्रदा॥३०५॥

❀ सं०—गोजिह्वा। हि०—गोभी। बँ०—दाडिशाक। म०—पथरी। गु०—भोपाथरी। तै०—येदुनालुकचेट्टु। फा०—कलमरूमी।

✕ सं०—नागदमनी। हि०—नागदौन। बँ०—नागदन। म०—नागदवणी। गु०—नागदमण। क०—नागदमनी। तै०—ईश्वरचेट्ट बरणम। ता०—मुचिपत्री।

Urmila Shastri Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वेल्लन्तरनामानि गुणाश्च—

वेल्लन्तरो जगति वीरतरुः प्रसिद्धः
श्वेतासितारुणविलोहितनीलपुष्पः ।
स्याज्जातितुल्यकुसुमः शमिसूक्ष्मपत्रः
स्यात्कण्टकी सकलदेशज एष वृक्षः॥३०६॥

वेल्लन्तरो रसे पाके तिक्तस्तृष्णाकफापहः ।
मूत्राघाताश्मजिद् ग्राही योनिमूत्रानिलातिजित् ॥

× छिक्कनीनामानि गुणाश्च—

छिक्कनी क्षवकृत्तीक्ष्णा छिक्किका घ्राणदुःखदा।३०८।
छिक्कनी कटुका रुच्या तीक्ष्णोष्णा वह्निपित्तकृत् ।
वातरक्तहरी कुष्ठकृमिवातकफापहा ॥३०९॥
वर्वरी कबरी तुङ्गी खरपुष्पाजगन्धिका ।
वर्वरी तु लघू रुच्या हृद्या च कफवातहृत् ॥३१०॥

× सं०—छिक्कनी, क्षवकृत् । हि०—नकछिकनी । बं०—नाकशिकणी । गु०—नाकछीकणी । फा०—बेरगा-उजवाँ । अ०—उफरककुदुश ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

१-ककुन्दरनामानि गुणाश्च—

ककुन्दरः कटुस्तिक्तो ज्वररक्तकफापहः ॥३११॥
ककुन्दरस्ताम्रचूडः सूक्ष्मपत्रो मृदुच्छदः ।
तन्मूलमार्द्रं निश्क्षिप्तं वदने मुखशोषहृत् ।

÷ सुदर्शनानामानि गुणाश्च—

सुदर्शना सोमवल्ली चक्राह्वा मधुपर्णिका ॥३१२॥
सुदर्शना स्वादुरुष्णा कफशोफास्रवातजित् ।

† आखुकर्णीनामानि गुणाश्च—

आखुकर्णी त्वाखुकर्णपर्णिका भूदरीभवा ॥३१३॥
आखुकर्णी कटुस्तिक्ता कषाया शीतला लघुः ।
विपाके कटका मूत्रकफामयकृमिप्रणुत् ॥३१४॥

---

१ सं०—ककुन्दर। हि०—कुकुरौंधा। बँ०—कुकुरमुत्ता। म०—कुकुरवंदा। गु०—कोकरुंदा। फा०—कमाकिसुस। अ०—सनौबरुल अर्द।

÷ सं०—सुदर्शना, सोमवल्ली, चक्राह्वा। हि०—सुदर्शन। बँ०—सुदर्शनगुलंज।

† सं०-आखुकर्णी। हि०-मूसाकानी। बँ० उन्दुरकानी। म०—उंदरकानि, भोपनी। गु०—उंदरकनी। क०—बल्लि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

+ मयूरशिखानामानि गुणाश्च—

मयूराह्वशिखा प्रोक्ता सहस्रांघ्रिर्मधुच्छदा ।
नीलकण्ठशिखा लघ्वी पित्तश्लेष्मातिसारजित् ३१५

इति गुडूच्यादिवर्गः ।

हहँ । तै०—एलुकचेविचेट्टु । फा०—गोरोमुप । अ०—अजानुल फार ।

+ सं०-मयूरशिखा । हि०-मोरशिखा । बँ०-म०-मयूरशिखा । गु०—मोरशिखा । क०—होरेथसूसुव । तै०—मयूरशिखियनेच्चुपविशेषमु । फा०—असनाने असलान ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुष्पवर्गः ।

+ तत्रादौ कमलस्य नामानि गुणाश्च—

वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ।
सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ॥१॥
पङ्केरुहं तामरसं सारसं सरसीरुहम् ।
बिसप्रसूनराजीवपुष्करास्भोरुहाणि च ॥२॥
कमलं शीतलं वर्ण्यं मधुरं कफपित्तजित् ।
तृष्णादाहास्रविस्फोटविषवीसर्पनाशनम् ॥३॥
विशेषतः ÷ सितं पद्मं पुण्डरीकमिति स्मृतम् ॥४॥
❀रक्तं कोकनदं ज्ञेयं × नीलमिन्दीवरं स्मृतम् ॥५॥
धवलं कमलं शीतं मधुरं कफपित्तजित् ।
तस्मादल्पगुणं किंचिदन्यद्रक्तोत्पलादिकम् ॥६॥

+ सं०—कमल, पद्म, नलिन, अरविन्द । हि०—कमल, लाल-सफेद-नील कमल । बँ०—पद्म । म०-गु०—कमल । क०—बिलीयतावरे, केदावरे । तै०—कालावा । ता०—अम्बल । इं०—लोटस (Lotus) फा०-नीलोफर । अ०—करबुलना, वदनीलोफर ।

÷ तत्रापि सितं कमलं पुण्डरीकेति नाम्नाख्यायते ।

❀ रक्तं कमलं कोकनदमिति कथ्यते ।

× नीलं कमलमिन्दीवरमभिधीयते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पद्मिनीनामानि गुणाश्च—

मूलनालदलोत्फुल्लफलैः समुदिता पुनः ।
पद्मिनी प्रोच्यते प्राज्ञैर्बिसिन्यादिश्च सा स्मृता ॥७॥
पद्मिनी शीतला गुर्वी मधुरा लवणा च सा ।
पित्तासृक्कफनुत्क्षुद्रा वातविष्टम्भकारिणी ॥८॥

नवपत्रादिनामानि गुणाश्च—

संवर्तिका नवदलं बीजकोशोऽब्जकर्णिका ।
किञ्जल्कः केसरः प्रोक्तो मकरन्दो रसः स्मृतः ॥९॥
पद्मनालं मृणालं स्यात्तथा बिसमिति स्मृतम् ।
संवर्तिका हिमा तिक्ता कषाया दाहतृट्प्रणुत् ॥१०॥
मूत्रकृच्छ्रगदव्याधिरक्तपित्तविनाशिनी ।
पद्मस्य कर्णिका तिक्ता कषाया च हिमा स्मृता ।११।
मुखवैशद्यकृल्लघ्वी तृष्णासृक्कफपित्तनुत् ।
किंजल्कः शीतलो वृष्यःकषायो ग्राहकोऽपि सः ।१२।
कफपित्ततृषादाहरक्तार्शोविषशोथजित् ।
मृणालं शीतलं वृष्यं पित्तदाहास्रजिद्गुरुः ॥१३॥
दुर्जरं स्वादुपाकं च स्तन्यानिलकफप्रदम् ।
संग्राहि मधुरं रूक्षं शालूकमपि तद्गुणम् ॥१४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

× स्थलकमलिनीनामानि गुणाश्च—

पद्मचारिण्यतिचराऽव्यथा पद्मा च शारदी ।
पद्मानुष्णा कटुस्तिक्ता कषाया कफवातजित् ॥१५॥
मूत्रकृच्छ्राश्मशूलघ्नी श्वासकासविषापहा ।

+ कुमुदनामानि गुणाश्च—

श्वेतं कुवलयं प्रोक्तं कुमुदं कैरवन्तथा ॥१६॥
कुमुदं पिच्छिलं स्निग्धं मधुरं ह्लादि शीतलम् ।

कुमुदिनीनामानि गुणाश्च—

कुमुद्वती कैरविका तथा कुमुदिनीति च ॥१७॥
सा तु मूलादिसर्वाङ्गैरुदिता समुदिता बुधैः ।
पद्मिन्या ये गुणाः प्रोक्ताःकुमुदिन्याऽपि ते स्मृताः ॥

जलकुम्भीशैवालनामानि गुणाश्च—

वारिपर्णी कुम्भिका स्याच्छैवालं शवलं च तत् ।
वारिपर्णी हिमा तिक्ता लघ्वी स्वाद्वी सरा कटुः ॥

× सं०—पद्मचारिणी । हि०—स्थलपद्मिनी । बँ०—स्थलपद्म । म०—स्थलकमलिनी । क०—कलुदावरे ।

+ सं०—कुमुद, कुवलय, कैरवं । हि०—कोईं, कमोदनी । बँ०—हेलाफुल, नालिफुल । म०—पांढरे उत्पल । गु०—[illegible] । क०—[illegible] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

दोषत्रयहरी रूक्षा शोणितज्वरशोषकृत् ।
शैवालं तुवरं तिक्तं मधुरं शीतलं लघु ॥२०॥
स्निग्धं दाहतृषापित्तरक्तज्वरहरं परम् ।

× शतपत्रीनामानि गुणाश्च—

शतपत्री तरुण्युक्ता कर्णिका चारुकेसरा ॥२१॥
महाकुमारी गन्धाढ्या लाक्षापुष्पातिमंजुला ।
शतपत्री हिमा हृद्या ग्राहिणी शुक्रला लघुः ॥२२॥
दोषत्रयास्रजिद्वर्ण्या तिक्ता कटुर्वी च पाचनी ।

+ वासन्तीनामानि गुणाश्च—

नैपाली कथिता तज्ज्ञैः सप्तला नवमालिका ॥२३॥
वासन्ती शीतला लघ्वी तिक्ता दोषत्रयास्रजित् ॥

× सं०—तरुणी, शतपत्री, कर्णिका । हि०—सेवती, गुलाब, कूजा । बँ०—सेउती, गोलाप । म०—गुलाबाचें फूल । गु०—शेवती गुलाब, मोशमी गुलाब । क०—सेवतिगे, चेवडे । तै०—गुलाबी पुवु । इं०—केबेजरोज (Cabage Rose) कनफेक्शन ऑफ रोज (Confection Of Rose) फा०—गुले गुलसुर्ख, गुलेमुश्की । अ०—जरंजबीन ।

+ सं०—वासन्ती, नेपाली । हि०- नेवाड़ी । बँ०—नेपाली, नेओयार । गु०—नेवरी । म०—नेवाली । क०—बिरबन्तिगे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

× वार्षिकीनामानि गुणाश्च—

श्रीपदी षट्पदा नन्दा वार्षिकी मुक्तबन्धना ॥२४॥
वार्षिकी शीतला लघ्वी तिक्ता दोषत्रयापहा ।
कर्णाक्षिमुखरोगघ्नी तत्तैलं तद्गुणं स्मृतम् ॥२५॥

+ स्वर्णजातिकानामानि गुणाश्च—

जातिर्जाती च सुमना मालती राजपुत्रिका ।
चेतिकाहृद्यगन्धा च सा पीता स्वर्णजातिका ॥२६॥
जातीयुगं तिक्तमुष्णं तुवरं लघु दोषजित् ।
शिरोऽक्षिमुखदन्तार्तिविषकुष्ठव्रणास्रजित् ॥२७॥

÷ यूथिकानामानि गुणाश्च—

यूथिका गणिकाम्बष्ठा सा पीता हेमपुष्पिका ।
यूथीयुगं हिमं तिक्तं कटुपाकरसं लघु ॥२८॥

× सं०—वार्षिकी, मल्लिका, मुद्गर। हि०--बेलामोतिया, घुघुटमोतिया, मोगरा। बं०--बेलफुल, गाछ। गु०—बेल्य डोलर। म०—मोगरी। क०—वल्लिमल्लिगे। तै०-मल्लि पुष्पालु।

+ सं०—जाती, स्वर्णजाती। हि०—जाती, चमेली, जाई। बं०—जाती, चामिलो, स्वर्णजाती। म०—पांढरी जाई, पिवली जाई। क०—जाति। तै०—जाईपुष्पालु।

÷ सं०-यूथिका, गणिका, अम्बष्ठा, हेमपुष्पिका। हि०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मधुरं तुवरं हृद्यं पित्तघ्नं कफवातलम् ।
व्रणास्रमुखदन्ताक्षिशिरोरोगविषापहम् ॥२९॥

❀ चाम्पेयनामानि गुणाश्च —

चाम्पेयश्चम्पकः प्रोक्तो हेमपुष्पश्च स स्मृतः ।
एतस्य कलिका गन्धफलीति कथिता बुधैः ॥३०॥
चम्पकः कटुकस्तिक्तः कषायो मधुरो हिमः ।
विषक्रिमिहरः कृच्छ्रकफवातास्रपित्तजित् ॥३१॥

× बकुलनामानि गुणाश्च —

बकुलो मधुगन्धश्च सिंहकेसरकस्तथा ।
बकुलस्तुवरोऽनुष्णः कटुपाकरसो गुरुः ॥३२॥

जुही । बँ०—जुई । म०—पांढरी लहान जुई । गु०—जुई जिंगरी । क०-यरडुमोल्ले । तै०—जुई, पुष्पालु ।

❀ सं०—चाम्पेय, चम्पक । हि०—चम्पा । बँ०—चाँपा । म०—सोन चाँफा । गु०—रायचम्पो । क०—संपगे । तै०—चंपामी पुवुल ।

× सं०-बकुल, मधुगंध । हि०-मौलसिरी, बकुल । बँ०—बकुलगाछ । म०—बकुल । गु०—बोलसिरी । क०-करक । तै०—पाधड़ा । ता०-मोसदम् । द्रा०-घोलसरी । इं०-सुरिनम मेडलर (Surinum Medler) ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कफपित्तविषश्वित्रक्रिमिदन्तगदापहः ।

+ वकनामानि गुणाश्च—

शिवमल्ली पाशुपत एकाष्ठीलो वको वसुः ॥३३॥
वकोऽनुष्णः कटुस्तिक्तः कफपित्तविषापहः ।
योनिदोषतृषादाहकुष्ठशोथास्रनाशनः ॥३४॥

† कदम्बनामानि गुणाश्च—

कदम्बः प्रियको नीपो वृत्तपुष्पो हलिप्रियः ।
कदम्बो मधुरः शीतः कषायो लवणो गुरुः ॥३५॥
सरोऽवष्टम्भकृद्रूक्षः कफस्तन्यानिलप्रदः ।

× कुब्जकनामानि गुणाश्च—

कुब्जको भद्रतरुणो बृहत्पुष्पोऽतिकेसरः ॥३६॥
महासहा कण्टकाढ्या नीलाऽलिकुलसंकुला ।
कुब्जकः सुरभिः स्वादुः कषायानुरसः सरः ॥३७॥

+ सं०—वक, शिवमल्ली । हि०—बनहुला । म०-धोरवकुल । गु०—बरशोली, मोटी बालसिरी । क०—वगे-टाडु ।

† सं०—कदम्ब, नीप, प्रियक । हि०—कदम । बँ०—कदमगाछ । म०—राजकदम्ब । गु०—कलम, कदम्ब । क०-कडूड । तै०—कडिमिचेट्टु । अ०—कदम्ब ।

× सं०—कुब्जक, भद्रतरुणी, महासहा । हि०—सेवती गुलाब ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

त्रिदोषशमनो वृष्यः शीतहर्ता च स स्मृतः।

+ मल्लिकानामानि गुणाश्च—

मल्लिका मदयन्ती च शीतभीरुश्च भूपदा ॥३८॥
मल्लिकोष्णा लघुर्वृष्या तिक्ता च कटुका हरेत्।
वातापित्तास्यदृग्व्याधिकुष्ठारुचिविषव्रणान् ॥३९॥

❀ माधवीनामानि गुणाश्च—

माधवी स्यात्तु वासन्ती पुण्ड्रिको मण्डकोऽपि च।
अतिमुक्तश्चाविमुक्तः कामुको भ्रमरोत्सवः ॥४०॥
माधवी मधुरा शीता लघ्वी दोषत्रयापहा।

× केतकीस्वर्णकेतकीनामानि गुणाश्च—

केतकः सूचिकापुष्पो जंबूकः क्रकचच्छदः ॥४१॥

+ सं०—प्रागुक्ताया वार्षिक्या नामान्युक्तानि। तस्या एव पर्यायवाचिनी एषा विज्ञेया।

❀ सं०—माधवी, वासन्ती। हि०—माधवी। बं०—माधवीलता। गु०—रसपित्ति। म०—पोतवेलं। क०—इन्द्रगोच्चे। तै०—माधवतोगे। तै०—माधवतोगे। इं०—क्लस्टड हिप्टेज (Clustered Hiptage)।

× सं०—केतकी, सुवर्णकेतकी। हि०—केवड़ा,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

सुवर्णकेतकी त्वन्या लघुपुष्पा सुगन्धिनी ।
केतकः कटुकः स्वादुर्लघुस्तिक्तः कफापहः ॥४२॥
उष्णस्तिक्तरसो ज्ञेयः चक्षुष्या हेमकेतकी ।

+ किङ्किरातनामानि गुणाश्च—

किङ्किरातो हेमगौरः पीतकः पीतभद्रकः ॥४३॥
किंकिरातो हिमस्तिक्तः कषायश्च हरेदसौ ।
कफपित्तपिपासास्रदाहशोषवमिक्रिमीन् ॥४४॥

कर्णिकारनामानि गुणाश्च—

कर्णिकारः कटुस्तिक्तस्तुवरः शोधनो लघुः ।
रञ्जनः सुखदः शोथश्लेष्मासृव्रणकुष्ठजित् ॥४५॥

× अशोकनामानि गुणाश्च—

अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः ।

केतकी । बँ०—केया गाछ । म०—श्वेतकेवड़ा, केतकी । गु०—केवडो । क०—केदगे । तै०—मुगली तुवु । फा०—करज । अ०—कादी ।

+ सं०-किंकिरात । हि०--किंकिरात । म०—देवबागूल । गु०—रामबावल । फा०--मधिलान ।

× सं०--अशोक । हि०--अशोक । बँ०--अस्पताल । म०--अशोक । गु०--आशुपालो ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कंकेलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ।
अशोकः शीतलस्तिक्तो ग्राही वर्ण्यः कषायकः॥४७॥
दोषापचीतृषादाहकृमिशोथविषास्रजित् ।

बाणपुष्पनामानि गुणाश्च—

अम्लातो म्लादनः प्रोक्तस्तथाम्लातक इत्यपि ।४८।
कुरण्टको बाणपुष्पः सरावोक्ता महासहा ।
अम्लादनः कषायोष्णः स्निग्धः स्वादुश्च तिक्तकः ॥

÷ सैरेयकनामानि गुणाश्च—

सैरेयकः श्वेतपुष्पः सैरेया कण्टकारिका ।
सहचारः सहचरः स च भिन्द्यपि कथ्यते ॥५०॥
कुरण्टकोऽत्र पीतः स्याद्रक्तः कुरवकः स्मृतः।
नीलो बाणो द्वयोरुक्तो दासी चार्तगलश्च सः॥५१॥
सैरेयः कुष्ठवातास्रकफकण्डूविषापहः ।
तिक्तोष्णो मधुरो दन्त्यः सुस्निग्धःकेशरञ्जनः॥५२॥

× कुन्दनामानि गुणाश्च—

कुन्दं तु कथितं माध्यं सदापुष्पं च तत्स्मृतम् ।

÷सं० सैरेयक, आर्तगल । हि०--पियाबासा, कटसरैया। बँ०--झाँटि । म०-पिंवला कोरंटा । गु०--काँटा अशेलिमो । क०—होवण दगारटे । तै०—गोरेंडु ।

× सं०--कुन्द, माध्य । हि० -कुन्द। बँ०—कुन्द । म०—सुरागि । तै०—मोल्ल ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

कुन्दं शीतं लघु श्लेष्मशिरोरुग्विषपित्तहृत्॥५३॥

+मुचुकुन्दनामानि गुणाश्च—

मुचुकुन्दः क्षत्रवृक्षश्चित्रकः प्रतिविष्णुकः।
मुचुकुन्दः शिरःपीडापित्तास्रविषनाशनः॥५४॥

❀ तिलकनामानि गुणाश्च—

तिलकः क्षुरकः श्रीमान् पुरुषश्छत्रपुष्पकः।
तिलकः कटुकः पाके रसे चोष्णो रसायनः॥५५॥
कफकुष्ठकृमीन् वस्तिमुखदन्तगदान् हरेत्।

× बन्धूकनामानि गुणाश्च—

बन्धूको बन्धुजीवश्च रक्तो माध्याह्निको मतः॥५६॥
बन्धूकः कफकृद् ग्राही वातपित्तहरो लघुः।

× ओण्ड्रपुष्पनामानि गुणाश्च—

ओण्ड्रपुष्पं जपा चाथ त्रिसन्ध्या सारुणा मता॥५७॥

× सं०--हि०--बँ०--म०--गु०--क०--मुचुकुन्द। तै०--लोलगु। ता०--टड्डो।

❀ सं०--तिलक, क्षुरक, श्रीमान्। हि०--तिलकपुष्प। गु०—म०—क०—तिलक।

× सं०--बन्धूक। हिं०--दुपहरिया। बँ०--बान्धुलि। म०--दुपोरी। गु०--बपेरियो। क०-बडुरे। तै०--नितिमल्ली।

× सं०-ओण्ड्रपुष्प, जपा। हि०-ओडहुल, गुडहर। बँ०--

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जपा संग्राहिणी केश्या त्रिसन्ध्या कफवातहृत् ।

† सिन्दूरीनामानि गुणाश्च—

सिन्दूरी रक्तबीजा च रक्तपुष्पा सुकोमला ॥५८॥
सिन्दूरी विषपित्तास्रतृष्णावान्तिहरी हिमा ।

❀ अगस्त्यनामानि गुणाश्च—

अगस्त्याह्वो वङ्गसेनो मुनिपुष्पो मुनिद्रुमः ॥५९॥
अगस्त्यः पित्तकफजिच्चातुर्थिकहरो हिमः ।
रूक्षो वातकरस्तिक्तः प्रतिश्यायनिवारणः ॥६०॥

❀ शुक्लाकृष्णातुलसीनामानि गुणाश्च—

तुलसी सुरसा ग्राम्या सुलभा बहुमंजरी ।

जवा । म०—जासवंद । गु०—जासुम । क०—दासनल । तै०—दारपु । शूफ्लावर (Shoe ffower)

† सं०—सिन्दूरी । हि०—काफर, लटकन । म०-शेंदी । गु०—क०- सिन्दूरी । इं०—आरनाटो Arnato ।

❀सं०—अगस्त्य । हि०—अगस्त्य, हथिया, हगदा । बँ०—वक । म०—अगस्ता, हगदा । गु०—अगथियो । क०—अगसेध-मरजु । तै० -अविसि । ता०—अर्गति । इं०—लार्ज फ्लावर्ड एगिटा (Large feowered agita)

❀ सं०—हि—बँ०—तुलसी । म०—तुलस, तुलसो । गु०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

अपेतराक्षसी गौरी शूलघ्नी देवदुन्दुभिः ॥६१॥
तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तकृत्।
दीपनी कुष्ठकृच्छ्रास्रपार्श्वरुक्कफवातजित् ॥६२॥
शुक्ला कृष्णा च तुलसी गुणैस्तुल्या प्रकीर्तिता।

❀ मरुवकनामानि गुणाश्च—

मारुतको मरुवको मरुन्मरुरपि स्मृतः ॥६३॥
फणी फणिञ्जकश्चापि प्रस्थपुष्पः समीरणः।
मरुदग्निप्रदो हृद्यस्तीक्ष्णोष्णः पित्तलो लघुः॥६४॥
वृश्चिकादिविषश्लेष्मवातकुष्ठकृमिप्रणुत्।
कटुपाकरसो रुच्यस्तिक्तो रूक्षः सुगन्धिकः ॥६५॥

† दमनकनामानि गुणाश्च—

उक्तो दमनको दान्तो मुनिपुत्रस्तपोधनः।

तुलसी। क०—एरेड तुलसी। तै०—तुलसी। इं०—ह्वाइट बेसिल (White Basil) परपल स्टाकेड बेसिल (purple stalked Basil) फा०-रेहान। अ०—उलसीवदरुत।

* सं०-मरुवक। हि०—मरुवा। बं०—मरुया। म०—सबजा। गु०—मरवो। क०-मरुवा। तै०—रुद्रजाड। इं०—स्वीट मार्जोरन (Sweet marjorun) फा०—मर्जगुस। अ०—मजजुस।

† सं०—दमनक। हि०—दौना। बं०—दोना, दना

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

गन्धोत्कटो ब्रह्मजटो विनीतः कुलपुत्रकः ॥६६॥
दमनस्तुवरस्तिक्तो हृद्यो वृष्यः सुगन्धिकः।
ग्रहणीविषकुष्ठास्रक्लेदकण्डूत्रिदोषजित् ॥६७॥

❀ बर्बरीनामानि गुणाश्च—

बर्बरी कबरी तुङ्गी खरपुष्पाजगन्धिका।
पर्णासस्तत्र कृष्णे तु कठिल्लककुठेरकौ ॥६८॥
तत्र शुक्लोऽर्जकः प्रोक्तो वटपत्रस्ततोऽपरः।
बर्बरीत्रितयं रूक्षं शीतं कटु विदाहि च ॥६९॥
तीक्ष्णं रुचिकरं हृद्यं दीपनं लघुपाकि च।
पित्तलं कफवातास्रकण्डुक्रिमिविषापहम् ॥७०॥

इति पुष्पवर्गः।

म०—दवणा। गु०—डमरो। क०—दवना। इं०—वर्म-वुड (Worm woo)

❀ सं०—बर्बरी। हि०—बनतुलसी, बर्बरी। बं०—बाबुई तुलसी। म०—रान तुलस। गु०—रान तुलसीभेद। क०—कमोरले, करीय कगोरले। तै०—कारु तुलसी। फा०—मलंग मुश्क। अ०—करंज मुश्क।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

फलवर्गः ।

❀ तत्रादावाम्रस्य नामानि—

आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः ।
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः ॥१॥

गुणाः—

आम्रपुष्पमतीसारकफपित्तप्रमेहनुत् ।
असृग्दरहरं शीतं रुचिकृद् ग्राहि वातलम् ॥२॥
आम्रं बालं कषायाम्लं रुच्यं मारुतपित्तकृत् ।
तरुणं तु तदत्यम्लं रूक्षं दोषत्रयास्रकृत् ॥३॥
आम्रमामं त्वचाहीनमातपेऽतिविशोषितम् ।
अम्लं स्वादु कषायं स्याद्भेदनं कफवातजित् ॥४॥
पक्वं तु मधुरं वृष्यं स्निग्धं बलसुखप्रदम् ।
गुरु वातहरं हृद्यं वर्ण्यं शीतमपित्तलम् ॥५॥
कषायानुरसं वह्निश्लेष्मशुक्रविवर्द्धनम् ।
तदेव वृक्षसंपक्वं गुरु वातहरं परम् ॥६॥

❀ सं०—आम्र । हिं०—आम । बं०—आम्र । म०—आंबा । गु०—आंबो । क०-माविन फल । तै०—माविड । इं०—मेंगो (Mango) । क०—आंबा, अम्बज ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

मधुराम्लरसं किंचिद्भवेत्तत्पित्तनाशनम् ।
आम्रं कृत्रिमपक्वं चेत्तद्भवेत्पित्तकोपनम् ॥७॥
रसस्याम्लस्य हानेस्तु माधुर्य्याच्च विशेषतः ।
चूषितं तत्परं रुच्यं बल्यं वीर्य्यकरं लघु ॥८॥
शीतलं शीघ्रपाकि स्याद्वातपित्तहरं सरम् ।
तद्रसो गालितो बल्यो गुरुर्वातहरः सरः ॥९॥
अहृद्यस्तर्पणोऽतीव बृंहणः कफवर्द्धनः ।
तस्य खण्डं गुरु परं रोचनं चिरपाकि च ॥१०॥
मधुरं बृंहणं बल्यं शीतलं वातनाशनम् ।
वातपित्तहरं रुच्यं बृंहणं बलवर्द्धनम् ॥११॥
वृष्यं वर्णकरं स्वादु दुग्धाम्रं गुरु शीतलम् ॥१२॥
मन्दानलत्वं विषमज्वरं च रक्तामयंबद्धगुदोदरं च ।
आम्रातियोगो नयनामयं च
करोति तस्मादति तानि नाद्यात् ॥१३॥
एतदम्लाम्रविषयं मधुराम्रपरं न तु ।
मधुरस्य परं नेत्रहितत्वाद्या गुणा यतः ॥१४॥
शुंठ्यंभसोऽनुपानं स्यादाम्राणामतिभक्षणे ।
जीरकं वा प्रयोक्तव्यं सह सौवर्चलेन च ॥१५॥

अथाम्रावर्तस्य लक्षणं गुणाश्च—

पक्वस्य सहकारस्य पटे विस्तारितो रसः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घर्मशुष्को मुहुर्दत्त आम्रावर्त इति स्मृतः ॥१६॥
आम्रावर्तस्तृषाछर्दिवातपित्तहरः सरः ।
रुच्यः सूर्य्यांशुभिः पाकाल्लघुश्च स हि कीर्तितः ।१७।

आम्रबीजगुणाः—

आम्रबीजं कषायं स्याच्छर्द्यतीसारनाशनम् ।
ईषदम्लं च मधुरं तथा हृदयदाहनुत् ॥१८॥

नवपल्लवगुणाः—

आम्रस्य पल्लवं रुच्यं कफपित्तविनाशनम् ।

*आम्रातनामानि गुणाश्च—

आम्रातकः पीतनश्च मर्कटाम्रः कपीतनः ॥१९॥
आम्रातमम्लं वातघ्नं गुरूष्णं रुचिकृत्सरम् ।
पक्वं तु तुवरं स्वादु रसे पाके हिमं स्मृतम् ॥२०॥
तर्पणं श्लेष्मलं स्निग्धं वृष्यं विष्टम्भि बृंहणम् ।
गुरु बल्यं मरुत्पित्तक्षतदाहक्षयास्रजित् ॥२१॥

---

*सं०—आम्रातक, पीतन, मर्कटाम्र । हि०—अंबार, अंबाडा । बँ०—आमडा । म०—अंबाडा । क०—आंबोडेयकायि । तै०—आमाटम । गु०—अम्भेडा । इं०—स्पोण्डिअस मिनट (Spndias minut)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजाम्रनामानि गुणाश्च—

राजाम्राष्टाङ्ग आम्रातः कामाह्वो राजपुत्रकः ।
राजाम्रं तुवरं स्वादु विशदं शीतलं गुरु ॥२२॥
ग्राहि रूक्षं विबन्धाध्मवातकृत्कफपित्तनुत् ।

+ कोशाम्रनामानि गुणाश्च—

कोशाम्र उक्तः क्षुद्राम्रः कृमिवृक्षः सुकोशकः ॥२३॥
कोशाम्रः कुष्ठशोथास्रपित्तव्रणकफापहः ।
तत्फलं ग्राहि वातघ्नमम्लोष्णं गुरु पित्तलम् ॥२४॥
पक्वं तु दीपनं रुच्यं लघूष्णं कफवातनुत् ।

❀ पनसनामानि गुणाश्च—

पनसः कण्टकिफलः पनसोऽतिबृहत्फलः ॥२५॥
पनसं शीतलं पक्वं स्निग्धं पित्तानिलापहम् ।
तर्पणं बृंहणं स्वादु मांसलं श्लेष्मलं भृशम् ॥२६॥

+सं०—कोशाम्र। हि०—कोशंभ। बँ०—केओडा, जलपाई। म०—कोशाम्र। गु०—कोशम। क०—जूरिमाचु।

❀ सं०—पनस, कंटकिफल। हि०—कटहल। बँ०—कांटाल। म०—फणस। गु०—पणस। क०—हलसिन हण्णु। तै०—पनसकायि। ता०—पलिका।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

बल्यं शुक्रपदं हन्ति रक्तपित्तक्षतव्रणान् ।
आमं तदेव विष्टम्भि वातलं तुवरं गुरु ॥२७॥
दाहहृन्मधुरं बल्यं कफमेदोविवर्द्धनम् ।

❀ लकुचनामानि गुणाश्च—

लकुचः क्षुद्रपनसो लिकुचो डहुरित्यपि ॥२८॥
आमं लकुचमुष्णं च गुरु विष्टम्भकृत्तथा ।
मधुरं च तथाम्लं च दोषत्रितयरक्तकृत् ॥२९॥
शुक्राग्निनाशनं वापि नेत्रयोरहितं स्मृतम् ।
सुपक्वं तत्तु मधुरमम्लं चानिलपित्तहृत् ॥३०॥
कफवह्निकरं रुच्यं वृष्यं विष्टम्भकं च तत् ।

+ मोचफलनामानि गुणाश्च—

कदली वारणबुसा रम्भा मोचांशुमत्फला ॥३१॥
मोचाफलं स्वादु शीतं विष्टम्भि कफनुद् गुरु ।
स्निग्धं पित्तास्रतृड्दाहक्षतक्षयसमीरजित् ॥३२॥
पक्वं स्वादु हिमं पाकं स्वादु वृष्यञ्च बृंहणम् ।

❀ सं०—लकुच । हि०—बड़हर । बँ०—डेओ । म०—बटार फल । गु०—लकुच ।

+ सं०—कदली, वारणबुसा, मोचा । हि०—केला । बँ०—कला । म०—केल । गु०—केल्य । क०—कदली,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षुत्तृष्णानेत्रगदहृन्मेहघ्नं रुचिमांसकृत् ॥३३॥

माणिक्यमर्त्यामृतचम्पकाद्या
भेदाः कदल्या बहवोऽपि संति ।
उक्ता गुणास्तेष्वधिका भवन्ति
निर्दोषता स्याल्लघुता च तेषाम् ॥३४॥

चिर्भटनामानि गुणाश्च—

चिर्भटं धेनुदुग्धं च तथा गोरक्षकर्कटी ।
चिर्भटं मधुरं रूक्षं गुरु पित्तकफापहम् ॥३५॥
अनुष्णं ग्राहि विष्टम्भि बालं चानिलकोपनम् ।
कफपित्तकरं स्यन्दि पक्वं तूष्णं च पित्तलम् ॥३६॥

नारिकेलनामानि गुणाश्च—

नारिकेलो दृढफलो लाङ्गली कूर्चशीर्षकः ।
तुङ्गस्कन्धफलश्चोच्चस्तृणराजः सदागलः ॥३७॥
नारिकेलफलं शीतं दुर्जरं बस्तिशोधनम् ।
विष्टम्भि बृंहणं बल्यं वातपित्तास्रदाहनुत् ॥३८॥
विशेषतः कोमलनारिकेलं
निहन्ति पित्तज्वरपित्तदोषान् ।

कावालेतब । तै०—चक्राकेली । ता०—वाले । इं०—प्लांटेन (plantain) फा०—मावेज, मोज । अ०—तनो ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदेव जीर्णं गुरु पित्तकारि
विदाहि विष्टम्भि मतं भिषग्भिः ॥३९॥
तस्याम्भः शीतलं हृद्यं दीपनं शुक्रलं लघु ।
पिपासापित्तजित्स्वादु वस्तिशुद्धिकरं परम् ॥४०॥
नारिकेलस्य तालस्य खर्जूरस्य शिरांसि च ।
कषायस्निग्धमधुरबृंहणानि गुरूणि च ॥४१॥

❀ कालिन्दनामानि गुणाश्च—

कालिन्दं कृष्णबीजं स्यात्कालिंगश्च सुवर्तुलम् ।
कालिंदं ग्राहि दृक्पित्तशुक्रहृच्छीतलं गुरु ॥४२॥
पक्वन्तु सोष्णं सक्षारं पित्तलं कफवातजित् ।

+ दशांगुलनामानि गुणाश्च—

दशांगुलं तु खर्बूजं कथ्यते तद्गुणा अथ ॥४३॥
खर्बूजं मूत्रलं बल्यं कोष्ठशुद्धिकरं गुरु ।
स्निग्धं स्वादुतरं शीतं वृष्यं पित्तानिलापहम् ॥४४॥
तेषां यच्चाम्लमधुरं सक्षारं च रसाद्भवेत् ।
रक्तपित्तकरं तत्तु मूत्रकृच्छ्रहरं परम् ॥४५॥

❀ सं०—कालिन्द, कृष्णबीज, कालिंग । हि०—तरबूज, हनुमाना । इं०—वाटर मेलिन (water melin)
+ सं०—दशांगुल, खर्बूज । हि०—खर्बूजा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

+ त्रपुसनामानि गुणाश्च—

त्रपुसं कण्टकिफलं मुधावासः सुशीतलम् ।
त्रपुसं लघु शीतं च नवं तृट्क्लमदाहजित् ॥४६॥
स्वादु पित्तापहं शीतं तिक्तं कृच्छ्रहरं परम् ।
तत्पक्वमम्लमुष्णं स्यात्पित्तलं कफवातनुत् ॥४७॥
तद्बीजं मूत्रलं शीतं रूक्षं पित्तास्रकृच्छ्रजित् ।

× क्रमुकनामानि गुणाश्च—

घोण्टा पूगी च पूगश्च गवाकः क्रमुकस्य तु ॥४८॥
फलं पूगीफलं प्रोक्तमुद्वेगं च तदीरितम् ।
पूगं गुरु हिमं रूक्षं कषायं कफपित्तजित् ॥४९॥
मेहनं दीपनं रुच्यमास्यवैरस्यनाशनम् ।
आर्द्रं तद्गुर्वभिष्यन्दि वह्निदृष्टिहरं स्मृतम् ॥५०॥
स्विन्नं दोषत्रयच्छेदि दृढमध्यं तदुत्तमम् ।

+ सं०—त्रपुस, कण्टकिफल, मुधावास । बँ०—शंशा । इँ०—कुकोम्पर (kukomper)

× सं०—क्रमुक, पूगी, पूग । हि०—सुपारी । बँ०—सुपारी । म०—सुपारी । गु०—शोपारी । क०—अडकेमर । तै०—पाककाया । इँ०—वेटिल नट पाम (Betel nut-balm) फ०—पोपिल । अ०—फोफिल ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

+ तालनामानि गुणाश्च—

तालस्तु लेखपत्रः स्यात्तृणराजो महोन्नतः ॥५१॥
पक्वन्तालफलं पित्तरक्तश्लेष्मविवर्द्धनम् ।
दुर्जरं बहुमूत्रं च तन्द्राभिष्यन्दशुक्रदम् ॥५२॥
तालमज्जा तु तरुणः किंचिन्मदकरो लघुः ।
श्लेष्मलो वातपित्तघ्नः सस्नेहो मधुरः सरः ॥५३॥

ताडीगुणाः—

तालजं तरुणं तोयमतीव मदकृन्मतम् ।
अम्लीभूतं यदा तु स्यात्पित्तकृद्वातदोषहृत् ॥५४॥

× शालफलनामानि गुणाश्च—

शालं फलं रूक्षशीतं मधुरं स्तंभनं गुरु ।
कषायं लेखनं स्तन्यवाताध्मानविबन्धकृत् ॥५५॥
पित्तदाहतृषाकासक्षतक्षयविषास्रनुत् ।

+ सं०—ताल, लेखपत्र । हि०—ताड़ । इं०—पामीपाम (palmy palm) बं०—ताल, श्रीताल । म०—ताड कांटे ताड । गु०—ताड, श्रीताड ।

× सं०—साल । हि०—सखुआ । बं०—शालगाछ । म०—रालेचावृक्ष । क०—सज्जरदामर । तै०—एप केटु । ता०—कुंगिलियम् । इं०—सालट्री (Saltree)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

+ बिल्वनामानि गुणाश्च—

बिल्वः शाण्डिल्यशैलूषौ मालूरश्रीफलावपि ।।५६।।
बालं बिल्वफलं बिल्वकर्कटी बिल्वपेशिका ।
ग्रहणीकफवातामशूलघ्नी बिल्वपेशिका ।।५७।।
बालं बिल्वफलं ग्राहि दीपनं पाचनं कटु ।
कषायोष्णं लघु स्निग्धं तिक्तं वातकफापहम्।।५८।।
पक्वं गुरु त्रिदोषं स्याद्दुर्जरं पूति मारुतम् ।
विदाहि विष्टंभकरं मधुरं वह्निमांद्यकृत् ।।५९।।

× कपित्थनामानि गुणाश्च—

कपित्थस्तु दधित्थः स्यात्तथा पुष्पफलः स्मृतः ।
कपिप्रियो दधिफलस्तथा दन्तशठोऽपि च ।।६०।।
कपित्थमामं संग्राहि कषायं लेखनं लघु ।
पक्वं गुरु तृषाहिक्काशमनं वातपित्तजित् ।।६१।।
स्वाद्वम्लं तुवरं कण्ठशोधनं ग्राहि दुर्जरम् ।

+ सं०—बिल्व, शाण्डिल्य, शैलूष, मालूर, श्रीफल। हि०—बेल, बिल्व । बं०—बिल्व । इं०—बेगालंकिन्स (Begalankinc)

× सं०--कपित्थ, दधित्थ । हि०—कैथ । बं०--कत्बेल म०--कँवट, कविठ । क०—बेललु । ते०--एलांगाकाया । इं०-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

× नारङ्गनामानि गुणाश्च—

नारङ्गो नागरङ्गः स्यात्त्वक्सुगन्धो मुखप्रियः ॥६२॥
नारङ्गं मधुराम्लं स्याद्रोचनं वातनाशनम् ।
अपरं त्वम्लमत्युष्णं दुर्जरं वातहृत्परम् ॥६३॥

+ तिन्दुकनामानि गुणाश्च—

तिन्दुकः स्फूर्जकः कालस्कन्धश्च शितिसारकः ।
स्यादामं तिन्दुकं ग्राहि वातलं शीतलं लघु ॥६४॥
पक्वं पित्तप्रमेहास्रश्लेष्मघ्नं मधुरं गुरु ।

वुड एपल, एलीफैंट एपल (Wood apple, elephant apple)

× सं०--नारंग, नागरंग, त्वक्सुगन्ध, मुखप्रिय । हि०-नारंगी। बँ०-नारंगीलेबु । म०-नारिंगीलिंबु। क०-माधवला। तै०--दयाकाया। ता०--किचिलि। इं०-ऑरेंज (orange)] फा०—नारंज । अ०—आरंज ।

+ सं०—तिन्दुक । हि०—तेन्दु । बँ०-गाव, तेंद । म०-टेंमुर्णी, आयन । गु०-टिबरवो । क०-रुंबरु । ते०-तमिक । ता०—तुबिक । इं०—एबोनी (Ebony) फा०—अबनुसुझाड ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

+ कुपीलुनामानि गुणाश्च—

तिन्दुकः कथितो यस्तु जलजो दीर्घपत्रकः ॥६५॥
कुपीलुः कुलकः काकतिन्दुकः कालपीलुकः ।
काकेन्दुर्विषतिन्दुश्च तथा मर्कटतिन्दुकः ॥६६॥
कुपीलु शीतलं तिक्तं वातलं मदकृल्लघु ।
पादव्यथाहरं ग्राहि कफपित्तविनाशनम् ॥६७॥

फलेन्द्रनामानि गुणाश्च—

फलेन्द्रः कथिता नन्दी राजजम्बूर्महाफला ।
तथा सुरभिपत्रा च महाजम्बूरपि स्मृता ॥६८॥
राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचकम् ।
क्षुद्रजम्बूः सूक्ष्मपत्रो नादेयी जलजम्बुकः ॥६९॥
जम्बूः संग्राहिणी रूक्षा कफपित्तास्रदाहजित् ।

× बदरनामानि गुणाश्च—

पुंसि स्त्रियां च कर्कन्धूर्बदरी कोलमित्यपि ॥७०॥
फेनिलं कुवलं घोण्टा सौवीरं बदरं महत् ।

+ सं०—कुपीलु, काकतिन्दुक। हि०—प्रकरतेंदुआ, काकतेंदु। बँ०—केंद, माकडा, गाव, माकतातेंदु। म०—काकटेंभुर्णी। गु०—काकटिबखो। तै०—तुमि। ता०—तुंबि।

× सं० बदरी, बदर, कर्कन्धु। हि०-बेर। बँ०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अजाप्रियः कुहाकोलिर्विषमो भयकण्टकः ॥७१॥

बदरविशेषाणां लक्षणगुणाश्च—

पच्यमानन्तु मधुरं सौवीरं बदरं महत् ।
सौवीरं बदरं शीतं भेदनं गुरु शुक्रलम् ॥७२॥
बृंहणं पित्तदाहास्रक्षयतृष्णानिवारणम् ।
सौवीरं लघुसम्पक्वं मधुरं कोलमुच्यते ॥७३॥
कोलं तु बदरं ग्राहि रुच्यमुष्णं च वातलम् ।
कफपित्तकरं चापि गुरु सारकमीरितम् ॥७४॥
कर्कन्धुः क्षुद्रबदरं कथितं पूर्वसूरिभिः ।
अम्लं स्यात्क्षुद्रबदरं कषायं मधुरं मनाक् ॥७५॥
स्निग्धं गुरु च तिक्तं च वातपित्तापहं स्मृतम् ।
शुष्कं भेद्यग्निकृत्सर्वं लघुतृष्णाक्लमास्रजित् ॥७६॥

+ प्राचीनामलकनामानि गुणाश्च—

प्राचीनामलकं लोके पानीयामलकं स्मृतम् ।
प्राचीनामलकं दोषत्रयजिज्ज्वरघाति च ॥७७॥

कुलफल, शियाकुल । म०—बोर । गु०—बोरडी । क०—येरनु । तै०—रेगु चेट्ट । ता०—रेयन्ति । इं०—जुजब (jujob) । फा०—कुजार । अ०—सीदर नवंक ।

Dr. Urmila Sharma Collection, Varanasi

+ सं०—प्राचीनामलक । हि०—पानी आमला । बं०—

CC0. In Public Domain. Digitizagtion by eGangotri

+ लवलीनामानि गुणाश्च—

सुगन्धमूला लवली पाण्डुकोमलवल्कला।
लवलीफलमश्मार्शःकफपित्तहरं गुरु ॥७८॥
विशदं रोचनं रूक्षं स्वाद्वम्लं तुवरं रसे।

× करमर्दकरमर्दिकानामानि गुणाश्च—

करमर्दः सुषेणः स्यात्कृष्णपाकफलस्तथा ॥७९॥
तस्माल्लघुफला या तु सा ज्ञेया करमर्दिका।
करमर्दद्वयं त्वाममम्लं गुरु तृषापहम् ॥८०॥
उष्णं रुचिकरं प्रोक्तं रक्तपित्तकफप्रदम्।
तत्पक्वं मधुरं रुच्यं लघुपित्तसमीरजित् ॥८१॥

पानी आमला। म०—पाण आमले। गु०—पाणि आंवला। इं०—फ्लाकोर्शिया केटाफ्राक्टा (Flacourtiacataphracta)

+ सं०—लवली। हि०—हरफारेवड़ी। बं०—नोयाड, नीयाल। न०—काथ आँवले। गु०—खाटी आँवली।

× सं०—करमर्दक, सुषेण। हि०—करौंदा। बं०—करंचा। म०—गोडाकरवंदा। गु०—करमदी। क०—करिजिगे। इं०—जरमाइन फ्लावर्डकेरिसा (Jurmine Flowered-carisa)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

+ प्रियालनामानि गुणाश्च—

प्रियालस्तु खरस्कन्धश्चारारो बहुवल्कलः ।
राजादनं तापसेष्टः सन्नकर्दुर्धनुः पटः ॥८२॥
चारस्तु पित्तकासघ्नस्तत्फलं मधुरं गुरु ।
स्निग्धं सरं मरुत्पित्तदाहज्वरतृषापहम् ॥८३॥
प्रियालमज्जा मधुरा वृष्या पित्तानिलापहा ।
हृद्योऽतिदुर्जरः स्निग्धो विष्टम्भी चामवर्द्धनः ॥८४॥

× राजादननामानि गुणाश्च—

राजादनः फलाध्यक्षो राजन्या क्षीरिकापि च ।
क्षीरिकायाः फलं वृष्यं बल्यं स्निग्धं हिमं गुरु ॥८५॥
तृष्णामूर्छामदभ्रान्तिक्षयदोषत्रयास्रजित् ।

+ सं०—प्रियाल, खरस्कंध । हि०—चिरौंजी, पियाल । म०—चारोली । क०—चारबीज । ते०—सारुपय । ता०—काटमरा । फा०—बुकलेभाजा । अ०—हबुस्सनामा ।

× सं०—राजादन, फलाध्यक्ष । हि०—खिन्नी । बँ०—राजणी । म०—खिरणी । गु०—रायण । क०—खेले मारिले । मा०—पल्ल । इँ० - आब्ट्यूज़ लीव्ड माइमुसोप्स (obtuse leaved mimusops)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ विकंकतनामानि गुणाश्च—

विकंकतः स्रुवावृक्षो ग्रन्थिलः स्वादुकण्टकः ॥८६॥
स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि ।
विकंकतफलं पक्वं मधुरं सर्वदोषजित् ॥८७॥

× पद्मबीजनामानि गुणाश्च—

पद्मबीजं तु पद्माक्षं गालोड्यं पद्मकर्कटी ।
पद्मबीजं हिमं स्वादु कषायं तिक्तकं गुरु ॥८८॥
विष्टम्भि वृष्यं रूक्षं च गर्भस्थापनकं परम् ।
कफवातहरं बल्यं ग्राहि पित्तास्रदाहनुत् ॥८९॥

× मखान्ननामानि गुणाश्च—

मखान्नं पद्मबीजाभं पानीयफलमित्यपि ।

❀ सं०—विकंकत । हि०—कंटाई । बँ०—बइंचि-गाछ । म०—देहड्याचें फल । गु०—विकली । क०—हलुमाणिका, मालेगु । तै०—कानवेगुचेट्ट ।

× सं०—पद्मबीज, पद्माक्ष, गालोड्या । हि०—कमलगट्टा । बँ०—पद्मबीचि । म०—कमलाक्ष । तै०—तामरकाडा । गु०—कमलकांजडी । क०—पद्माक्ष ।

× सं०—मखान्न, पद्मबीजाभ । हि०—मखाना । बँ०—मखाना । म०—मखाणे । गु०—मखाना ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

मखान्नं पद्मबीजस्य गुणैस्तुल्यं विनिर्दिशेत् ॥९०॥

× शृङ्गाटकनामानि गुणाश्च—

शृङ्गाटकं जलफलं त्रिकोणफलमित्यपि ।
शृङ्गाटकं हिमं स्वादु गुरु वृष्यं कषायकम् ॥९१॥
ग्राहि शुक्रानिलश्लेष्मप्रदं दाहास्रपित्तनुत् ।

कुमुदबीजनामानि गुणाश्च—

उक्तं कुमुदबीजं तु बुधैः कैरविणीफलम् ॥९२॥
भवेत्कुमुद्वतीबीजं स्वादु रूक्षं हिमं गुरु ।

❀ मधूकजलमधूकनामानि गुणाश्च—

मधूको गुडपुष्पः स्यान्मधुपुष्पो मधुस्रवः ॥९३॥
वानप्रस्थो मधुष्ठीलो जलजोऽत्र मधूलकः ।
मधूकपुष्पं मधुरं शीतलं गुरु बृंहणम् ॥९४॥

× सं०—शृङ्गाटक, जलफल । हि०—सिंघाड़ा । बँ०—पाणिफल । म०—शिंगाड़े । गु०—शिंगोड़ा । क०—सिंघाड़े । तै०—परिकेगड्डु । इं०—वाटरकेलट्राप (water caltrop) । फा०—सुरंजान ।

❀ सं०—मधूक, जलमधूक, गुडपुष्प । हि०—महुआ, जलमहुआ । बँ०—मउल । म०—मोहवृक्ष । गु०—महुओ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बलशुक्रकरं प्रोक्तं वातपित्तविनाशनम् ।
फलं शीतं गुरु स्वादु शुक्रलं वातपित्तनुत् ॥९५॥
अहृद्यं हन्ति तृष्णास्रदाहश्वासक्षतक्षयान् ।

पालेवतनामानि गुणाश्च—

पालेवतांसतं पुष्पैस्तिन्दुकाभं फलं मतम् ॥९६॥
अन्यन्माणवकं ज्ञेयं महापालव्रतं तथा ।
स्वाद्वम्लं शीतमुष्णं च द्विधा पालेवतं गुरु ॥९७॥
यत् स्वादु मधुरं शीतं तदम्लं च तदुष्णकम् ।

परूपकनामानि गुणाश्च—

परुपकं परूपकमल्पास्थि च परापरम् ॥९८॥
परूपकं कषायाम्लमामं पित्तकरं लघु ।
तत्पक्वं मधुरं पाके शीतं विष्टम्भि बृंहणम् ॥९९॥
हृद्यं तु पित्तदाहास्रज्वरक्षयसमीरजित् ।

+ तूतनामानि गुणाश्च—

तूदस्तूतं च यूषश्च क्रमुको ब्रह्मदारु च ॥१००॥

क०—महूइप्पे । तै०—इपा, पिन्ना, कटइल्लुपि । इं०—एल्लपट्री (Elooptree) । फा०—चक्कां ।

+ सं०-तूत । हि०-तूत, सहतूत । बं०-पलाशपिपुल ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitized by eGangotri

तूतं पक्वं गुरु स्वादु हिमं पित्तानिलापहम्।
तदेवामं गुरु सरमम्लोष्णं रक्तपित्तकृत् ॥१०१॥

❀ दाडिमनामानि गुणाश्च—

दाडिमः करको दन्तबीजो लोहितपुष्पकः।
तत्फलं त्रिविधं स्वादु स्वाद्वम्लं केवलाम्लकम् ॥
तत्तु स्वादु त्रिदोषघ्नं तृड्दाहज्वरनाशनम्।
हृत्कण्ठमुखरोगघ्नं तर्पणं शुक्रलं लघु ॥१०३॥
कषायानुरसं ग्राहि स्निग्धं मेधाबलावहम्।
स्वाद्वम्लं दीपनं रुच्यं किञ्चित्पित्तकरं लघु॥१०४॥
अम्लं तु पित्तजनकमामवातकफापहम्।

× बहुवारनामानि गुणाश्च—

बहुवारस्तु शीतः स्यादुद्दालो बहुवारकः ॥१०५॥

म०—तूते। गु०—शेतूल, तूत। ते०—कम्बलिचेट्टु। इं०—मुलबेरीज़ (Mulberies)। फा०—शातूत। अ०—तूत, तूतहल।

❀ सं०—दाडिम। हि०—अनार। बँ०—दाडिम। म०—डालिंब। गु०—दाडमन। क०—दालिंब। ते०—दालिंबचेट्टु। ता०—मादलइ चेट्टि। इं०—पंग्रानेट (pungranate)। फा०—अनार। अ०—रुमान-हामीज, रुमानहुल।

× सं०-बहुवार, श्लेष्मातक। हि०-लिसोड़ा, लभेरा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

शेलुः श्लेष्मातकश्चापि पिच्छिलो भूतवृक्षकः।
बहुवारो विषस्फोटव्रणवीसर्पकुष्ठनुत् ॥१०६॥
मधुरस्तुवरस्तिक्तः केश्यश्च कफपित्तहृत्।
फलमामं तु विष्टम्भि रूक्षं पित्तकफास्रजित् ।१०७।
तत्पक्वं मधुरं स्निग्धं श्लेष्मालं शीतलं गुरु।

❀ कतकनामानि गुणाश्च—

पयःप्रसादि कतकं कतकं तत्फलं च तत् ॥१०८॥
कतकस्य फलं नेत्र्यं जलनिर्मलताकरम्।
वातश्लेष्महरं शीतं मधुरं तुवरं गुरु ॥१०९॥

× द्राक्षानामानि गुणाश्च—

द्राक्षा स्वादुफला प्रोक्ता तथा मधुरसापि च।

बँ०—बहुवार। म०—मोकर। गु०—गुंदोमोटो, गुन्दीनानी। क०—चेलुगोंदिणी। तै०—नाकेरु, नुककेरु। ता०—बिड़ि। इँ०—नेरोलीव्ड सेपिस्टन (Narow leaved sepistun) फा०—सिपिस्तान। अ०—सेफिस्तान दवक।

❀ सं०—कतक। हि०—निर्मलीफल, पायपसारी। बँ०—निर्मलफल। म०—निर्मलीया बिया। गु०—निर्मली। क०—निल्लिकायि। इँ०—नट ह्विच क्लियर्स वाटर (Nut which clears water)

× सं०-द्राक्षा। हि०—दाख, मुनक्का, अंगूर। बँ०-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मृद्वीका हारहूरा च गोस्तनी चापि कीर्तिता ।११०।
द्राक्षा पक्वा शरा शीता चक्षुष्या बृंहणी गुरुः ।
स्वादुपाकरसा स्वर्य्या तुवरा सृष्टमूत्रविट्॥१११॥
कोष्ठमारुतहृद् वृष्या कफपुष्टिरुचिप्रदा ।
हन्ति तृष्णाज्वरश्वासवातवातास्रकामलाः॥ ११२॥
कृच्छ्रास्रपित्तसम्मोहदाहशोषमदात्ययान् ।
आमा स्वल्पगुरुर्गुर्वी सैवाम्ला रक्तपित्तकृत् ।११३।
वृष्या स्याद्गोस्तनी द्राक्षा गुर्वी च कफपित्तकृत् ।
अबीजाऽन्या स्वल्पतरा गोस्तनीसदृशा गुणैः ११४
द्राक्षा पर्वतजा लघ्वी साम्ला श्लेष्माम्लपित्तकृत् ।
द्राक्षा पर्वतजा यादृक् तादृशी करमर्दिका॥११५॥

❀ क्षुद्रखर्जूर-पिण्डखर्जूरनामानि—

भूमिखर्जूरिजा स्वाद्वी दुरारोहा मृदुच्छदा ।

किसमिस, वेदाना । म०-वेदाणा। मु०-धराख, किसमिस । क०-वैडगण द्राक्षे, चिकुद्राक्षे । तै०-किसमिस पोंडु । ता०-कोण्डुमण्डि रिप्यझाम् । इं०—ग्रेप (GraPe) । रोजिस (Rosins) फा०—अंगूर, मुनक्का । अ०—एनब्जवीव ।

❀ सं०—खर्ज्जूरी, पिण्डखर्ज्जूरी। हि०-खजूर, पिंड-खजूर, छोहारा । बं०—खेजूर, पिंडखेजूर । म०-शिंदी ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथा स्कन्धफला काककर्कटी स्वादुमस्तका।११६।

गुणाः—

पिण्डखर्जूरिका त्वन्या सा देशे पश्चिमे भवेत्।
खर्जूरी गोस्तनाकारा परद्वीपादिहागता॥११७॥
जायते पश्चिमे देशे सा छोहारेति कीर्तिता।
खर्जूरीत्रितयं शीतं मधुरं रसपाकयोः॥११८॥
स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु।
स्निग्धं रक्तपित्तघ्नं पुष्टिविष्टम्भशुक्रदम्॥११९॥
कोष्ठमारुतहृद्बल्यं वांतिवातकफापहम्।
ज्वरातिसारक्षुत्तृष्णाकासश्वासनिवारकम्॥१२०॥
मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्त्यकृत्।
महतीभ्यां गुणैरल्पा स्वल्पा खर्जूरिका स्मृता १२१
खर्जूरितरुतोयं तु मदपित्तकरं भवेत्।
वातश्लेष्मकरं रुच्यं दीपनं बलशुक्रकृत्॥१२२॥

पिण्डखर्जूरभेदनामानि गुणाश्च—

सुलेमानी तु मृदुला दलहीनफला च सा।

गु०—खजूरी, खारक। क०—इंचिलु, सिंह इंचिलु। तै०—इण्टाचेट्ट। इ०—डेटपाम (Date palm) फा०—तमरु-तव। अ०—खुर्मातर।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

सुलेमानीश्रमभ्रान्तिदाहमूर्च्छास्रपित्तहृत् ॥१२३॥

× वातादनामानि गुणाश्च—

वातादो वातवदरो स्यान्नेत्रोपमफलस्तथा ।
वाताद उष्णः सुस्निग्धो वातघ्नः शुक्रकृद्गुरुः १२४
वातादमज्जा मधुरो वृष्यः पित्तानिलापहः ।
स्निग्धोष्णः कफकृन्नेष्टो रक्तपित्तविकारिणाम् १२५

+ सेवनामानि गुणाश्च—

मुष्टिप्रमाणं बदरं सेवं शिम्बितिकाफलम् ।
सेवं समीरपित्तघ्नं बृंहणं कफकृद् गुरु ॥१२६॥
रसे पाके च मधुरं शिशिरं रुचिशुक्रकृत् ।

× अमृतफलनामानि गुणाश्च—

अमृतफलं लघु वृष्यं सुस्वादु त्रीन् हरेद्दोषान् ।

× सं०—वाताद । हि०—बदाम । बँ०—बादाम । म०—गोड बदाम, कडु बदाम । तै०—वेदम । ता०—नटवडुम । इँ०—स्वीट अल्मंड (sweet almond) बीटर अल्मण्ड (Bitter almond) फा०—लोजलहन्नु, लोजलमुर । फा०—बदमशीरीं, बदामतल्ख ।

+ सं०-महाबदर । हि०-सेव । बँ०-सेउ । म०-मोठेबोर । गु०-शेव । इँ०-एपल (Apple) फा०-सेव । अ०-तुफाह ।

× सं०-अमृतफल । हि०-अमरूद, बीह । म०-पेरू ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देशेषु मुद्गलानां बहुलं तल्लभ्यते लोकैः ॥१२७॥

× पीलुनामानि गुणाश्च—

पीलुर्गुडफलः स्रंसी तथा शीतफलोऽपि च॥१२८॥
पीलु श्लेष्मसमीरघ्नं पित्तलं भेदि गुल्मनुत्।
स्वादु तिक्तं च यत्पीलु तन्नात्युष्णं त्रिदोषहृत्।१२९।

❀ अक्षोटनामानि गुणाश्च—

पीलुः शैलभवोऽक्षोटः कन्दरालश्च कीर्तितः।
अक्षोटकोऽपि वातादसदृशः कफपित्तकृत् ॥१३०॥

गु०--जामफल। तै०–झामिपडु। इं०–गुवा ह्वाइट(Guava white) गुवारेड (guavared) फा०–अमरुत। अ०–कशमरी।

× सं०–पीलु। वृहत्पीलु। हि०–पीलु, बड़ा पीलु। बँ०–पीलुगाछ। म०–लघुपीलु, थोरपीलु। गु०—जाल्य, दोडुपीलु। तै०–गोलुगुचेट्टु। ता०–कोकु। इं०–मस्टर्ड ट्री आफ स्क्रिपचर (Mustard tree of scripture) फा०–दरख्ते मिस्वाक। अ०—ईराक।

❀ सं०-अक्षोट। हि० अखरोट। बँ० -आक्रोट। म० -अखरोट। गु०--अखोड। क०--आखोड। इं—वालनट (walnut) वेलगम वालनट (Belgumwalnut) फा०- चार्तगज। अ०--जोजअक्रुपं मगज़।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ बीजपूरनामानि गुणाश्च—

बीजपूरो मातुलुंगो रुचकः फलपूरकः ।
बीजपूरफलं स्वादु रसेऽम्लं दीपनं लघु ॥१३१॥
रक्तपित्तहरं कण्ठजिह्वाहृदयशोधनम् ।
श्वासकासारुचिहरं हृद्यं तृष्णाहरं स्मृतम् ॥१३२॥

बीजपूरभेदनामानि गुणाश्च—

बीजपूरोऽपरः प्रोक्तो मधुरो मधुकर्कटी ।
मधुकर्कटिका स्वाद्वी रोचनी शीतला गुरुः॥१३३॥
रक्तपित्तक्षयश्वासकासहिक्काभ्रमापहा ।

× जम्बीरद्वयनामानि गुणाश्च—

स्याज्जम्बीरो दन्तशठो जम्भजम्भीरजम्भलाः।१३४।
जम्बीरमुष्णं गुर्वम्लः वातश्लेष्मनिबन्धनुत् ।
शूलकासकफोत्क्लेशच्छर्दितृष्णामदोपजित्।१३५।
आस्यवैरस्यहृत्पीडावह्निमांद्यकृमीन्हरेत् ।
स्वल्पजम्बीरिका तद्वत्तृष्णाछर्दिनिवारणी॥१३६॥

❀ सं०-बीजपूर । हि०--बिजौरा । बं०--टावालेबु । म०—महाबुंग । ग०—बिजोरु लिंबु । इं०—साइट्रस (citrus) फा०—तुरंज । अ०--उतरंज ।

Dr. Urmila Sharma Collection, Varanasi

× सं०—जम्बीर, दन्तशठ । हि०--जंभीरी नीबू ।

CC0. In Public Domain. Digitization by eGangotri

निम्बूकनामानि गुणाश्च—

निम्बूः स्त्री निम्बुकं क्लीबे निम्पाकमपि। कीर्तितम्।
निम्बूकमम्लं वातघ्नं दीपनं पाचनं लघु ॥१३७॥

मिष्टनिम्बूकनामानि गुणाश्च—

मिष्टनिम्बूफलं स्वादु गुरु मारुतपित्तनुत्।
गलरोगविषध्वंसि कफोत्क्लेशि च रक्तकृत् ।१३८।
शोषारुचितृषाच्छर्दिहरं बल्यं च बृंहणम्।

❀ कर्मरंगगुणाः—

कर्मरङ्गं हिमं ग्राहि स्वाद्वम्लं कफवातहृत् ॥१३९॥

× अम्लिकानामानि गुणाश्च—

अम्लिका चुक्रिकाऽम्ली च चुक्रा दन्तशठापि च।

बँ०--जामीरलेबु। म०-एड लिंबू। गु०-कागदी लिंबू। क०-कचिले, कनिले। तै०-निम्मपेडु, जंभिरम्। इं०—लेमन्स (Lemons)। फा०—लिमुनेतुर्श, लिमुने शीरीं। अ०—लिमुने हामिज।

❀ सं०—कर्मरंग। हि०--कमरख। बँ०--कामरांगा। इं०—कैरम्बोला (Carambola)

+ सं०--तिन्निडी, अम्लिका। हि०—इमली। बँ०--

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अम्ला च चिंचिकाचिञ्चा तिन्तिडीका च तिन्तिडी ॥
अम्लिकाम्ला गुरुर्वातहरी पित्तकफास्रकृत् ।
पक्वा तु दीपनी रूक्षा सरोष्णा कफवातनुत् ।१४१।

❀ अम्लवेतसनामानि गुणाश्च—

स्यादम्लवेतसं चुक्रं शतवेधि सहस्रभित् ।
अम्लवेतसमत्यम्लं भेदनं लघु दीपनम् ॥१४२॥
हृद्रोगशूलगुल्मघ्नं पित्तलं लोमहर्षणम् ।
रूक्षं विण्मूत्रदोषघ्नं प्लीहोदावर्तनाशनम् ॥१४३॥
हिक्कानाहारुचिश्वासकासाजीर्णवमिप्रणुत् ।
कफवातामयध्वंसि छागमांसद्रवत्वकृत् ॥१४४॥
चणकाम्लगुणं ज्ञेयं लोहसूचीद्रवत्वकृत् ।

× वृक्षाम्लनामानि गुणाश्च—

वृक्षाम्लं तिन्तिडीकं च चुक्रं स्यादम्लवृक्षकम् ॥

तैंतुल । म०—चिंचा । गु०—आंबली । क०—हुणिसे । तै०—चिंपट । ता०—पुलि । इं०—टेमेरिंडट्री (Temarindtree) अ०—तमरहिंदी ।

❀ सं०—अम्लवेतस, चुका । हि०—अमलवेत । बं०—थैकड् । म०—चुका । गु०—अमलवेत । इं०—कामन सोरल (common soral) फा०—तर्पक ।

× सं०—वृक्षाम्ल । हि०—[illegible] । बं०—[illegible] ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृक्षाम्लमामम्लोष्णं वातघ्नं कफपित्तलम् ।
पक्वं तु गुरु संग्राहि कटुकं तुवरं लघु ॥१४६॥
अम्लोष्णं रोचनं रूक्षं दीपनं कफवातहृत् ।

चतुरम्ल-पञ्चाम्लनामानि गुणाश्च—

चतुरम्लं हि पञ्चाम्लं बृहज्जम्बीरनिम्बुकैः ॥१४७॥
चतुरम्लं हि पञ्चाम्लं बीजपूरयुतैर्भवेत् ।
फलेषु परिपक्वं यद्गुणवत्तदुदाहृतम् ॥१४८॥
बिल्वादन्यत्र विज्ञेयमामं तद्धि गुणाधिकम् ।
फलेषु सरसं यत्स्याद्गुणवत्तदुदाहृतम् ॥१४९॥
द्राक्षाबिल्वशिवादीनां फलं शुष्कं गुणाधिकम्।
फलतुल्यगुणं सर्वं मज्जानमपि निर्दिशेत् ॥१५०॥
फलं हिमाग्निदुर्वातव्यालकीटादिदूषितम् ।
अकालजं कुभूमीजं पाकातीतं न भक्षयेत् ॥१५१॥

इति फलवर्गः ।

म०—आमसोल । गु०—कोकम । क०—तित्तीडिक । इं०—कोकम बेदरुटी (Kokum batter tree) ।

Dr. Umma Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वटादिवर्गः ।

❀ तत्रादौ वटस्य नामानि गुणाश्च—

वटो रक्तफलः शुङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणावासो बहुपादो वनस्पतिः ॥१॥
वटः शीतो गुरुर्ग्राही कफपित्तव्रणापहः ।
वर्ण्यो विसर्पदाहघ्नः कषायो योनिदोषहृत् ॥२॥

† अश्वत्थनामानि गुणाश्च—

बोधिद्रुः पिप्पलोऽश्वत्थश्चलपत्रो गजाशनः ।
पिप्पलो दुर्जरः शीतः पित्तश्लेष्मव्रणास्रजित् ॥३॥
गुरुस्तुवरको रूक्षो वर्ण्यो योनिविशोधनः ।

❀ सं०—वट, रक्तफल । हि०—वड़, बरगद । बँ०—वट । म०—वड । गु०—वड । क०—आल । तै०—मारि । ता०—आल । इँ०—बेनिनयट्री (Banyntree) फा०—वडवाई । अ०—जातुदवाई बथआब ।

† सं०—अश्वत्थ । हि०—पीपल । बँ०—अश्वत्थ । म०—पिपल । गु०—पीपलो । क०—अरजी । तै०—राई चेट्टु । इँ०—पोल्पर लीव्ड फिग् ट्री (Polpar leaved figtree) फा०—दरख्त लरजाँ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ पलाशनामानि गुणाश्च—

पारिषोन्यः पलाशश्च फलीशश्च कमण्डलुः ॥४॥
गर्दभाण्डः कन्दरालकपीतनसुपार्श्वकाः ।
पारिषो दुर्जरः स्निग्धः कृमिशुक्रकफप्रदः ॥५॥
फलेऽम्लो मधुरो मूले कषायः स्वादुमञ्जकः ।

+ अश्वत्थभेदनामानि गुणाश्च—

नन्दीवृक्षोऽश्वत्थभेदः प्ररोही गजपादपः ॥६॥
स्थालीवृक्षः क्षीरितरुः क्षीरी च स्याद्वनस्पतिः ।
नन्दीवृक्षो लघुः स्वादुस्तिक्तस्तुवर उष्णकः ॥७॥
कटुपाकरसो ग्राही विषवित्तकफास्रजित् ।

❀ उदुम्बरनामानि गुणाश्च—

उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ॥८॥

❀ सं०—पारिष, पलाश। हि०-पारिस, पीपल, गजदंड। बँ०—गजशुण्डी। म०—पारसपिंपल भेंड़। गु०—पारसपिपलो। क०—बंगरली। तै०—घेनगाखी। ता०—पोरिश। इँ०--हिबिक्सस (Hibiscus) फा०—पलासवेल्य।

+ सं०—नन्दीवृक्ष, अश्वत्थभेद। हि०—बेलिया पीपल। तै०—बट्टि चेट्टु।

❀ सं०—उदुम्बर। हि०—गूलर। बँ०—यज्ञडुमुर।

Dr. Urmila Sharma Collection, Varanasi

CC-0. Public Domain. Digitized by eGangotri

उदुम्बरो हिमो रूक्षो गुरुः पित्तकफास्रजित् ।
मधुरस्तुवरो वर्ण्यो व्रणशोधनरोपणः ॥९॥

❀ मलयूनामानि गुणाश्च—

काकोदुम्बरिका फल्गुमलयूर्जघनेफला ।
मलयूस्तम्भकृत्तिक्ता शीतला तुवरा जयेत् ॥१०॥
कफपित्तव्रणश्वित्रपाण्ड्वर्शःकुष्ठकामलाः ।

+ प्लक्षभेदनामानि गुणाश्च—

प्लक्षो जटी पटी च कर्पटी च स्त्रियामपि ॥११॥
प्लक्षः कषायः शिशिरो व्रणयोनिगदापहः ।

यक-उम्बर। गु०-उम्बरो। क०-अत्ति। तै०-वाडुचेट्टु। इं०-केगट्री (Kegtree)। फा०-अंजीरे आदम। अ०-अमीज।

❀ सं—मलयू, काकोदुम्बरिका। हि०—कठूमर। बं०—काकडुमुर। म०—कालाउम्बर। गु०—टेडउम्बरो। क०—अकाअत्ति। तै०—ब्रह्ममेडिचेट्टु। इं०—(Kegtree) फा०—अजीरें दस्ती। अ०—तनवरि।

+ सं०-प्लक्ष, पर्कटी। हि०-पाखर, पाकड़। बं०-पाकुड गाछ। म०—पिंपरी। गु०—पीपर्य। क०-वसुरि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

दाहपित्तकफास्रघ्नः शोथहा रक्तपित्तहृत् ॥१२॥

❀ शिरीषनामानि गुणाश्च—

शिरीषो भण्डिलो भण्डी भण्डीरश्च कपीतनः।
शुकपुष्पः शुकतरुर्मृदुपुष्पः शुकप्रियः ॥१३॥
शिरीषो मधुरोऽनुष्णस्तिक्तश्च तुवरो लघुः।
दोषशोषविसर्पघ्नः कासव्रणविषापहः ॥१४॥

पञ्चवल्कलनामानि गुणाश्च—

न्यग्रोधोदुम्बराश्वत्थपारिषप्लक्षपादपाः।
पंचैते क्षीरिणो वृक्षास्तेषां त्वक् पञ्चवल्कलम् ॥
केचित्तु पारिषथाने शिरीषं वेतसं परे।
क्षीरिवृक्षा हिमा वर्ण्या योनिरोगव्रणापहाः ॥१६॥
रूक्षाः कषाया मेदोघ्ना विसर्पामयनाशनाः।
शोथपित्तकफास्रघ्नाः स्तन्या भग्नास्थियोजकाः ॥
त्वक्पञ्चकं हिमं ग्राहि व्रणशोथविसर्पजित्।
तेषां पत्रं हिमं ग्राहि कफवातास्रनुल्लघुः ॥१८॥
विष्टम्भाध्मानजित्तिक्तं कषायं लघु लेखनम्।

❀ सं०—शिरीष। हि०—सिरसा। बं०—चटका। म०—शिरसी। गु०—शरशडो। क०—शिरसु। तै०—दिरसन। फा०—दरख्ते जकरिया। अ०—सुलतानुल असज्जार।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ शालनामानि गुणाश्च—

शालस्तु सर्जकाश्याश्वकर्णकाः सस्यसम्बरः॥१९॥
अश्वकर्णः कषायः स्याद् व्रणस्वेदकफक्रिमीन्।
ब्रध्नविद्रधिबाधिर्य्ययोनिकर्णगदान्हरेत् ॥२०॥

शालभेदनामानि गुणाश्च—

सर्जकोऽन्योऽजकर्णः स्याच्छालो मरिचपत्रकः।
अजकर्णः कटुस्तिक्तः कषायोष्णो व्यपोहति ॥२१॥
कफपाण्डुश्रुतिगदान्मेहकुष्ठविषव्रणान्।

+ शल्लकीनामानि गुणाश्च—

शल्लकी गजभक्षा च सुवहा सुरभी रसा।
महेरुणा कुन्दुरुकी वल्लकी च बहुस्रवा ॥२२॥
शल्लकी तुवरा शीता पित्तश्लेष्मातिसारजित्।
रक्तपित्तव्रणहरी पुष्टिकृत्समुदीरिता ॥२३॥

❀ सं०—शाल। हि०—साल, साखू। बं०—लताशाल। म०—साजरा। क०—शिरसु। तै०—एपचेट्टु। ता०—कुंगिलियम्। इं०—सालट्री (Saltree)

+ सं०—शल्लकी। हि०—सलई। बं०—शलई। म०—शालई। गु०—शालेहु। क०—सबीकु। ता०—कुंलि।

Dr. Kamala Shanna Collection, Jamnagar

CC0. In Public Domain. Digitization by eGangotri

❀ शिंशपानामानि गुणाश्च—

शिंशपा पिच्छिला श्यामा कृष्णसारा च सा गुरुः।
कपिला सैव मुनिभिर्भस्मगर्भेति कीर्तिता ॥२४॥
शिंशपा कटुका तिक्ता कषाया शोथहारिणी।
उष्णवीर्य्या हरेन्मेदःकुष्ठश्वित्रवमिक्रिमीन् ॥२५॥
बस्तिरुग्व्रणदाहास्रवलासान् गर्भपातिनी ।

+ कुम्भनामानि गुणाश्च—

ककुभोऽर्जुननामा स्यान्नदीसर्जश्च कीर्तितः ॥२६॥
इन्द्रद्रुर्वीरवृक्षश्च वीरश्च धवलः स्मृतः।
ककुभो शीतलो हृद्यः क्षतक्षयविषास्रजित् ॥२७॥
मेदोमेहव्रणान् हन्ति तुवरः कफपित्तहृत् ।

❀ सं०—शिशंपा। हि०—शीशम। बँ०—शिशुगाछ। म०—कालाशिसवा। गु०—शिशम। क०—करीषहबिडु। ता०—पंशकेदरु। तै०—जिट्टरेगुचेट्टु। इँ०—सीसूट्री (Sisootree) अ०—सासम।

+ सं०—ककुभ, अर्जुन। हि०—कोह, कौह। बँ०—अर्जुनगाछं। म०—सारढोल। गु०—कडायो। तै०—महिचेट्टु, तारेमत्ति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ असननामानि गुणाश्च—

बीजकः पीतसारश्च पीतशालक इत्यपि ॥२८॥
बन्धूकपुष्पः प्रियकः सर्जकश्चासनः स्मृतः ।
बीजकः कुष्ठवीसर्पश्वित्रमेहगदक्रिमीन् ॥२९॥
हन्ति श्लेष्मास्रपित्तं च त्वच्यः केश्यो रसायनः ।

+ खदिरनामानि गुणाश्च—

खदिरो रक्तसारश्च गायत्री दन्तधावनः ॥३०॥
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः ।
खदिरः शीतलो दन्त्यः कण्डुकामारुचिप्रणुत् ॥३१॥
तिक्तः कषायो मेदोघ्नः क्रिमिमेहज्वरव्रणान् ।
श्वित्रशोथामपित्तास्रपांडुकुष्ठकफान् हरेत् ॥३२॥

❀ सं०—असन । हि०—आसन, विजयसार । बँ०—पियाशाल । म०—विवड़ा । गु०—वीयाँ । क०—केपिन्न होने । तै०—मद्दि । इँ०—इण्डियन किनोट्री (Indian kinotree) फा०—कमरकस ।

+ सं०—खदिर । हि०—खैर (कत्था) । बँ०—खयेरगाछ । म०—खैर । गु०—खैरियो । क०—कंपिन खैर । तै०—चंडचेटट ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ श्वेतखदिरनामानि गुणाश्च—

खदिरः श्वेतसारोऽन्यः कदरः सोमवल्कलः ।
खदिरो विशदो वर्ण्यो मुखरोगकफास्रजित् ॥३३॥

× इरिमेदनामानि गुणाश्च—

इरिमेदो विट्खदिरः कालस्कन्धोऽरिमेदकः ।
इरिमेदः कषायोष्णो मुखदन्तगदास्रजित् ॥३४॥
हन्ति कण्डूविषश्लेष्मकृमिकुष्ठविषव्रणान् ।

+ रोहितकनामानि गुणाश्च—

रोहीतको रोहितको रोहो दाडिमपुष्पकः ॥३५॥
रोहीतकः प्लीहघाती रुच्यो रक्तप्रसादनः ।

❀ सं०—खदिरसार । हि०—खैरसार (कत्था) बँ०—खयेर । म०—नार । गु०—खैरसार काथो । क०—काथ । इँ०—केटेच्यु (Catechu) । फा०—कात । अ०—कात ।

× सं०—इरिमेद, विट् खदिर । हि०—दुर्गंधिखैर । बँ०—गुयेवाब्ला । म०—शेण्याखैर । गु०—इरिमेद । इँ०—स्पंजट्री (Spange tree)

+ सं०—रोहितक । हि०—रोहेग । बँ०—रयना । म०—रक्तरोहिंडो । गु०—रगतरोहिडो । क०—परड्डमलु । तै०—मुलुमोडुचेट्टु ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

❀ किङ्किरातनामानि गुणाश्च—

बबूलः किंकिरातः स्यात्किंकराटः सपीतकः ॥३६॥
स एव कथितस्तज्ज्ञैराभापट्पदमादनी ।
बबूलः कफनुद्ग्राही कुष्ठक्रिमिविषापहः ॥३७॥

× अरिष्टकनामानि गुणाश्च—

अरिष्टकस्तु माङ्गल्यः कृष्णवर्णोऽर्थसाधनः ।
रक्तबीजः पीतफेनः फेनिलो गर्भपातनः ॥३८॥
अरिष्टकस्त्रिदोषघ्नो ग्रहजिद्गर्भपातनः ।

+ पुत्रजीवनामानि गणाश्च—

पुत्रजीवो गर्भकरो यष्टी पुष्पोऽर्थसाधकः ॥३९॥

❀ सं०—बबूल, किंकिरात । हि०—बबूर । बँ०—बाब्लागाछ । म०—बालीम । गु०—बाबल । क०—पुलई । तै०—तल्लतुम्म । इं०—एकेसिया ट्री (Acacia-tree) फा०—मुगिलागोन । अ० – अमुगिलाँ सिमग ।

× सं०—अरिष्टक । हि०—रीठा । बँ०—रिटेगाछ । म०—रिठा । गु०—अरिठा । तै०—कुकुड । इं०—सोपबेरी, सोपनट (Soapbery, Soapnut) फा०—फिंदक हिंदी । अ०—डुंदक ।

+ सं०—पुत्रजीव । हि०—पितौजिया । बँ०—पुत-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुत्रजीवो गुरुर्वृष्यो गर्भदः श्लेष्मवातहृत् ।
सृष्टमूत्रमलो रूक्षो हिमः स्वादुः पटुः कटुः ॥४०॥

❀ इङ्गुदनामानि गुणाश्च—

इङ्गुदोऽङ्गारवृक्षश्च तिक्तकस्तापसद्रुमः ।
इङ्गुदः कुष्ठभूतादिग्रहव्रणविषक्रिमीन् ॥४१॥
हन्त्युष्णः श्वित्रशूलघ्नस्तिक्तकः कटुपाकवान् ।

† जिङ्गिनीनामानि गुणाश्च—

जिंगिनी झिंगड़ी झिंगी सनिर्य्यासा प्रमोदिनी ॥
जिंगिनी मधुरा सोष्णा कषाया योनिशोधिनी ।
कटुका व्रणहृद्रोगवातासीसारहृत्पटुः ॥४३॥

× तमालनामानि गुणाश्च—

तमालः शालवद्वेद्यो दाहविस्फोटहृत्पुनः ।

जिया । म०—पुत्रजीवकवृक्ष । गु०—पुत्रजीवक । 'क०-पुत्रजीव । तै०—शीशा ।

❀ सं०—इंगुद । हि०—गोंदी । बँ०—इंगोट । म०—हिंगणबेट । गु०—इंगोरियो । तै०—गरा । इँ०—डेलिल (Delil) अ०—हिलेलजे ।

† सं०—जिंगिनी । हि०—जिंगिणी । म०—मोई । गु०—मवेडी । क०—ओरीध ।

× सं०—तमाल । हि०—श्यामतमाल । बँ०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तुणी तुन्नक आपीतः तुणिकः कच्छपस्तथा ॥४४॥
कुठेरकः क्रान्तलको नन्दीवृक्षश्च नन्दकः ।
तुणीरुक्तः कटुः पाके कषायो मधुरो लघुः ॥४५॥
तिक्तो ग्राही हिमो वृष्यो व्रणकुष्ठास्रपित्तजित् ।

❀ भूर्जपत्रनामानि गुणाश्च—

भूर्जपत्रः स्मृतो भूर्जश्चर्मी बहुलवल्कलः ॥४६॥
भूर्जो भूतग्रहश्लेष्मकर्णरुक्पित्तरक्तजित् ।
कषायो राक्षसघ्नश्च मेदोविषहरः परः ॥४७॥

× पलाशनामानि गुणाश्च—

पलाशः किंशुकः पर्णो याज्ञिको रक्तपुष्पकः ।
क्षारश्रेष्ठो वातहरो ब्रह्मवृक्षः समिद्वरः ॥४८॥
पलाशो दीपनो वृष्यः सरोष्णो व्रणगुल्मजित् ।
कषायः कटुकस्तिक्तः स्निग्धो गुदजरोगजित् ॥

तमालगाछ । म०—तमालवृक्ष । गु०—तमाल । तै०—तमालु ।

❀ सं०—भूर्जपत्र । हि०—भोजपत्र । बँ० - भूर्जिपत्र । गु०—भोजपत्र । क०—भोजपत्र । इं०—जेकुएमोटी (Jacquemoti)

× सं०—पलाश । हि०—परास, ढाक, टेसू । बँ०—पलाश गाछ । म०—पलास । गु०—खाखरो । क०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भग्नसन्धानकृद्दोषग्रहण्यर्शःकृमीन् हरेत् ।

❀ शाल्मलीनामानि गुणाश्च—

शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीति च ॥
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी ।
शाल्मलिः शीतला स्वाद्वी रसे पाके रसायनी ॥५१॥
श्लेष्मला पित्तवातास्रहारिणी रक्तपित्तजित् ।

× मोचरसनामानि गुणाश्च—

निर्यासःशाल्मलेःपिच्छा शाल्मलिर्वेष्टिकाऽपि च ॥
मोचास्रावो मोचरसो मोचनिर्य्यास इत्यपि ।
मोचास्रावो हिमो ग्राही स्निग्धो वृष्यः कषायकः ॥
प्रवाहिकातिसारामकफपित्तास्रदाहनुत् ।

मुत्तालु । तै०—मातुकाचेट्टु । ता०—पराशन् । इँ०—डाउनीब्रांच ब्युटिया (Dawny branch butea)

❀ सं० - शाल्मली, मोचा । हि०—सेमर ।

× सं०—मोचरस, मोचनिर्यास । हि०—सेमरकी गोंद । बँ०—शिमुलेर आठा । म०—सांवरी चा डीक । गु०—मोचरस । क०—यवलवदमर । तै०—रुगचेट्टु । ता०—पुला । इँ०—जूस आफ सिल्ककाटनट्री (Juce of silkcottontree)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitized by eGangotri

कूटशाल्मलिनामानि गुणाश्च—

कुत्सिता शाल्मलिः प्रोक्ता रोचना कूटशाल्मलिः ॥
कूटशाल्मलिका तिक्ता कटुका कफवातनुत् ।
मेद्युष्णा प्लीहजठरयकृद्गुल्मविषापहा ॥५५॥
भूतानाहविबन्धास्रमेदःशूलकफापहा ।

❀ धवनामानि गुणाश्च—

धवो धटो नन्दतरुः स्थिरो गौरो धुरन्धरः ॥५६॥
धवः शीतः प्रमेहार्शःपाण्डुपित्तकफापहः ।
मधुरस्तुवरस्तस्य फलं च मधुरं मनाक् ॥५७॥

+ धन्वङ्गनामानि गुणाश्च—

धन्वङ्गस्तु धनुर्वृक्षो गोत्रवृक्षस्तु तेजनः ।
धन्वङ्गः कफपित्तास्रकासहृत्तुवरो लघुः ॥५८॥
बृंहणो बलकृद्रूक्षः सन्धिकृद्व्रणरोपणः ।

× करीरनामानि गुणाश्च—

करीरः क्रकरो पत्रो ग्रन्थिलो मरुभूरुहः ॥५९॥

❀ सं०—धव । हि०—धौ । बँ०—धाउयागाछ । म०—धावड़ागाछ । गु०—धावड़ो । क०—सिरिवरु ।
+ सं०—धन्वंग, धनुर्वृक्ष । हि०-रक्तकुसुम, धामन ।
× सं०—करीर । हि०—करील । बँ०—कचड़ा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

करीरः कटुकस्तिक्तः स्वेद्युष्णो भेदनः स्मृतः ।
दुर्नामकफवातामगरशोथव्रणप्रणुत् ॥६०॥

शाखोटनामानि गुणाश्च—

शाखोटः पीतफलको भूतावासः खरच्छदः ।
शाखोटो रक्तपित्तार्शोवातश्लेष्मातिसारजित् ॥६१॥

† वरुणनामानि गुणाश्च—

वरुणो वरणः सेतुस्तिक्तशाकः कुमारकः ।
कषायो मधुरस्तिक्तः कटुको रूक्षको लघुः ॥६२॥

× कटभीनामानि गुणाश्च—

कटभी स्वादुपुष्पा च मधुरेणुः कटम्भरा ।
कटभी तु प्रमेहार्शोनाडीव्रणविषक्रिमीन् ॥६३॥
अत्युष्णा कफकुष्ठघ्नी कटू रूक्षा च कीर्तिता ।
तत्फलं तुवरं ज्ञेयं विशेषात्कफशुक्रहृत् ॥६४॥

म०—नेवती । क०—तिप्पतिगे । तै०—कवरकुराक ।
इं०—केपर (Caper) फा०—कबार ।

† सं०—वरुण । हि०—वरना । बँ०—वरुणगाछ ।
म०—वायवरणा । गु०—वरणो । क०—मदनसले ।
तै०—उसट्टि । ता०—मरलिंगम् ।

× सं०—कटभी । हि०—करही । म०—[illegible] भा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

गोलीढनामानि गुणाश्च—

मोचस्तु मोक्षकोऽपि स्याद्गोलीढो गोलिहस्तथा।
क्षारश्रेष्ठः क्षारवृक्षो द्विविधः श्वेतकृष्णकः ॥६५॥
मोचकः कटुकस्तिक्तो ग्राह्युष्णः कफवातहृत्।
विषमेदोगुल्मकण्डूबस्तिरुक्क्रिमिशुक्रकृत् ॥६६॥

❀ अंबुशिरीषिकानामानि गुणाश्च—

शिरीषिका डिंडिणिका दुर्वलांबुशिरीषिका।
त्रिदोषविषकुष्ठार्शोहरी वारिशिरीषिका ॥६७॥

× शमीनामानि गुणाश्च—

शमी सक्तुफला तुंगा केशहन्त्री फला शिवा।
माङ्गल्या च तथा लक्ष्मीःशमीरः साल्पिका स्मृता॥
शमी तिक्ता कटुः शीता कषाया रेचनी लघु।
कफकासभ्रमश्वासकुष्ठार्शःक्रिमिजित्स्मृता ॥६९॥

गु०—वापुंगा। क०—वेल्लाल। इं०—केरीज ट्री। (careystree)।

❀ सं०—अम्बुशिरीषिका। हि०—जलसिरस। म०—जलसिरसी।

× सं०—शमी। हि०—छोंकर, छिकुर। बँ०—शाँह। म०—थोरशमी। गु०—खिजड़ी। क०—बनि। ते०—शमीचेट्टु। इं०—स्पंज ट्री (Spung tree)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

❀सप्तपर्णनामानि गुणाश्च—

सप्तपर्णो विशालत्वक् शारदो विषमच्छदः।
सप्तपर्णो व्रणश्लेष्मवातकुष्ठास्रजंतुजित् ॥७०॥
दीपनः श्वासगुल्मघ्नः स्निग्धोष्णस्तुवरः सरः।

× तिनिशनामानि गुणाश्च—

तिनिशः स्यंदनो नेमी रथद्रुर्वंजुलस्तथा ॥७१॥
तिनिशः श्लेष्मपित्तास्रभेदःकुष्ठप्रमेहजित्।
तुवरः श्वित्रदाहघ्नो व्रणपांडुक्रिमिप्रणुत् ॥७२॥

भूमिसहानामानि गुणाश्च—

भूमीसहो द्वारदारुर्नरिदारुः स्वरच्छदः।
भूमीसहस्तु शिशिरो रक्तपित्तप्रसादनः ॥७३॥

इति वटादिवर्गः।

❀ सं०-सप्तपर्ण, शारद। हि०-छतिवन। बँ०-छेतेल। म०-सात्विण। गु०-सतपर्ण। क०-लेलेग। तै०-एडाकुल।

× सं०—तिनिश। हि०—तिनसुना। बँ०—तिनाश, सादन। मि०—तिवस। गु०—हर्मो।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धातुवर्गः ।

तत्र धातूनां संख्या गुणाश्च

स्वर्णं रूप्यं च ताम्रं च वङ्गं यसदमेव च ।
सीसं लोहं च सप्तैते धातवो गिरिसंभवाः ॥१॥
वलीपलितखालित्यं कार्श्याऽबल्यजरामयान् ।
निवार्य देहं दधति नृणां तद्धातवो मताः ॥२॥

सुवर्णोत्पत्तिलक्षणम्—

पुरा निजाश्रमस्थानां सप्तर्षीणां जितात्मनाम् ।
पत्नीर्विलोक्य लावण्यलक्ष्मीसंपन्नयौवनाः ॥३॥
कंदर्पदर्पविध्वस्तचेतसो जातवेदसः ।
पतितं यद्धरापृष्ठे रेतस्तद्धेमतामगात् ॥४॥

❀ सुवर्णनामानि—

स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् ।
तपनीयं च गांगेयं कलधौतं भर्म कांचनम् ॥५॥
चामीकरं शातकुम्भं तथा कार्तस्वरं च तत् ।

❀ सं०—सुवर्ण, स्वर्ण। हि०—सोना। बँ०—सोना। म०—सोनें। गु०-सोनु। क०-चिन्ना। तै०-भंगारं। इं०—गोल्ड (Gold) फा०—तिला। अ०—जहब।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जांबूनदं जातरूपं महारजतमित्यपि ॥६॥
रुक्मं लोहवरं चाग्निबीजं चांपेयकर्बुरम् ।
अष्टापदं च रसजं तैजसं चापि कीर्तितम् ॥७॥
प्राकृतं सहजं वह्निसंभूतं खनिसंभवम् ।
रसेंद्रवेधसं जातं स्वर्णं पंचविधं स्मृतम् ॥८॥
दाहे रक्तं सितं छेदे निकषे कुंकुमप्रभम् ।
तारशुल्वोज्झितं स्निग्धं कोमलं गुरु हेम सत् ॥९॥
तच्छ्वेतं कठिनं रूक्षं विवर्णं समलं दलम् ।
दाहे छेदे सितं श्वेतं कषे त्याज्यं लघु स्फुटम् ॥१०॥
सुवर्णं शीतलं वृष्यं बल्यं गुरु रसायनम् ।

गुणाः—

स्वादु तिक्तं च तुवरं पाके तु स्वादु पिच्छिलम् ।११।
पवित्रं बृंहणं नेत्र्यं मेधास्मृतिमतिप्रदम् ।
हृद्यमायुष्करं कांतिवाग्विशुद्धिस्थिरत्वकृत् ॥१२॥
विषद्वये क्षयोन्मादत्रिदोषज्वरशोषजित् ॥१३॥
बलं सवीर्य्यं हरते नराणां रोगव्रजान् पोषयतीह काये।
असौख्यकार्य्येव सदा सुवर्णमशुद्धमेतन्मरणं च कुर्य्यात् ॥१४॥

असम्यग्धारितं स्वर्णं बलं वीर्य्यं च नाशयेत् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

करोति रोगान् मृत्युं च तद्धन्याद्यत्नतस्ततः॥१५॥

❀ रजतनामानि—

त्रिपुरस्य वधार्थाय निर्निमेषविलोचनैः ॥
निरीक्षयामास शिवः क्रोधेन परिपूरितः ।
अग्निस्तत्कालमपतत्तस्यैकस्माद्विलोचनात् ॥१६॥
ततो रुद्रः समभवद्वैश्वानर इव ज्वलन् ।
द्वितीयादपतन्नेत्रादश्रुबिंदुस्तु वामकात् ॥१७॥
तस्माद्रजतमुत्पन्नमुक्तं कर्मसु योजयेत् ।
रजतं त्रिविधं प्रोक्तं सहजं खनिजकृत्रिमे ॥१८॥
कृत्रिमं च भवेत्तद्धि वङ्गादिरसयोगतः ।
रूप्यं तु रजतं तारं चन्द्रकांतिसमप्रभम् ॥१९॥
वसूत्तमं च कुप्यं च खर्जूरं रङ्गबीजकम् ।
गुरु स्निग्धं मृदु श्वेतं दाहे छेदे घनक्षमम् ॥२०॥
वर्णाढ्यं चन्द्रवत्स्वच्छं रूप्यं नवगुणं शुभम् ।
कठिनं कृत्रिमं रूक्षं रक्तं पीतदलं लघु ॥२१॥
दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्तितम् ।

❀ सं०—रूप्यक । हि०—चाँदी, रूपा । बँ०—रूपा । म०—रुपें । गु०—रूपुं । क०—वेल्लि । तै०—एण्डी । इँ०—सिल्वर (silver) फा०—नुक्रा । अ०—फिद्दा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रूप्यं तिक्तं कषायाम्लं स्वादु पाकरसं सरम् ॥२२॥
वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित् ।
प्रमेहादिकरोगांश्च नाशयत्यचिराद्ध्रुवम् ॥२३॥
तारं शरीरस्य करोति तापं विड्बन्धनं यच्छति शुक्रनाशम्
वीर्यं बलं हंति तनोस्तु पुष्टिं महागदान्पोषयति ह्यशुद्धम्

❀ ताम्रनामानि गुणाश्च—

शुक्रं यत्कार्तिकेयस्य पतितं धरणीतले ।
तस्मात्ताम्रं समुत्पन्नमिदमाहुः पुराविदः ॥२५॥
ताम्रमौदुंबरं शुल्वमुदुम्बरमपि स्मृतम् ।
रविप्रियं म्लेच्छमुखं सूर्य्यपर्यायनामकम् ॥२६॥
जपाकुसुमसंकाशं स्निग्धं मृदु घनक्षमम् ।
लोहं नामोज्झितं ताम्रं मारणाय प्रशस्यते ॥२७॥
कृष्णं रूक्षमतिस्तब्धं श्वेतं चापि घनासहम् ।
लोहनागयुतं चेति शुल्वं दुष्टं प्रकीर्तितम् ॥२८॥
ताम्रं कषायं मधुरं च तिक्तमम्लं च पाकेकटुसारकं च ।
पित्तापहं श्लेष्महरं च शीतं तद्रोपणं स्याल्लघुलेखनं च

❀ सं०-ताम्र । हि०-तामा । बँ०—तामा । म०—तांबे । गु०-तांबो । क०-ताम्र । तै०-रागी । ता०-तांब्रम् । इं०—कापर (Copper) । फा०-मिस । अ०—नुहास ।

Dr. Urmila Sharma Collection, Varanasi

0. In Public Domain. Collection by eGangotri

पांडूदरार्शोज्वरकुष्ठकासश्वासक्षयान्पीनसमम्लपित्तम्
शोथं कृमिं शूलमपाकरोति प्राहुः परे बृंहणमल्पमेतत्
न विषं विषमित्याहुस्ताम्रं तु विषमुच्यते ।
एको दोषो विषे ताम्रे त्वष्टौ दोषाः प्रकीर्तिताः ॥३१॥
दाहः स्वेदोऽरुचिर्मूर्च्छा क्लेदो रेको वमिर्भ्रमिः ।

+ वंगनामानि गुणाश्च—

रंगं वंगं त्रपु प्रोक्तं तथा पिच्चटमित्यपि ॥३२॥
खुरकं मिश्रकं चापि द्विविधं वंगमुच्यते ।
उत्तमं खुरकं तत्र मिश्रकं त्ववरं मतम् ॥३३॥
रंगं लघु सरं रुक्षमुष्णं मेहकफक्रिमीन् ।
निहन्ति पाण्डुं सश्वासं चक्षुष्यं पित्तलं मनाक् ॥३४॥
सिंहो यथा हस्तिगणंनिहन्तितथवंगोऽखिलमेहवर्गम्
देहस्य सौख्यं प्रबलेन्द्रियत्वंनरस्यपुष्टिंविदधातिनूनम्

× यसदनामानि गुणाश्च—

यसदं रंगसदृशं रीतिहेतुश्च तन्मतम् ।

+ सं०—रंग, वंग । हि०—रांगा । बँ०—रांगा, वंग । म०—कथील । गु०—कलई । क०—तवर । तै०—तगरमु । इँ०—टिन (Tin) । फा०—अरजीज । अ०—रुसास ।

× सं०—यसद । हि०—जस्त, जस्ता । बँ०—दस्ता ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यसदं तुवरं तिक्तं शीतलं कफपित्तहृत् ॥३६॥
चक्षुष्यं परमं मेहान्पाण्डुं श्वासं च नाशयेत् ।

❀ सीसकनामनि गुणाश्च—

दृष्ट्वा भोगिसुतां रम्यां वासुकिस्तु मुमोच यत् ॥३७॥
वीर्य्यं जातस्ततो नागः सर्वरोगापहो नृणाम् ।
सीसं ब्रध्नं च वप्रं च योगेष्टं नागनामकम् ।
सीसं वंगगुणं ज्ञेयं विशेषान्मेहनाशनम् ॥३८॥

नागस्तु नागशततुल्यबलं ददाति
व्याधिं विनाशयति जीवनमातनोति ।
वह्निं प्रदीपयति कामबलं करोति
मृत्युं च नाशयति संततसेवितः सः ॥३९॥
पाकेन हीनौ किल वंगनागौ
कुष्ठानि गुल्मांश्च तथातिकष्टान् ।
पाण्डुप्रमेहानलसादशोथ
भगंदरादीन् कुरुतः प्रभुक्तौ ॥४०॥

म०—जस्त । गु०—जसत । तै०—खर्परं । इं०—जिंक (Zinc) फा०—सनतुतिया । अ०—शब्हा ।

❀ सं०—सीसक । हि०—सीसा । बँ०—सीसे । म०—शिशें । गु०—शीसुं । क०—सीसा । तै०—शीश । इं०—लेड (Lead) । फा०—सुर्ब । अ०—रुसासुल अस्वद ।

Unmad Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

❀ लौहनामानि गुणाश्च—

पुरालोमिनदैत्यानां निहतानां सुरैर्युधि ।
उत्पन्नानि शरीरेभ्यो लोहानि विविधानि च ॥४१॥
लोहोऽस्त्रं शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी ।
गुरुता दृढतोत्क्लेदकश्मलं दाहकारिता ॥४२॥
अश्मदोषाः सुदुर्गन्धो दोषाः सप्तायसस्य तु ।
लोहं तिक्तं सरं शीतं मधुरं तुवरं गुरु ॥४३॥
रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत् ।
कफपित्तं गरं शूलं शोथार्शःप्लीहपाण्डुताः ।
मेदोमेहकृमीन्कुष्ठं तत्किट्टं तद्वदेव हि ॥४४॥
पांडुत्वकुष्ठामयमृत्युदं भवेद्
हृद्रोगशूलौ कुरुतेऽश्मरीं च ।
नानारुजानां च तथाऽप्रकोपं
करोति हल्लासमशुद्धलोहम् ॥४५॥
जीवहारि मदकारि चायसं चेदशुद्धिमदसंस्कृतं ध्रुवम् ।
पाटवं न तनुते शरीरके दारुणं हृदि रुजां च यच्छति ॥
कूष्माण्डं तिलतैलं च माषान्नं राजिकां तथा ।

❀ सं०—लौह । हि०—लोहा । बँ०—लौह । म०—लोखंड । गु०—लोटुं । क०—अयस्कान्त । तै०—इनुमु । इं०—आयरन (Iron) स्टील (Steel) फा०—आहन । अ०—हदीद ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

मद्यमम्लरसं चापि त्यजेल्लौहस्य सेवकः ॥४७॥

लौहसारनामानि गुणाश्च—

क्षमाभृच्छिखराकाराण्यङ्गान्यम्लेन लेपिते ।
लोहे स्युर्यत्र सूक्ष्माणि तत्सारमभिधीयते ॥४८॥
लोहं साराह्वयं हन्याद् ग्रहणीमतिसारकम् ॥४९॥
अर्द्धं सर्वाङ्गजं वातं शूलं च परिणामजम् ।
छर्दिं च पीन संपित्तं श्वासं कासं व्यपोहति ॥५०॥

कान्तलोहनामानि गुणाश्च—

पात्रे यस्मिन् प्रसरति जले तैलबिन्दुर्निषिक्तो
विद्धं गंधं त्यजति च निजं रूषितं निम्बकल्कैः।
तप्तं दुग्धं भवति शिखराकारकं नैति भूमिं
कृष्णाङ्गः स्यात्सजलचणकः कान्तलोहं तदुक्तम् ॥
गुल्मोदरार्शः शूलाभमामवातं भगन्दरम् ।
कामलाशोथकुष्ठानि क्षयं कान्तमयो हरेत् ॥५२॥
प्लीहानमम्लपित्तं च यकृच्चापि शिरोरुजम् ।
सर्वान् रोगान्विजयते कान्तलोहं न संशयः ॥५३॥

मण्डूरनामानि गुणाश्च—

बलं वीर्यं वपुःपुष्टिं कुरुतेऽग्निं विवर्धयेत् ॥५४॥
ध्मायमानस्य लोहस्य मलं मण्डूरमुच्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लोहसिंहानिका किट्टो सिंहानं च निगद्यते ॥५५॥
यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम्।

सप्तोपधातुनामगुणाः—

सप्तोपधातवः स्वर्णमाक्षिकं तारमाक्षिकम् ॥५६॥
तुत्थं कांस्यं च रीतिश्च सिन्दूरश्च शिलाजतु।
उपधातुषु सर्वेषु तत्तद्धातुगुणा अपि ॥५७॥
सन्ति किं तेषु ते गौणास्तत्तदंशाल्पभावतः।

† स्वर्णमाक्षिकनामानि गुणाश्च—

स्वच्छं माक्षिकमाख्यातं तापीजं मधुमाक्षिकम् ॥
ताप्यं माक्षिकधातुश्च मधुधातुश्च स स्मृतः।
किञ्चित्सुवर्णं साहित्यात् स्वर्णमाक्षिकमीरितम् ॥
उपधातुः सुवर्णस्य किञ्चित्स्वर्णगुणान्वितः।
तथा च कांचनाभावे दीयते स्वर्णमाक्षिकम् ॥६०॥
किन्तु तस्यानुकल्पत्वात् किंचिदूनगुणं ततः।
न केवलं स्वर्णगुणो वर्तते स्वर्णमाक्षिके ॥६१॥

---

† सं०—स्वर्णमाक्षिक। हि०—सोनामाखी, रूपामाख। बँ०—स्वर्ण-तार-रौप्यमाक्षिक। म०—सोनामुखी, रौप्यमाक्षी। गु०—सोना-रूपामाखी। क०—धातुमाक्षिक। इँ०—आयरन पाइराइटीज (Iron pyrites)।

Prof. Satya Vrat Shastri Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्रव्यान्तरस्य संसर्गात्संत्यन्येऽपि गुणा यतः ।
सुवर्णमाक्षिकं स्वादु तिक्तं वृष्यं रसायनम् ॥६२॥
चक्षुष्यं बस्तिरुक्कुष्ठपाण्डुमेहविषोदरान् ।
अर्शः शोथं विषं कण्डूं त्रिदोषमपि नाशयेत् ॥६३॥
मन्दानलत्वं बलहानिमुग्रांविष्टम्भतांनेत्रगदान्सकुष्ठात्
तथैव मालीं व्रणपूर्विकां चकरोतितापीजमशुद्धमेतन्

तारमाक्षिकलक्षणं गुणाश्च—

तारमाक्षिकमन्यत्तु तद्भवेद्रजतोपमम् ।
किञ्चिद्रजतसाहित्यात्तारमाक्षिकमीरितम् ॥६५॥
अनुकल्पतया तस्य ततो हीनगुणं स्मृतम् ।
न केवलं रूप्यगुणा वर्तन्ते तारमाक्षिके ॥६६॥
द्रव्यान्तरस्य संसर्गात्संत्यन्तेऽपि गुणा यतः ।

❀ तुत्थनामानि गुणाश्च—

तुत्थं वितुन्नकं चापि शिखिग्रीवं मयूरकम् ॥६७॥
तुत्थं ताम्रोपधातुर्हि किंच ताम्रेण तद्भवेत् ।

❀ तं०—तुत्थ । हि०—तूतिया । बँ०—तुंतिया । म०—मोरचून । गु०—मोरथुथु । क०—मयूरतुत्थ । तै०—मेलतुतु । इं०—सल्फेट ऑफ कॉपर (Sulphate of copper) फा०—दूदिया । अ०—तुतियाअकज़र ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंचित्ताम्रगुणं तस्माद्वक्ष्यमाणगुणं च तत् ॥६८॥
तुत्थकं कटुकं क्षारं कषायं वामकं लघु ।
लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत् ॥६९॥
विषाश्मकुष्ठकंडूघ्नं खर्परं चापि तद्गुणम् ।

× कांस्यनामानि गुणाश्च—

ताम्रस्त्रपुजमाख्यातं कांस्यं घोषं च कांसकम् ॥७०॥
उपधातुर्भवेत्कांस्यं द्वयोस्तरणिरंगयोः ।
कांस्यस्य तु गुणा ज्ञेयाः स्वयोनिसदृशा जनैः ॥७१॥
संयोगजप्रभावेण तस्यान्येऽपि गुणाः स्मृताः ।
गुरु नेत्रहितं रूक्षं कफपित्तहरं परम् ॥७२॥

❀ पित्तलनामानि गुणाश्च—

पित्तलं त्वारकूटं स्यादारो रीतिश्च कथ्यते ॥७३॥
राजरीतिर्ब्रह्मरीतिः कपिला पिंगलापि च ।
रीतिरप्युपधातुः स्यात्ताम्रस्य यसदस्य च ॥७४॥

× सं०—कांस्य । हि०—काँसा । बँ०—कांसा । म०—कांसें । गु०—कांसु । क०—कंचु । इ०—बेलमेटल (Bell metal) ब्रोंज (Bronze) फा०-रोईन । अ० तालिकून ।

❀ सं०—पित्तल । हि०—पीतल । बँ०—पित्तल । म०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पित्तलस्य गुणा ज्ञेयाः स्वयोनिसदृशा जनैः ।
संयोगजप्रभावेण तस्यान्येऽपि गुणाः स्मृताः ॥७५॥
रीतिकायुगलं रूक्षं तिक्तं च लवणं रसे ।
शोधनं पाण्डुरोगघ्नं कृमिघ्नं नातिलेखनम् ॥७६॥

❀ सिंदूरनामानि गुणाश्च—

सिंदूरं रक्तरेणुश्च नागगर्भं च सीसकम् ।
सीसोपधातुः सिंदूरं गुणैस्तत्सीसवन्मतम् ॥७७॥
सिंदुरमुष्णवीसर्पकुष्ठकण्डूविषापहम् ।
भग्नसन्धानजननं व्रणशोधनरोपणम् ॥७८॥

† शिलाजतुनामानि गुणाश्च—

निदाघे घर्मसंतप्ता धातुसारं धराधराः ।
निर्यासवत्प्रमुञ्चन्ति तच्छिलाजतु कीर्तितम् ॥७९॥
सौवर्णं राजतं ताम्रमायसं तच्चतुर्विधम् ।

पिन्तल । गु०—पीतल । क०—पित्ताले यरडु । तै०—इत्तडी । इं०—ब्रास (Brass) फा०—बिरंज ।

❀ सं०—सिन्दूर । हि०—सिन्दूर । बँ०—सिन्दुर । म०—शेंदुर । तै०—चेन्दुरमु । ता०—चेन्दुरम् । फा०—सिरिंज । अ०—उसरंज ।

† सं०—शिलाजतु । हि०—शिलाजीत । बँ०—शिलाजतु ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिलाजत्वद्रिजतु च शैलनिर्यास इत्यपि ॥८०॥
गैरेयमश्मजं चापि गिरिजं शैलधातुजम् ।
शिलाजं कटु तिक्तोष्णं कटुपाकं रसायनम् ॥८१॥
छेदियोगवहं हन्ति कफमेदोऽश्मशर्कराः ।
मूत्रकृच्छ्रं क्षयं श्वासं वाताशांसि च पाण्डुताम् ॥८२॥
अपस्मारं तथोन्मादं शोथकुष्ठोदरक्रिमीन् ।
सौवर्णं तु जपापुष्पवर्णं भवति तद्रसात् ॥८३॥
मधुरं कटु तिक्तं च शीतलं कटुपाकि च ।
ताम्रं मयूरकण्ठाभं तीक्ष्णमुष्णं च जायते ॥८४॥
लौहं जटायुपक्षाभं तिक्तकं लवणं भवेत् ।
विपाके कटुकं शीतं सर्वश्रेष्ठमुदाहृतम् ॥८५॥

रसनामानि—

रसायनार्थिभिर्लोके पारदो रस्यते यतः ।
ततो रस इति प्रोक्तः स च धातुरपि स्मृतः ॥८६॥

❀ पारदनामानि जातिश्च—

शिवांगात्प्रच्युतं रेतः पतितं धरणीतले ।
तद्देहसारजातत्वाच्छुक्लमच्छमभूच्च तत् ॥८७॥

म०—शिलाजीत । क०—कलवेचरु । इं०—आसलफेट ।
❀ सं०—पारद । हिं०—पारा । बँ०—पारा । मरा०—पारा ।

Dr. Urmila Shastri Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षेत्रभेदेन विज्ञेयं शिववीर्य्यं चतुर्विधम् ।
श्वेतं रक्तं तथा पीतं कृष्णं तत्तु भवेत् क्रमात् ॥८८॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च खलु जातितः ।
श्वेतं शस्तं रुजां नाशे रक्तं किल रसायने ॥८९॥
धातुवेधे तु तत्पीतं खे गतौ कृष्णमेव च ।
पारदो रसधातुश्च रसेन्द्रश्च महारसः ॥९०॥
चपलः शिववीर्य्यश्च रसः सूतः शिवाह्वयः ।

गुणः—

पारदः षड्रसः स्निग्धस्त्रिदोषघ्नो रसायनः ॥९१॥
योगवाही महावृष्यः सदा दृष्टिबलप्रदः ।
सर्वामयहरः प्रोक्तो विशेषात्सर्वकुष्ठनुत् ॥९२॥
स्वस्थो रसो भवेद्ब्रह्मा बद्धो ज्ञेयो जनार्दनः ।
रञ्जितः कामितश्चापि साक्षाद्देवो महेश्वरः ॥९३॥
मूर्च्छितो हरति रुजं बन्धनमनुभूय खे गतिं कुरुते ।
अजरीकरोति हि मृतः कोऽन्यः करुणाकरः सूतात् ९४
असाध्यो यो भवेद्रोगो यस्य नास्ति चिकित्सितम् ।
रसेन्द्रो हन्ति तं रोगं नरकुञ्जरवाजिनाम् ॥९५॥

गु०—पारो । क०—पारदरस । तै०—पारदरसम् । इं०—मरक्युरी (Mercury) । फा०—सिमाब । अ०—जीवक

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलंविषंवह्निगिरित्वचापलं नैसर्गिकं दोषमुपन्ति पारदे
उपाधिजौद्वौत्रपुनागयोगजौदोषौरसेंद्रेकथितोमुनीश्वरैः
मलेनमूर्च्छा मरणं विषेण दाहोऽग्निना कष्टतरः शरीरे।
देहस्यजाड्यं गिरिणा सदा स्यात्
चाञ्चल्यतो वीर्यहतिश्च पुंसाम्।
वंगेन कुष्ठं भुजगेन गण्डो
भवेत्ततोऽसौ परिशोधनीयः ॥९८॥
वहिर्विषं मलं चेति मुख्या दोषास्त्रयो रसे।
एते कुर्वन्ति सन्तापं मृतिं मूर्च्छां नृणां क्रमात् ॥९९॥
अन्येऽपि कथिता दोषा भिषग्भिः पारदे यदि।
तथाप्येते त्रयो दोषा हरणीया विशेषतः ॥१००॥
संस्कारहीनं खलु सूतराजंयः सेवते तस्यकरोति बाधाम
देहस्य नाशं विदधाति नूनंकुष्ठांश्च रोगाञ्जनयेन्नराणाम

उपरसनामानि—

गन्धो हिङ्गुलमभ्रमतालकशिलाः स्रोतोञ्जनं टंकणं
राजावर्तकचुम्बकौ स्फुटिकया शंखः खटीगैरिकम्।
कासीसं रसकंजदर्पसिकताबोलाश्च कङ्कुष्ठकम्
सौराष्ट्री च मता अमी उपरसाः सूतस्य किञ्चिद्गुणैः।

गन्धकनामानि जातिश्च—

श्वेतद्वीपे पुरा देव्याः क्रीडन्त्या रजसाप्लुतम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

दुकूलं तेन वस्त्रेण स्नातायाः क्षीरनीरधौ ॥१०३॥
प्रसूतं यद्रजस्तस्माद्गन्धकः समभूत्तदा ।
गन्धको गंधिकश्चापि गन्धपाषाण इत्यपि ॥१०४॥
सौगन्धिकश्च कथितो बलिर्बलरसोऽपि च ।
चतुर्धा गन्धकः प्रोक्तो रक्तः पीतः सितोऽसितः१०५
रक्तो हेमक्रियासूक्तः पीतश्चैव रसायने ।
व्रणादिलेपने श्वेतः कृष्णः श्रेष्ठः सुदुर्लभः ॥१०६॥

गुणाः—

गन्धकः कटुकस्तिक्तो वीर्योष्णस्तुवरः सरः ।
पित्तलः कटुकः पाके कण्डुवीसर्पजन्तुजित् ॥१०७॥
हन्ति कुष्ठक्षयप्लीहकफवातान् रसायनः ॥१०८॥
अशोधितो गन्धक एष कुष्ठं करोति तापं विषमं शरीरे
सौख्यंचरूपंचबलंतथौजःशुक्रं निहन्त्येवकरोतिचामम्

❀ हिंगुलनामानि—

हिंगुलं दरदं म्लेच्छमिंगुलं पूर्णपारदम् ।
मक्षिरंगं सुरंगं च नाम्ना कर्मारबन्धनम् ।
दरदस्त्रिविधः प्रोक्तश्चर्मारः शुकतुण्डकः ॥११०॥

❀ सं०—हिंगुल । हि०—सिंगरिफ । बँ०—हिंगुल । म०—

Dr. Urmila Sharma Collection, Varanasi

0. In Public Domain. Digitization by eGangotri

हंसपादस्तृतीयः स्याद्गुणवानुत्तरोत्तरम् ।
चर्मारः शुक्लवर्णः स्यात्सपीतः शुकतुण्डकः ।१११।
जपाकुसुमसंकाशो हंसपादो महोत्तमः ।

गुणाः—

तिक्तं कषायं कटु हिंगुलं स्यान्नेत्रामयघ्नंकफपित्तहारि
हृल्लासकुष्ठज्वरकामलाश्च प्लीहामवातौचगरं निहन्ति
ऊर्ध्वपातनयुक्त्या तु डमरूयन्त्रपाचितम् ।
हिंगुलं यस्य सूतं तु शुद्धमेव न शोधयेत् ॥११३॥

❀ अभ्रकनामानि जातिश्च—

पुरा वधाय वृत्रस्य वज्रिणा वज्रमुद्धतम् ।
विस्फुलिङ्गास्ततस्तस्माद्गगने परिसर्पिताः ।११४।
ते निपेतुर्घनध्वानाः शिखरेषु महीभृताम् ।
तेभ्य एव समुत्पन्नं तत्तद्गिरिषु चाभ्रकम् ॥११५॥
तद्वज्रं वज्रपातत्वादभ्रमभ्ररवोद्भवात् ।
गगनात्स्खलितं यस्माद्गगनं च ततो मतम् ११६

हिंगुल । गु०—हिंगलो । क०—इँगुलियक । तै०—इङ्गिलाकामु । इं०—सिमेबरनेटिव (cimabor native) फा०—सिंग्रग । अ०—जंजफर ।

❀ सं०—अभ्रक । हि०—अबरख । अभ्र । बँ०—म०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विप्रक्षत्रियविट्शूद्रभेदात्तस्माच्चतुर्विधः ।
क्रमेणैव सितं रक्तं पीतं कृष्णं च वर्णतः ॥११७॥
प्रशस्यते सितं तारे रक्तं तत्तु रसायने ।
पीतं हेमनि कृष्णं तु गदेषु द्रुतयेऽपि च ॥११८॥
पिनाकं दर्दुरं नागं वज्रं चेति चतुर्विधम् ।
मुञ्चत्यग्नौ विनिक्षिप्तं पिनाकं दलसंचयम् ॥११९॥
अज्ञानाद्भक्षणं तस्य महाकुष्ठप्रदायकम् ।
दर्दुरं त्वग्निनिक्षिप्तं कुरुते दर्दुरध्वनिम् ॥१२०॥
गोलकान् बहुशः कृत्वा स स्यान्मृत्युप्रदायकः ।
नागं तु नागवद्वह्नौ फूत्कारं परिमुंचति ॥१२१॥
तद्भक्षितमवश्यं तु विदधाति भगन्दरम् ।
वज्रन्तु वज्रवत्तिष्ठेत्तन्नाग्नौ विकृतिं व्रजेत् ॥१२२॥
सर्वाभ्रेषु वरं वज्रं व्याधिवार्द्धक्यमृत्युहृत् ।
अभ्रमुत्तरशैलोत्थं बहुलत्वं गुणाधिकम् ॥१२३॥
दक्षिणाद्रिभवं स्वल्पसत्त्वमल्पगुणप्रदम् ॥१२४॥

अभ्रकगुणाः—

अभ्रं कषायं मधुरं सुशीतमायुःकरं धातुविवर्द्धनं च ।

अभ्रक । गु०—अभरख । तै०—अभ्रक । इ०—टाक ग्लिम्मर (talc glimmer) । फा०—[illegible] । [illegible] तलूक

Dr. Urmila Sharma Collection, Jammu

CC0. In Public Domain. Digitization by eGangotri

हन्यात्त्रिदोषं व्रणमेहकुष्ठं प्लीहोदरं ग्रंथिविषक्रिमीश्च
रोगान् हंति द्रढयति वपुर्वीर्य्यवृद्धिं विधत्ते
तारुण्याढ्यं रमयति शतं योषितां नित्यमेव ।
दीर्घायुष्काञ्जनयति सुतान् विक्रमैः सिंहतुल्या-
न्मृत्योर्भीतिं हरति सततं सेव्यमानं मृताभ्रम् ।१२६।
पीडां विधत्तेविविधां नराणांकुष्ठं क्षयं पांडुगदं च शोथम्
हृत्पार्श्वपीडांचकरोत्यशुद्धमभ्रंत्वसिद्धंगुरुतापदं स्यात

❀ हरितालनामानि जातिश्च—

हरितालं तु तालं स्यादालं तालकमित्यपि ।
हरितालं द्विधा प्रोक्तं पत्राख्यं पिण्डसंज्ञकम् ।१२८।
तयोराद्यं गुणैः श्रेष्ठं ततो हीनगुणं परम् ।
स्वर्णवर्णं गुरु स्निग्धं सपत्रं चाम्रपत्रवत् ॥१२९॥
पत्राख्यं तालकं विद्याद् गुण ढ्यं तद्रसायनम् ।
निष्पत्रं पिण्डसदृशं स्वल्पसत्त्वं तथा गुरु ॥१३०॥
स्त्रीपुष्पहारकं स्वल्पगुणं तत्पिण्डतालकम् ।

❀ सं०—हरिताल । हिं०—हरताल । बं०—हरिताल । म०—हरताल । क०—हरिदाल । इं०—ओर्पिमेंट (orpiment) अ०—जरनीखअस्फर ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गुणाः—

हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम् ।
कण्डुकुष्ठास्यरोगास्रकफपित्तकचव्रणान् ॥१३१॥

हरति च हरितालं चारुतां देहजातां
सृजति च बहुतापानङ्गसंकोचपीडाम् ।
वितरति कफवातौ कुष्ठरोगं विदध्या-
दिदमशितमशुद्धंमारितं चाप्यसम्यक् ॥१३२॥

❀ मनःशिलानामानि गुणाश्च—

मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका ।
नैपाली कुनटी गोला शिला दिव्यौषधिः स्मृता ॥

मनःशिला गुरुर्वर्ण्या सरोष्णा लेखनी कटुः ।
तिक्ता स्निग्धा विषश्वासकासमूतकफास्रनुत् १३४
मनःशिला मंदबलं करोति जन्तुं ध्रुवं शोधनमन्तरेण ।
मलानुबन्धं किल मूत्ररोधं सशर्करं कृच्छ्रगदं च कुर्यात्

† अंजननामानि गुणाश्च—

अञ्जनं यामुनं चापि कापोताञ्जनमित्यपि ।

❀ सं०—मनःशिला । हि०—मैनसिल । बं०—मनछाल । म०—मनशील । गु०—मणशल । तै०—मानुशिला । फा०—जरनिख । अ०—रीलेगर ।

† सं०—स्रोतोंजन । हि०—सुरमा । बं०—शुर्मा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्तु स्रोतोञ्जनं कृष्णं सौवीरं श्वेतमीरितम्॥१३६॥
वल्मीकशिखराकारं भिन्नमंजनसन्निभम्।
दृष्टं तु गैरिकाकारमेतत्स्रोतोञ्जनं स्मृतम् ।१३७।
स्रोतोञ्जनसमं ज्ञेयं सौवीरं तत्तु पाण्डुरम्।
स्रोतोंजनं स्मृतं स्वादु चक्षुष्यं कफपित्तनुत्।१३८।
कषायं लेखनं स्निग्धं ग्राहि छर्दिविषापहम्।
सिध्मक्षयास्रहृच्छीतं सेवनीयं सदा बुधैः ॥१३९॥
स्रोतोऽञ्जनगुणाः सर्वे सौवीरेऽपि मता बुधैः।
किंतु द्वयोरंजनयोः श्रेष्ठं स्रोतोऽञ्जनं स्मृतम् १४०

❀ टंकणगुणाः—

टंकणोऽग्निकरो रूक्षः कफघ्नो वातपित्तकृत्।

† स्फुटिकानामानि गुणाश्च—

स्फुटी च स्फुटिका प्रोक्ता श्वेता च शुभरंगदा १४१
दृढरंगा सुरंगा च दृढा रंगापि कथ्यते।

म०—सुरमा। क०—स्रोतोंजन। तै०—सौवीरांजन। इ०—सल्फुरेट ऑफ आंटीमनो (sulphuret of antimany) फा०—सुमअस्फहानि। अ०—कुलह इस्मुद।

❀ सं०—टंकण। हि०—सोहागा।

† सं०—स्फुटिका। हि०—फिटकिरी। बँगला—फटिकरी।

Dr. Umila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्फुटिका तु कषायोष्णा वातपित्तकफव्रणान् १४२
निहन्ति श्वित्रवीसर्पान् योनिसंकोचकारिणी ।

❀ राजावर्तगुणाः—

राजावर्तः कटुस्तिक्तः शिशिरः पित्तनाशनः ।१४३।
राजावर्तः प्रमेहघ्नश्छर्दिहिक्कानिवारणः ।

† चुम्बकनामानि गुणाश्च—

चुम्बकः कांतपाषाणोऽयःकांतो लोहकर्षकः ।१४४।
चुम्बको लेखनः शीतो मेदोविषगदापहः ।

❀ गैरिकनामानि गुणाश्च—

गैरिकं रक्तधातुश्च गैरेयं गिरिजं तथा ॥१४५॥
स्वर्णगैरिकमन्यत्तु ततो रक्ततरं हि तत् ।
गैरिकद्वितयं स्निग्धं मधुरं तुवरं हिमम् ॥१४६॥
चक्षुष्यं दाहपित्तास्रकफहिक्काविषापहम् ।

म०—तुर्टी । क०—फटकी । तै०—फाटिके । इं०—विट्रिल हाइट आलम् । फा०—जाकसकेते । अ०—जाजकल्कतार ।

❀ सं०—राजावर्त । हि०—रेवटी ।

† सं०—चुम्बक, कान्तपाषाण । हि०—चुंबक पत्थर ।

❀ सं०—गैरिक, रक्तधातु । हि०—गेरू, हिरौंजी । बं०—गिरिमाटी । [illegible]

Urmila Sharma Collection

CC0. In Public Domain, Digitizagtion by eGangotri

❀ खटी-गौरखटीनामानि गुणाश्च—

खटिका कठिनी चापि लेखनी च निगद्यते ॥१४७॥
खटिका दाहजिच्छीता मधुरा विषशोथजित्।
लेपादेते गुणाः प्रोक्ता भक्षिता मृत्तिकासमाः ।१४८।
खटी गौरखटी द्वे च गुणैस्तुल्ये प्रकीर्तिते ।

† वालुकानामानि गुणाश्च—

वालुका सिकता प्रोक्ता शर्करा रेतजापि च ।१४९।
वालुका लेखनी शीता व्रणोरःक्षतनाशिनी।

❀ खर्परनामानि गुणा जातिश्च—

खर्परं तुत्थकं तुत्थादन्यत्तद्रसकं स्मृतम् ॥१५०॥

(Oker) रेड लम्बर स्टोन (Red lumber stone)। फा०—गिलेसुर्ख मिश्री। अ०—तीने मगरेबी अहमर।

❀ सं०—खटी। हि०—खरियामिट्टी, सेलखरी। बँ०—चाखडि। म०—खडू। गु०—खड़ी। क०—वेणेवहु। इँ०—पाइपक्ले (Pipeclay)। फा०—गिलेखरिया। अ०—तिने अबीयद।

† सं०—वालुका, सिकता, शर्करा। हि०—वालू, रेत। बँ०—वाली। म०—वालू, रेती। क०—हालुलु। तै०—विश्रिष्टा। इं०—सैण्ड (Sand)। फा०—रेग। अ०—रमल।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ये गुणास्तुत्थके प्रोक्तास्ते गुणा रसके स्मृताः ।

❀ कासीसनामानि गुणाश्च—

कासीसं धातुकासीसं पांशुकासीसमित्यपि।।१५१॥
तदेव किंचित्पीतं तु पुष्पकासीसमुच्यते ।
कासीसमम्लमुष्णं च तिक्तं च तुवरं तथा ॥१५२॥
वातश्लेष्महरं केश्यं नेत्रकण्डूविषप्रणुत् ।
मूत्रकृच्छ्राश्मरीश्वित्रनाशनं परिकीर्तितम् ॥१५३॥

× सौराष्ट्रीनामानि गुणाश्च—

सौराष्ट्री तुवरी काली मृत्तालकसुराष्ट्रजे ॥१५४॥
आढकी चापि सा ख्याता मृत्स्ना च सुरमृत्तिका ।
स्फुटिकाया गुणाः सर्वे सौराष्ट्र्या अपि कीर्तिताः ।

कलखापरी । गु०—खारपिंकालु । क०—खर्परी । तै०—खर्परम् । इं०—ब्लैकजैक (BlackJack) । फा०—संगसवरी । अ०—तुतिया ।

❀ सं०—कासीस, धातुकासीस, पांशुकासीस, पुष्पकासीस । हि०—कसीस । बं०—कासीस । म०—हिराकस । गु०—हिराकशी । क०—कासीस । इं०—सल्फेट ऑफ आयरन विट्रिअलग्रीन् (Sulphate of Iron Vitrial-green) । फा०—जाकेसब्ज । अ०—जाजे अखदर ।

× सं०—सौराष्ट्री । हि०—गोपीचन्दन । म०—गु०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ कृष्णमृत्तिकागुणाः—

कृष्णमृत्क्षतदाहास्रप्रदरश्लेष्मदाहनुत् ॥१५५॥

+ कपर्दकनामानि गुणाश्च—

कदर्पको वराटश्च कपर्दी च वराटिका ।
कपर्दिका हिमा नेत्रहिता स्फोटक्षयापहा ॥१५६॥
कर्णस्रावाग्निमांद्यघ्नी पित्तास्रकफनाशिनी ।

† शंखनामानि गुणाश्च—

शंखः समुद्रजः कम्बुः सुनादः पावनध्वनिः ।१५७।
शंखो नेत्र्यो हिमः शीतो लघुः पित्तकफास्रजित् ।

❀ बोलनामानि गुणाश्च—

बोलं गन्धरसं प्राणपिण्डगोपरसाः स्मृताः ॥१५८॥

❀ सं०—पंक, कर्दम । हि०—कीच, गारा, काली मिट्टी । बं०—कादा । म०—चिखल । गु०—गारो । तै०—नोबुलु । इं०—मडब्लैक क्ले (Mudblack clay) ।

+ सं०—कपर्दक । हि०—कौड़ी । बं०—कड़ि । म०—कवड़ी । गु०—कोडी । क०—कवडी । इं०—कवरीज (Covries) ।

† सं०—हि०—बं०—म०—गु०—शंख । तै०—शंखमु । इं०—कांच (Conch) ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बोलं रक्तहरं शीतं मेध्यं दीपनपाचनम् ।
मधुरं कटु तिक्तं च दाहस्वेदत्रिदोषजित् ॥१५९॥
ज्वरापस्मारकुष्ठघ्नं गर्भाशयविशुद्धिकृत् ।

× कुंकुष्ठनामानि उत्पत्तिस्थानं जातिश्च—

तत्रैकं नलकाख्यं स्यात्तदन्यद्रेणुकं स्मृतम् ।१६०
हिमवत्पादशिखरे कंकुष्ठमुपजायते ।
तत्रैकं रक्तकालं स्यादन्यद्धेमप्रभं स्मृतम् ॥१६१॥
पीतप्रभं गुरु स्निग्धं श्रेष्ठं कंकुष्ठमादिशेत् ।
श्यामं रक्तं लघु त्यक्तसत्त्वं नेष्टं हरेणुकम् ॥१६२॥

गुणाः—

कंकुष्ठं रेचनं तिक्तं कदुष्णं वर्णकारकम् ॥१६३॥
कृमिशोथोदराध्मानगुल्मानाहकफापहम् ।

रत्नोपरत्नवर्गः—

धनार्थिनो जनाः सर्वे रमन्तेऽस्मिन्नतीव यत् ।१६४।

म०—बोल । गु०—हिराबोल । क०—बोल । तै०—वालिम् । ता०—वेल्लइप् बोलम् । इं०—मीरा (Myrrah) फा०—मुर । अ०—मुरसाफ ।

× सं०—कंकुष्ठ (मुर्दाशंख) । म०—कंकुष्ठ । गु०—पोलियो ।

Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततो रत्नमिति प्रोक्तं शब्दशास्त्रविशारदैः ।

रत्ननामानि जातिश्च—

रत्नं क्लीबे मणिः पुंसि स्त्रियामपि निगद्यते ।१६५।

तत्तु पाषाणभेदोऽस्ति मुक्तादि च तदुच्यते ।

रत्नं मणिद्वयोरश्मजातौ मुक्तादिकेऽपि च ॥१६६॥

रत्नं गारुत्मतं पुष्परागो माणिक्यमेव च ।

इन्द्रनीलश्च गोमेदं तथा वैदूर्य्यमित्यपि ॥१६७॥

मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव ।

विष्णुधर्मोत्तरेऽप्युक्तम्—

मुक्ताफलं हीरकश्च वैदूर्य्यं पद्मरागकम् ॥१६८॥

पुष्पराजं च गोमेदं नीलं गारुत्मतं तथा ।

प्रवालयुक्तान्येतानि महारत्नानि वै नव ॥१६९॥

† हीरकनामानि—

हीरकः पुंसि वज्रोऽस्त्री चंद्रो मणिवरश्च सः ।

जातिः—

स तु श्वेतः स्मृतो विप्रो लोहितः क्षत्रियः स्मृतः १७०

---

† सं०-हीरक, वज्र । हि०-हीरा । बं०-हीरे । म०-हिरा । गु०-हिरो । क०-वज्र । तै०-वज्रम् । इं०-डायमण्ड (Diamond) । फा०-इल्मास ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

पीतो वैश्योऽसितः शूद्रश्चतुर्वर्णात्मकश्च सः ।

जातिगुणाः

रसायने मतो विप्रः सर्वसिद्धिप्रदायकः ॥१७१॥
क्षत्रियो व्याधिविध्वंसी जरामृत्युहरः स्मृतः ।
वैश्यो धनप्रदः प्रोक्तस्तथा देहस्य दार्ढ्यकृत् १७२
शूद्रो नाशयति व्याधीन् वयःस्तम्भं करोति च ।

हीरकाणां पुंस्त्रीनपुंसकज्ञानप्रकारमाह—

पुंस्त्रीनपुंसकानीह लक्षणीयानि लक्षणैः ॥१७३॥
सुवृत्ताः फलसंपूर्णास्तेजोयुक्ता बृहत्तराः ।
पुरुषास्ते समाख्याता रेखाबिन्दुविवर्जिताः ।१७४।
रेखाबिन्दुसमायुक्ताः षडस्रास्ते स्त्रियः स्मृताः ।
त्रिकोणाश्च सुदीर्घास्ते विज्ञेयाश्च नपुंसकाः ।१७५।

श्रेष्ठतामाह—

तेषु स्युः पुरुषाः श्रेष्ठा रसबन्धनकारिणः ।
स्त्रियः कुर्वन्ति कायस्य कान्तिं स्त्रीणां सुखप्रदाः१७६
नपुंसकास्त्वीर्य्याः स्युरकामाः सत्त्ववर्जिताः ।
स्त्रियः स्त्रीभ्यः प्रदातव्याः क्लीबं क्लीबे प्रयोजयेत् ॥
सर्वेभ्यः सर्वदा देया पुरुषा वीर्यवर्धनाः ।
अशुद्धं कुरुते वज्रं कुष्ठं पार्श्वव्यथां तथा ॥१७८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. Public Domain. Digitization by eGangotri

पाण्डुतां पंगुलत्वं च तस्मात्संशोध्य मारयेत्।
आयुः पुष्टिं बलं वीर्य्यं वर्णं सौख्यं करोति च।१७९।
सेवितं सर्वरोगघ्नं मृतं वज्रं न संशयः।

× हरितनामानि—

गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः ॥१८०॥

❀ माणिक्यनामानि—

माणिक्यं पद्मरागः स्यात् शोणरत्नं च लोहितम्।

† पुष्परागनामानि—

पुष्परागो मञ्जुमणिः स्याद्वाचस्पतिवल्लभः।१८१।

× सं०—गारुत्मत, मरकत। हि०—पन्ना। म०—प्राचूरत्न। गु०—लीलुवानुं। क०—पन्ना। तै०—नीवम। इं०—इमेरोल्ड (Emerold) फा०—जुमुर्रईप। अ०—जमईद।

❀ सं०—माणिक्य। हि०—मानिक, लाल। बँ०—म०—माणिक्यं। गु०—चुन्नी। क०—माणक। तै०—माणिक्य। इँ०—रुबी (Ruby)। फा०—लालबदप्शानी। अ०—लाल।

† सं०—पुष्पराग। हि०—पुखराज। बँ०—पुष्पराग। म०—पुष्पराज। गु०—पुखराज। क०—पुष्पराग। तै०—पुष्पराग। इं०—टोपेज (Topag)।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

❀ इन्द्रनीलगोमेदयोर्नामानि—

नीलं यथेन्द्रनीलं च गोमेदः पीतरत्नकम् ।

× वैदूर्यनामानि—

वैदूर्यं दूरजं रत्नं स्यात्केतुग्रहवल्लभम् ॥१८२॥

❀ मौक्तिकनामानि गुणाश्च—

मौक्तिकं शौक्तिकं मुक्ता तथा मुक्ताफलं च तत् ।
शुक्तिः शङ्खो गजः क्रोडः फणिर्मत्स्यश्च दर्दुरः १८३
वेणुरेते समाख्यातास्तज्ज्ञैर्मौक्तिकयोनयः ।
मौक्तिकं शीतलं वृष्यं चक्षुष्यं बलपुष्टिदम् ॥१८४॥

❀ सं०—इन्द्रनीलमणि । हि०—नीलम । बँ०—म०—नीलमणि । गु०—नीलम । क०—नीलं । तै०—नीलं इं०—सेफायर (Sffire) । गोमेदनामानि यथा—सं०—गोमेद । हि०—गोमेदमणि । बँ०—म०—ग०—क०—गोमेद । तै०—कोमेदकं । इं०—ओनिक्स (Onyx) ।

× सं०—वैदूर्य । हि०—लहसुनिया । बँ०—म० वैदूर्य । गु०—लसणियो । क०—वैडूर्य । तै०—वैडूर्य इं०—कैट्स आई (Catseye) ।

❀ सं०—मौक्तिक । हि०—मोती । बँ०—मुक्ता म०—मोती । गु०—मोती । क०—मौक्तिक । तै०—मोत्यालु इं०—पर्ल (Pearl) फा०—मावारिद । अ०—लोलो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ प्रवालनामानि गुणाश्च—

पुंसि क्लीवे प्रवालः स्यात्पुमानेव तु विद्रुमः।
रत्नानि भक्षितानि स्युर्मधुराणि सराणि च ॥१८५॥
चक्षुष्याणि च शीतानि विषघ्नानि धृतानि च।
माङ्गल्यानि मनोज्ञानि ग्रहदापहराणि च ॥१८६॥
माणिक्यं तरणेः सुजातममलं मुक्ताफलं शीतगो-
र्माहेयस्य तु विद्रुमो निगदितः सौम्यस्य गारुत्मतम्।
देवेज्यस्य च पुष्परागमसुराचार्यस्य वज्रं शने-
र्नीलं निर्मलमन्योनिगदित गोमेदवैदूर्यके ।१८७।

उपरत्नानि यथा—

उपरत्नानि काचश्च कर्पूराश्मा कपर्दिका ।
मुक्ता शुक्तिस्तथा शंख इत्यादीनि बहून्यपि।१८८।
गुणा यथैव रत्नानामुपरत्नेषु ते तथा ।
किंतु किंचित्ततो हीना विशेषोऽयमुदाहृतः ॥१८९॥

❀ सं०—प्रवाल। हिं० —मूगा। बँ०—पला। म०—वलें। गु०—परवाला। क०—अवलेहवत। ते०—प्रवालकं। ०—रेड कोरल (Red Coral)। फा०—मिरजान्। ०—एहेम खुसमुद।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ विषवर्गः ।

विषनामानि—

विषं तु गरलं क्ष्वेडस्तस्य भेदानुदाहरेत् ।
वत्सनाभः सहारिद्रः सक्तुकश्च प्रदीपनः ॥१६०॥
सौराष्ट्रिकः शृङ्गिकश्च कालकूटस्तथैव च ।
हालाहलो ब्रह्मपुत्रो विषभेदा अमी नव ॥१६१॥

❀ वत्सनाभनामानि—

सिन्धुवारसदृक्पत्रो वत्सनाभ्याकृतिस्तथा ।
यत्पार्श्वे न तरोर्वृद्धिर्वत्सनाभः स भाषितः ॥१६२॥

हारिद्रनाम—

हरिद्रातुल्यमूलो यो हारिद्रः स उदाहृतः ।

सक्तुकनाम—

यद्ग्रन्थिः सक्तुकेनेव पूर्णमध्यः स सक्तुकः ।१६३।

❀ सं०—वत्सनाभ । हि०—बछनाग, मीठा विष । बं०—काठविष । म०—वचनाग । गु०—छिगड़ियो । क०—वशनवी । ते०—नाभी । इं०—एकोनाइट (Aconite) । फा०—ज़हर । अ०—विष ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitized by eGangotri

प्रदीपनलक्षणम्—

वर्णतो लोहितो यः स्याद्दीप्तिमान् दहनप्रभः ।
महादाहकरः पूर्वैः कथितः स प्रदीपनः ॥१९४॥

सौराष्ट्रिकः—

सुराष्ट्रविषये यः स्यात्स सौराष्ट्रिक उच्यते ।

+शृङ्गिकलक्षणम्—

यस्मिन् गोशृङ्गके बद्धे दुग्धं भवति लोहितम् ।१९५।
स शृंगिक इति प्रोक्तो द्रव्यतत्त्वविशारदैः ।

कालकूटोत्पत्तिः ।

देवासुररणे देवैर्हतस्य पृथुमालिनः ॥१९६॥
दैत्यस्य रुधिराज्जातस्तरुरश्वत्थसन्निभः ।
निर्यासः कालकूटोऽस्य मुनिभिः परिकीर्तितः १९७
सोऽहिक्षेत्रे शृंगवेरे कोंकणे मलये भवेत् ।

हालाहललक्षणम्—

गोस्तनाभफलो गुच्छस्तालपत्रच्छदस्तथा ।१९८।
तेजसा यस्य दह्यन्ते समीपस्था द्रुमादयः ।

+सं०—शृङ्गिक। हि०—सींगिया। बँ०—शृङ्गिक विष।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

उत्पत्तिः—

असौ हालाहलो ज्ञेयः किष्किन्धायां हिमालये१९९
दक्षिणाब्धितटे देशे कोंकणेऽपि च जायते।

❀ ब्रह्मपुत्रलक्षणं जातिर्गुणाश्च—

वर्णतः कपिलो यः स्यात्तथा भवति सारतः॥२००॥
ब्रह्मपुत्रः स विज्ञेयो जायते मलयाचले।
ब्राह्मणः पाण्डुरस्तेषु क्षत्रियो लोहितप्रभः॥२०१॥
वैश्यः पीतोऽसितः शूद्रो विष उक्तश्चतुर्विधः।
रसायने विषं विप्रं क्षत्रियं देहपुष्टये॥२०२॥
वैश्यं कुष्ठविनाशाय शूद्रं दद्याद्वधाय हि।
विषं प्राणहरं प्रोक्तं व्यवायि च विकाशि च।२०३।
आग्नेयं वातकफहृद्योगवाहि मदावहम्।
तदेव युक्तियुक्तं तु प्राणदायि रसायनम्॥२०४॥
योगवाहि त्रिदोषघ्नं बृंहणं वीर्यवर्द्धनम्।
ये दुर्गुणा विषेऽशुद्धे ते स्युर्हीना विशोधनात् २०५
तस्माद्विषं प्रयोगेषु शोधयित्वा प्रयोजयेत्।

❀ सं०—ब्रह्मपुत्र। हि०—संखिया। फा०—मिर्गषमूष।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ उपविषाणि—

अर्कक्षीरं स्नुहीक्षीरं लाङ्गलीकरवीरकौ ।
गुञ्जाहिफेनो धत्तूरः सप्तोपविषजातयः ॥२०६॥

इति धातुवर्गः ।

———

इं०—ओफेसिया ऑफ आर्सेनिक (Ofeasia of arsenik) ।

❀ उपविषाणां संख्याविषये मतभेदो यथा अमरसिंहमते—

अर्कक्षीरं स्नुहीक्षीरं तथैव कलहारिका ।
करवीरोऽथ धुस्तूरः पंच चोपविषाः स्मृताः ॥

ग्रन्थान्तरे—

स्नुह्यर्कलाङ्गली गुञ्जा हयारिर्विषमुष्टिकः ।
जयपालोऽमलाहिफेनं नवोपविषजातयः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धान्यवर्गः ।

धान्यनामानि—

शालीधान्यं व्रीहिधान्यं शूकधान्यं तृतीयकम् ।
शिम्बीधान्यं क्षुद्रधान्यमित्युक्तं धान्यपंचकम् ।१।

जातिः—

शालयो रक्तशाल्याद्या व्रीहयः षष्टिकादयः ।
यवादिकं शूकधान्यं मुद्गाद्यं शिम्बिधान्यकम् ॥२॥
कंग्वादिकं क्षुद्रधान्यं तृणधान्यं च तत्स्मृतम् ।
कण्डनेन विना शुक्ला हैमन्ताः शालयः स्मृताः ३

+ शालिजातयः—

रक्तशालिः सकलमः पाण्डुकः शकुनाहृतः ।
सुगन्धकः कर्दमको महाशालिश्च दूषकः ॥४॥
पुष्पाण्डकः पुण्डरीकस्तथा महिषमस्तकः ।
दीर्घशूकः काञ्चनको हायनो लोध्रपुष्पकः ॥५॥
इत्याद्याः शालयः सन्ति बहवो बहुदेशजाः ।
ग्रन्थविस्तारभीतेस्ते समस्ता नात्र भाषिताः ॥६॥

+सं०—शालि, तण्डुल । हि०—धान, चावल । बं०—शालिधान्य, चाउल । म०—साली, भात । गु०—शाल्य,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

तत्तच्छालीनां गुणाः—

शालयो मधुराः स्निग्धा बल्या बद्धाल्पवर्चसः ।
कषाया लघवो रुच्याः स्वर्ण्या वृष्याश्च बृंहणाः ।७।
अल्पानिलकफाः शीताः पित्तघ्ना मूत्रलास्तथा ।
शालयो दग्धमृज्जाता कषाया लघुपाकिनः ॥८॥
सृष्टमूत्रपुरीषाश्च रूक्षा श्लेष्मापकर्षणाः ।
कैदारा वातपित्तघ्ना गुरवः कफशुक्रलाः ॥९॥
कषाया अल्पवर्चस्का मध्याश्चैव बलावहाः ।
स्थलजाः स्वादवः पित्तकफघ्ना वातवह्निदाः ॥१०॥
किंचित्तिक्ताः कषायाश्च विपाके कटुका अपि ।
वापिता मधुरा वृष्या बल्याः पित्तप्रणाशनाः ।११।
श्लेष्मलाश्चाल्पवर्चस्काः कषाया गुरवो हिमाः ।
वापितेभ्यो गुणैः किंचिद्धीनाः प्रोक्ता अवापिताः १२
रोपितास्तु नवा वृष्याः पुराणा लघवः स्मृताः ।
तेभ्यस्तु रोपिता भूयः शीघ्रपाका गुणाधिकाः।१३।
छिन्नरूढा हिमा रूक्षा बल्याः पित्तकफापहाः ।

चोखा । क०—नेलु । ते०—धान्यमु, बीयमु । इं०—राइस (Rice) । फा०—बिरंज । अ०—उरज ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बद्धविट्काः कषायांश्च लघवश्चाल्पतिक्तकाः ॥१४॥

रक्तशालिगुणाः—

रक्तशालिर्वरस्तेषु बल्यो वर्ण्योऽस्रदोषजित् ।
चक्षुष्यो मूत्रलः स्वर्य्यः शुक्रलस्तृड्ज्वरापहः ।१५।
विषव्रणश्वासकासदाहनुद्वह्निपुष्टिदः ।
तस्मादल्पान्तरगुणाः शालयो महदादयः ॥१६॥

व्रीहिधान्यजातिर्गुणाश्च—

वार्षिकाः कण्डिताः शुक्ला व्रीहयश्चिरपाकिनः ।
कृष्णव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि ॥१७॥
कुक्कुटाण्डाकृतिर्व्रीहिः कुक्कुटाण्डक उच्यते ॥१८॥
कृष्णव्रीहिः स विज्ञेयो यः कृष्णतुषतंडुलः ।
पाटलः पाटलापुष्पवर्णको व्रीहिरुच्यते ॥१९॥
शालामुखः कृष्णशूकः कृष्णतण्डुल उच्यते ।
लाक्षावर्णं मुखं यस्य ज्ञेयो जतुमुखस्तु सः ॥२०॥
व्रीहयः कथिताः पाके मधुरा वीर्य्यतो हिताः ।
अल्पाभिष्यन्दिनो बद्धवर्चस्काः षष्टिकैः समाः ॥२१॥
कृष्णव्रीहिर्वरस्तेषां तस्मादल्पगुणाः परे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

× षष्टिकधान्यजातिर्गुणाश्च—

गर्भस्था एव ये पाकं यांति ते षष्टिका मताः ॥२२॥
षष्टिकः शतपुष्पश्च प्रमोदकमुकुन्दकौ ।
महाषष्टिक इत्याद्याः षष्टिकाः समुदाहृताः ॥२३॥
एतेऽपि व्रीहयः प्रोक्ता व्रीहिलक्षणदर्शनात् ।
षष्टिका मधुराः शीता लघवो बद्धवर्चसः ॥२४॥
वातपित्तप्रशमनाः शालिभिः सदृशा गुणैः ।
षष्टिका प्रवरा तेषां लम्बी स्निग्धा त्रिदोषजित् ॥२५॥
स्वाद्वी मृद्वी ग्राहिणी च बलदा ज्वरहारिणी ।
रक्तशालिगुणैस्तुल्यास्ततः स्वल्पगुणाः परे ॥२६॥

† यवनामानि गुणाश्च—

अतीयवो निःशूकः स्यात्कृष्णारुणवर्णको यवः ।
निःशूकोऽपि यवः प्रोक्तो धवलाकृतिको महान् ।२७।
यवस्तु सितशूकःस्यान्निःशूकोऽनुयवः स्मृतः ।
तोक्मस्तद्वत्सहरितस्ततः स्वल्पश्च कीर्तितः ॥२८॥

× सं०—षष्टिका, षष्टिशालि, षष्टिज । हि०—साठी । बं०—षष्टिकधान्य ।

† सं०—यव । हि०—जौ, जवा । बं०—यव । गु०—जौ । म०—जव । क०—मुण्डज यव । तै०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यवः कषायो मधुरः शीतलो लेखनो मृदुः ।
व्रणेषु तिलवत्पथ्यो रूक्षो मेधाग्निवर्द्धनः ॥२९॥
कटुपाकोऽनभिष्यन्दी स्वर्य्यो बलकरो गुरुः ।
कण्ठत्वगामयश्लेष्मपित्तमेदःप्रणाशनः ॥३०॥
पीनसश्वासकासोरुस्तम्भलोहिततृट्प्रणुत् ॥३१॥
अस्मादतियवो न्यूनस्तोक्मो न्यूनतरस्ततः ।

× गोधूमजातिर्गुणाश्च—

गोधूमः सुमनोऽपि स्यात्त्रिविधः स च कीर्तितः ३२
महागोधूम इत्याख्यः पश्चाद्देशात्समागतः ।
मधूलो तु ततः किंचिदल्पा सा मध्यदेशजा ॥३३॥
निःशूको दीर्घगोधूमः क्वचिन्नन्दीमुखाभिधः ।
गोधूमो मधुरः शीतो वातपित्तहरो गुरुः ॥३४॥
कफशुक्रप्रदो बल्यः स्निग्धः सन्धानकृत्सरः ।
जीवनो बृंहणो वर्ण्यो व्रण्यो रुच्यः स्थिरत्वकृत् ३५
कफप्रदो नवीनो न तु पुराणः । पुराणोयवगोधूम—
गौद्रजाङ्गलशूल्यमुगितिवाग्भटेन वसन्ते गृहीतत्वात् ।

यवधान्य । ता०—बार्लि अरिसु । इं०—बिटर बार्लि, पर्ल बार्लि (Bitter Barley, Porlbarley) फा०—जव । आ०—शईर ।

× सं०—गोधूम । हि०—गेहूँ । बँ०—गम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

विशेषः—

मधूली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः ॥३६॥
शुक्रला बृंहणी पथ्या तद्वन्नन्दीमुखः स्मृतः ॥३७॥
शमीजाः शिम्बिजाः शिम्बिभवाः सूपाश्च वैदलाः ।
वैदलाः कफपित्तघ्ना बद्धमूत्रमला हिमाः ॥३८॥
ऋते मुद्गमसूराभ्यामन्ये त्वाध्मानकारिणः ।

❀ मुद्गजातिर्गुणाश्च—

मुद्गो रूक्षो लघुर्ग्राही कफपित्तहरो हिमः ॥३९॥
स्वादुरल्पानिलो नेत्र्यो ज्वरघ्नो वनजस्तथा ।
मुद्गो बहुविधः श्यामो हरितः पीतकस्तथा ॥४०॥
श्वेतो रक्तश्च तेषां तु पूर्वः पूर्वो लघुः स्मृतः ।
सुश्रुतेन पुनः प्रोक्तो हरितः प्रवरो गुणैः ॥४१॥
चरकादिभिरप्युक्त एष ह्येव गुणाधिकः ।

म०—गेहूँ । गु०—घउँ । क०—गोदी । तै०—गोदुमु । इं०—ह्वीट (Wheet) फा०—गंदुम । अ०—हिंता ।

❀ सं०—मुद्ग । हिं०—मूँग । बँ०—मुग । म०—मूँग । गु०—मगलीला, कालाकच्छी । क०—हेसयेरु । तै०—पेसलु । इं०—ग्रीनग्रेन (Greangrain) फा०—दुनुमाष । अ०—मज ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

❀ माषगुणाः—

..यो गुरुः स्वादुपाकः स्निग्धो रुच्योऽनिलापहः ४२
ह्रंसनस्तर्पणो बल्यः शुक्रलो बृंहणः परः।
ुदकीलार्दितश्वासपक्तिशूलानि नाशयेत् ॥४३॥
मन्नमूत्रमलः स्तन्यो मेदःपित्तकफप्रदः।
कफपित्तकरो माषः कफपित्तकरं दधि ॥४४॥
कफपित्तकरा मत्स्या वृन्ताकं कफपित्तकृत्।

× राजमाषगुणाः—

राजमाषो महामाषश्चपलश्च बलः स्मृतः ॥४५॥
राजमाषो गुरुः स्वादुस्तुवरस्तर्पणः सरः।
रूक्षो वातकरो रुच्यः स्तन्यो भूरिमलप्रदः ॥४६॥
श्वेतो रक्तस्तथा कृष्णस्त्रिविधः स प्रकीर्तितः।
यो महांस्तेषु भवति स एवोक्तो गुणाधिकः ॥४७॥

❀ सं०—माष। हि०—उड़द। बँ०—माष कलाम। म०—उड़ीद। गु०—उड़द। क०—उड्डु। तै०—मिनुउलु। इँ०—किड्नी बीन (Kidnee Bean) फा०—माष। अ०—माष।

× सं०—राजमाष। हि०—लोबिया (बोड़ा)। ०—बोरा। म०—चँबल्या। गु०—चोला। क०—वटा। इँ०—चाइनीज डोली कास (Chinees doli cas)। फा०—लोबिया। अ०—फरिका।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

+ निष्पावगुणाः—

निष्पावो राजशिम्बी स्याद्वेल्लकः श्वेतशिम्बकः ।
निष्पावो मधुरो रूक्षो विपाकेऽम्लो गुरुः सरः ।४८।
कषायः स्तन्यपित्तास्रमत्रवातविबन्धकृत् ।
विदाह्युष्णो विषश्लेष्मशोथहृच्छुक्रनाशनः ॥४९॥

❀ मंकुष्ठधान्यजातिर्गुणाश्च—

मंकुष्ठो वनमुद्गः स्यान्मंकुष्ठकमकुष्ठकौ ।
मंकुष्ठो वातलो ग्राही कफपित्तहरो लघुः ॥५०॥
वान्तिजिन्मधुरः पाके कृमिकृज्ज्वरनाशनः ।

× मसूरधान्यजातिः—

माङ्गल्यको मसूरः स्यान्माङ्गल्या च मसूरिका ।५१।

+ सं०—निष्पाव । हि०—भटवास । बँ०—भेटरासु । म०—कडवेवाल । गु०—ओलिया । क०—आवरे तै०—अग्रपचेट्टु ।

❀ सं०—मंकुष्ठ । हि०—मोठ । बँ०—वनमूग । म०—भटक्या । गु०—मठ । क०—गुगु । तै०—कंकपेसालु । इं०—इकोनाईट लीव्ड किडनी बीन (Aconite leaved kidney bean) फा०—मापहिन्दी ।

× सं०—मांगल्यक, मसूर । हि०—मसूर । बँ०—मुसूरि, कलाय । म०—मसूर । गु०—मसूर । क०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मसूरो मधुरः पाके संग्राही शीतलो लघुः ।
कफपित्तास्रजिद्रूक्षो वातलो ज्वरनाशनः ॥५२॥

❀ आढकीधान्यजातिर्गुणाश्च—

आढकी तुवरी चापि सा प्रोक्ता शणपुष्पिका ।
आढकी तुवरा रूक्षा मधुरा शीतला लघुः ॥५३॥
ग्राहिणी वातजननी वर्ण्या पित्तकफास्रजित् ।

× चणकनामानि गुणाश्च—

चणको हरिमन्थः स्यात्सकलप्रिय इत्यपि ॥५४॥
चणकः शीतलो रूक्षः पित्तरक्तकफापहः ।
लघुः कषायो विष्टम्भी वातलो ज्वरनाशनः ॥५५॥
स चांगारेण संभृष्टस्तैलभृष्टश्च तद्गुणः ।
आर्द्रभृष्टो बलकरो रोचनश्च प्रकीर्तितः ॥५६॥

चणगी । तै०—मसूर पप्पू । ता०—मिमुर पुरपुर । इं०—लेंटिल (Lantil) फा०—बुनो सुर्ख । अ०—अदस ।

❀ सं०—आढकी । हि०—अरहर । बँ०—अडहर । म०—तुरी । गु० - तुरदाल्य । क०—कटला कटु । तै०—कंदुलु । इं०—पीजियन पी (Pigion pea) फा०—शाखुल ।

× सं०—चणक । हि०—चना । बँ०—बूट ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC0. In Public Domain, Digitizagtion by eGangotri

शुष्कभृष्टोऽतिरूक्षः स्याद्वातपित्तप्रकोपनः ।
स्विन्नः पित्तकफं हन्यात्सूपः क्षोभकरो मतः ॥५७॥
आर्द्रोऽतिकोमलो रुच्यः पित्तशुक्रहरो हितः ।
कषायो वातलो ग्राही कफपित्तहरो लघुः ॥५८॥

× कलायनामानि गुणाश्च—

कलायो वर्तुलः प्रोक्तः सतीनश्च हरेणुकः ।
कलायो मधुरः स्वादुः पाके रूक्षश्चशीतलः ॥५९॥

त्रिपुटनामानि गुणाश्च—

त्रिपुटः कण्टकोऽपि स्यात्कथ्यन्ते तद्गुणा अमी ।
त्रिपुटो मधुरस्तिक्तस्तुवरो रूक्षणो भृशम् ॥६०।
कफपित्तहरो रुच्यो ग्राहकः शीतलस्तथा ।
किन्तु खञ्जत्वपंगुत्वकारी वातातिकोपनः ॥६१।

म०—हरभरे । गु०—चाण्या । क०—कडले । तै०—शत गालु । इं०—ग्राम (Gram) फा०—नखूदे । अ०—हुमस ।

× सं०—कलाय । हि०—मटर, केराव । बँ०—मटर । म०—वाटाणें । गु०—मटाणां । क०—वदकडले तै०—लांक । इं०—चिकलिंगवेच (Cnickling Vatch) फा०—मासंग । अ०—हुलबकर ।

Jangamwadi Math Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ कुलत्थनामानि गुणाश्च—

कुलत्थिका कुलत्थश्च कथ्यन्ते तद्गुणा अथ ।
कुलत्थः कटुकः पाके कषायः पित्तरक्तकृत् ॥६२॥
लघुर्विदाही वीर्योष्णः श्वासकासकफानिलान् ।
हन्ति हिक्काश्मरीशुक्रदाहानाहान्सपीनसान्॥६३॥
स्वेदसंग्राहको मेदोज्वरक्रिमिहरः परः ।

× तिलजातिभेदः गुणाश्च—

तिलः कृष्णः सितो रक्तः स वन्योऽल्पतिलः स्मृतः ॥
तिलो रसे कटुस्तिक्तो मधुरस्तुवरो गुरुः ।
विपाके कटुकः स्वादुः स्निग्धोष्णः कफपित्तनुत् ६५
बल्यः केश्यो हिमस्पर्शस्त्वच्यः स्तन्यो व्रणे हितः ।
दन्त्योऽल्पमूत्रकृद्ग्राही वातघ्नोऽग्निमतिप्रदः ।६६।

❀ सं०-कुलित्थ । हि०-कुलथी । बँ०-कुलथी । म०-कुलीथ हुलगे । गु०-कलथी । क०—हुलुवले तीसी । तै०-वुलावुलु । इँ०-टुफ्लावर्ड डोलीकस (Two ffoverd dolicos) फा०-किल्लतमुख हिंदी । अ०-हबुलकिलात ।

× सं०-हि०—तिल । बँ०-तिलगाछ । म०—तील । गु० तिल । क०-एलु । तै०—तोवुल । ता०—वाल्लेनेय । ता०-वारिक तिल । इँ०-सिसामम नाइजर सीड (Sisa-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तिलभेदः—

कृष्णः श्रेष्ठतमस्तेषु शुल्को वै मध्यमः स्मृतः।
अन्यो हीनतरः प्रोक्तस्तज्ज्ञै रक्तादिकस्तिलः॥६७॥

× अतसीनामानि गुणाश्च—

अतसी नीलपुष्पी च पार्वती स्यादुमा क्षुमा।
अतसी मधुरा तिक्ता स्निग्धा पाके कटुर्गुरुः॥६८॥
अतसी शुक्रवातघ्नी कफपित्तविनाशिनी।

+ तुवरीगुणाः—

तुवरी ग्राहणी प्रोक्ता लघ्वी कफविषास्रजित्॥६९॥

गौरसर्षपगुणाः—

तीक्ष्णोष्णा वह्निदा कंडूकुष्ठकोष्ठक्रिमिप्रणुत्।
सर्षपः कटुकः स्नेहस्तन्तुभश्च कदम्बकः॥७०॥

× सं०—अतसी। हि०—अलसी, तीसी। बँ०—मसिना। म०—जवस। गु०—अलशी। क०—असगे तै०—नल्लपगसि चेट्टु। इं०-कामन् फ्लेक्सीड्स, लाइन-सीड्स (Common flaxseeds, Linseeds) फा०—तुख्मेकतान। अ०—बजरुलकतान।

+ सं० तुवरी। हि०—तरावा, तारामीरा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गौरस्तु सर्षपः प्राज्ञैः सिद्धार्थ इति कथ्यते ।
सर्षपस्तु रसे पाके कटुः स्निग्धः सतिक्तकः ॥७१॥
तीक्ष्णोष्णः कफवातघ्नो रक्तपित्ताग्निवर्द्धनः ।
रक्षोहरो जयेत्कंडूकुष्ठकोष्ठक्रिमिग्रहान् ॥७२॥
यथा रक्तस्तथा गौरः किंतु गौरो वरो मतः ।

× राजिकानामानि गुणाश्च—

राजी तु राजिका तीक्ष्णगन्धा क्षुज्जनकासुरी ॥७३॥
क्षवः क्षुधाभिजनकः कृष्णिका कृष्णसर्षपः ।
राजिका कफपित्तघ्नी तीक्ष्णोष्णा रक्तपित्तकृत्।७४।
किञ्चिद्रूक्षाग्निदा कण्डूकुष्ठकोष्ठक्रिमीन् हरेत् ।
अतितीक्ष्णा विशेषेण तद्वत्कृष्णापि राजिका ॥७५॥
सरा हिमा गुरुर्ग्राही तत्पुष्पं प्रदरास्रजित् ।

बँ०—मरिषा । म०—शिरस । गु०—शरशव । क०—बिलीयसासेव । तै०—पाच्या, पश्वालु । इं०—सिवापिस आल्वा । फा०—सर्षफ । अ०—उर्फे अवीयद ।

× सं०—राजिका । हि०—राई, लाही । बँ०—राई सर्षे । म०—मोहरी, रायी । गु०—राई । क०—सासिराई । तै०—वर्णालु । इं०—मस्टर्ड सीड्स (Mustard seeds)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षुद्रधान्यनामानि गुणाश्च—

क्षुद्रधान्यं कुधान्यं च तृणधान्यमिति स्मृतम्॥७६॥
क्षुद्रधान्यमनुष्णं स्यात्कषायं लघु लेखनम्।
वातकृद्बद्धविट्कं च पित्तरक्तकफापहम् ॥७७॥

× कंगुधान्यजातिर्गुणा भेदाश्च—

स्त्रियां कङ्गुप्रियंगू द्वे कृष्णा रक्ता सिता तथा॥७८॥
पीता चतुर्विधा कङ्गुस्तासां पीता वरा स्मृता।
कंगुस्तु भग्नसन्धानवातकृद्बृंहणी गुरुः ॥७९॥
रूक्षा श्लेष्महराऽतीव वाजिनां गुणकृद् भृशम्।

+ चीनाकनामगुणाः—

चीनाकः कंगुभेदोऽस्ति स ज्ञेयः कंगुवद्गुणैः॥८०॥

❀ श्यामाकगुणाः—

श्यामाकः शोषणो रूक्षो वातलः कफपित्तहृत्।

× सं०—कंगु, प्रियंगु। हि०—कंगुनी। बँ०—कांगुनी। म०—गु०—काम। क०—नवणे। तै०-कोर्रलु। फा०—गल।

+ सं०—चीनक। हि०—चीने। बँ०—चीने। म०—राले। गु०—चीणो। क०—चीनक। इं०-(Millet) मिलट। फा०—उरजान। अ०—वारेगा।

❀ सं०—श्यामाक। हि०-सांवा। बं०-शामा धान। म०-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ कोद्रवनामानि गुणाश्च—

कोद्रवः कोरदूषः स्यादुद्दालो वनकोद्रवः ॥८१॥

कोद्रवो वातलो ग्राही हिमः पित्तकफापहः।

उद्दालस्तु भवेदुष्णो ग्राही वातकरो भृशम् ॥८२॥

सरबीजनामानि गुणाश्च—

चारुकः सरबीजं स्यात्कथ्यन्ते तद्गुणा अथ।

चारुको मधुरो रूक्षो रक्तपित्तकफापहः ॥८३॥

शीतलो लघुवृष्यश्च कषायो वातकोपनः।

वंशबीजगुणाः—

यवा वंशभवा रूक्षाः कषायाः कटुपाकिनः ॥८४॥

बद्धमूत्राः कफघ्नाश्च वातपित्तकराः सराः।

ल०—सांवे। गु०—शामा। क०—सधे। तै०—श्यामालु। फा०—शामाख।

❀सं०-कोद्रव, कोरदूष। हि०-कोदो। बँ०-कोदो धान्य। म०--हरीक। गु०--कोदरो। क०--हारकं। तै०--आलवालु। इं०--पंक्चर्ड पास्पेलम (Punctured Paspalum)।

Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

*कुसुम्भबीजनामानि गुणाश्च—

कुसुम्भबीजं वरटा सा वै प्रोक्ता वराटिका ॥८५॥
वरटा मधुरा स्निग्धा रक्तपित्तकफापहा ।
कषाया शीतला गुर्वी स्यादवृष्यानिलापहा ॥८६॥

गवेधुकानामानि गुणाश्च—

गवेधुका तु विद्वद्भिर्गवेधुः कथिता स्त्रियाम् ।
गवेधुः कटुका स्वाद्वी कार्श्यकृत्कफनाशिनी ॥८७॥

† नीवारनामानि गुणाश्च—

प्रसाधिका तु नीवारस्तृणान्नमिति च स्मृतम् ।
नीवारः शीतलो ग्राही पित्तघ्नः कफवातकृत् ॥८८॥

---

*सं०—कुसुम्भबीज। हि० कर्र। बं०—कुसुम्भफल। म०—कड्या। गु०—कुसुम्बानोबी। फा०—तुख्मकापशा। अ०—हबुल अस्फर।

†सं०—नीवार। हि०—तिन्नी। बं०—उडीधान्य। म०—देवमाला। गु०—पडी। क०—उरसुपोथे। तै०—कविरवेट्टु।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यवनालगुणाः—

यवनालो हिमः स्वादुर्लोहितः श्लेष्मपित्तजित् ।
अवृष्यस्तुवरो रूक्षः क्लेदकृत्कथितो लघुः ॥८९॥

शणनामानि गुणाश्च—

शणः प्रोक्तो मातुलानी जन्तुतन्तुर्महाशनः ।
शणो हिमो लघुर्ग्राही तत्पुष्पं प्रदरास्रजित् ॥९०॥

नवधान्यादिगुणाः—

धान्यं सर्वं नवं स्वादु गुरु श्लेष्मकरं स्मृतम् ।
तत्तु वर्षोषितं पथ्यं यतो लघु वरं हितम् ॥९१॥
वर्षोषितं सर्वधान्यं गौरवं परिमुञ्चति ।
न तु त्यजति वीर्यं स्वं क्रमान्मुञ्चत्यतः परम् ॥९२॥
एतेषु यत्र गोधूमतिलमाषा नवा हिताः ।
पुराणा विरसा रूक्षा न तथा गुणकारिणः ॥९३॥

इति धान्यवर्गः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शाकवर्गः ।

शाकभेदा गुणाश्च—

पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्यात्तथोत्तरम् ॥१॥
प्रायः शाकानि सर्वाणि विष्टम्भीनि गुरूणि च ।
रूक्षाणि बहुवीर्याणि सृष्टविण्मारुतानि च ॥२॥
शाकं भिनत्ति वपुरस्थि निहन्ति नेत्रं
वर्णं विनाशयति रक्तमथापि शुक्रम् ।
प्रज्ञाक्षयं च कुरुते पलितं च नूनं
हन्ति स्मृतिं गतिमिति प्रवदन्ति तज्ज्ञाः॥३॥
शाकेषु सर्वेषु वसन्ति रोगास्ते हेतवोदेहविनाशनाय।
तस्माद्बुधः शाकविवर्जनं तु
कुर्यात्तथाऽम्लेषु स एव दोषः ॥४॥
एतानि शाकनिन्दकवचनानि सामान्यानि ।

❀ पत्रशाके वास्तूकद्वयनामानि गुणाश्च—

वास्तूकं वास्तुकं च स्यात्क्षारपत्रं च शाकराट् ।
तदेव तु बृहत्पर्व रक्तं स्याद्गौडवास्तुकम् ॥५॥

❀ सं०—वास्तूक, गौडवास्तूक । हि०—बथुआ । बं०—बेतुया । म०—चाकवत । गु०—ढांकी । क०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रायशो यवमध्ये स्याद्यवशाकमतः स्मृतम् ।
वास्तूकद्वितयं स्वादु क्षारं पाके कटूदितम् ॥६॥
दीपनं पाचनं रुच्यं लघु शुक्रबलप्रदम् ।
सरं प्लीहास्रपित्तार्शःक्रिमिदोषत्रयापहम् ॥७॥

† पोतकीनामानि गुणाश्च—

पोतक्युपोदिका सा तु मालवेऽमृतवल्लरी ।
पोतकी शीतला स्निग्धा श्लेष्मला वातपित्तनुत् ॥८॥
अकण्ठ्या पिच्छिला निद्राशुक्रदा रक्तपित्तजित् ।
बलदा रुचिकृत्पथ्या बृंहणी तृप्तिकारिणी ॥९॥

❀ श्वेतरक्तमारिषनामानि गुणाश्च—

मारिषो बाष्पिको मर्षः श्वेतो रक्तश्च स स्मृतः ।
मारिषो मधुरः शीतो विष्टम्भी पित्तनुद् गुरुः ॥१०॥
वातश्लेष्मकरो रक्तपित्तनुद्विषमाग्निजित् ।

चक्रवती । इं०—ह्वाइट गुज फुट (White goose foot) परफलगुजफुट (Purple goose foot)

† सं०—पोतकी, उपोदिका । हि०—पोईका साग । बं०—पुंई शाक । म०—मायालु । गु०—पोथी । इं०-रेड मल्वर नाइट झोर (Red malbar night jhore)

❀ सं०—मारिष, मर्ष । हि०—मरसा । बं०—काटान-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रक्तमर्षो गुरुर्नातिसक्षारं मधुरः सरः ॥११॥
श्लेष्मलः कटुकः पाके स्वल्पदोष उदीरितः ।

❀ तण्डुलीयनामानि गुणाश्च—

तण्डुलीयो मेघनादः काण्डेरस्तण्डुलेरकः ॥१२॥
भण्डीरस्तण्डुलीबीजो विषघ्नश्चाल्पमारिषः।
तण्डुलीयो लघुः सीतो रूक्षः पित्तकफास्रजित् ॥१३।
सृष्टमूत्रमलो रुच्यो दीपनो विषहारकः ।
पानीयतण्डुलीयो यस्तत्कञ्चटमुदाहृतम् ॥१४॥
कञ्चटं तिक्तकं रक्तपित्तानिलहरं लघु ।

† पालिक्यानामानि गुणाश्च—

पालिक्या वास्तुकाकारा छर्दिका चीरितच्छदा १५

टेरशाक । म०—माठाची भाजी । गु०-डांभो । तै०—हुलगर।

❀ सं०—तण्डुलीय, मेघनाद । हि०—चौराई । बँ०—कांचडादाम । म०—चवलाई । गु०—तांजलओ । तै०—मोलकुरा। क०—किरुकुशाले । ता०—मुल्लु क्विरई । इं०—हरमे फ्रोडाइट एमेरेंथ (Herma phrodite amarnath) फा०—सुफेद मर्ज । अ०—बुकलेयमानीय ।

† सं०—पालिक्य । हि०—पालक । बं०—पालं शाक ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पालिक्या वातला शीता श्लेष्महा मेदनी गुरुः ।
विष्टम्भनी मदश्वासपित्तरक्तकफापहा ॥ १६ ॥

कालशाकनामानि गुणाश्च—

नाडीकं कालशाकं च श्राद्धशाकं च कालकम् ।
कालशाकं सरं रुच्यं वातकृत्कफशोथहृत् ॥ १७ ॥
बल्यं रुचिकरं मेध्यं रक्तपित्तहरं हितम् ।

❀ पटुशाकनामानि गुणाश्च—

पटुशाकस्तु नाडीका नाडीशाकश्च स स्मृतः ॥ १८ ॥
नाडीको रक्तपित्तघ्नो विष्टम्भी वातकोपनः ।

† कलम्बीनामानि गुणाश्च—

कलम्बी शतपर्वा च कथ्यन्ते तद्गुणा अथ ॥ १९ ॥
कलम्बी शुक्रदा प्रोक्ता मधुरा स्तन्यकारिणी ।

म०—पालख गु०—पालख । क०—पालक्य । इं०—स्पाईनेज (Spinage) फा०—इस्यनाख । अ०-अस्यनाख

❀ सं०—पटुशाक । हि०—पटुआका साग । बँ०—पाटशाक । म०-पाटशाक । म०—नाडीशाक । गु०-नालानीभाजी

† सं०—कलम्बी । हि०—कलमी शाक । बँ०—कलमी । तै०—तीमेवच्चालिचेट्टु ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

† लोनीबृहल्लोन्योर्नामानि गुणाश्च—

लोणा लोणी च कथिता बृहल्लोणी तु घोटिका ।२०।
लोणी रूक्षा स्मृता गुर्वी वातश्लेष्महरी पटुः ।
अर्शोघ्नी दीपना चाम्ला मन्दाग्निविषनाशिनी २१
घोटिकाम्ला सरा चोष्णा वातकृत्कफपित्तहृत् ।
वाग्दोषव्रणगुल्मघ्नी श्वासकासप्रमेहनुत् ॥२२॥
शोथे लोचनरोगे च हिता तज्ज्ञैरुदाहृता ।

चांगेरीनामानि गुणाश्च—

चांगेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका ॥२३॥
अश्मन्तकस्तु शफरी कुशला चाम्लपत्रिका ।
चाङ्गेरी दीपना रुच्या रूक्षोष्णा कफवातनुत् ।२४।
पित्तलाम्लग्रहण्यर्शःकुष्ठातीसारनाशिनी ।

❀ चुक्रिकानामानि गुणाश्च—

चुक्रिका स्यात्तु पत्राम्ला रोचनी शतवेधनी ॥२५॥

---

† सं०—लोणा, लोणी । हि०-लोनी । बँ०—वडणुनी । म०—घोल । गु०—लुणी । क०—गोलि । तै०—अईलकुस । फा०—कोरलकीरइ । इँ०—पर्सलेन (Purse Lane) फा०—खुरफा । अ०—वक्क, तुलहुमक्का ।

❀ सं०—चुक्रा, चुक्रिका । हि०—चुका । बँ०—चुक

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चुक्रा त्वम्लतरा स्वाद्वी वातघ्नी कफपित्तकृत् ।
रुच्या लघुतरा पाके वृन्ताकेनातिरोचनी ॥२६॥

❀ चिंचानामानि गुणाश्च—

चिञ्चा चञ्चुश्चञ्चुकी च दीर्घपत्रा सतिक्तका ।
चिञ्चूः शिता सरा रुच्या स्वाद्वी दोषत्रयापहा ।२७।
धातुपुष्टकरी बल्या मेध्या पिच्छिलिका स्मृता ।

+ हिलमोचिकानामानि गुणाश्च—

ब्रह्मी शंखदराचारी ब्राह्मी च हिलमोचिका ॥२८॥
शोथं कुष्ठं कफं पित्तं हरते हिलमोचिका ।

❀ शितिवारनामानि गुणाश्च—

शितिवारः शितिवरः स्वस्तिकः सुनिषण्णकः ॥२९।

पालङ् । म०—आंबाचुका । गु०—चुकोखाटी भाजी । क०—हलिचकोट । इं०-ब्लेड डर्ड डॉक (Blad dered Dock) फा०—तुरशकबड़ा । अ०—हमाज़ बुकले हामेज ।

❀ सं०—चिंचा । हि०—चेंचु । बं०—चेचको । म०—लघुचंचु । गु०—छुछराजगरीनी भाजी । तै०—चिन्तचेट्टु ।

+ सं०—हिलमोचिका, ब्रह्मी । हि०—हुरहुर । बं०—हिचेशाक । उत्कल०—हिरमिचा ।

❀ सं०—शितिवार, सुनिष्णक । हि०—गठवा । बं०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चाङ्गेरीसदृशः पत्रैश्चतुर्दल इतीरितः ॥३०॥
शाको जलान्विते देशे चतुष्पत्रीति चोच्यते ।
सुनिषण्णो हिमो ग्राही मोहदोषत्रयापहा ॥३१॥
अविदाही लघुः स्वादुः कषायो रूक्षदीपनः ।
वृष्यो रुच्यो ज्वरश्वासमेहकुष्ठभ्रमप्रणुत् ॥३२॥

मूलकनामानि गुणाश्च—

पाचनं लघु रुच्योष्णं पत्रं मूलकजं नवम् ।
स्नेहसिद्धं त्रिदोषघ्नमसिद्धं कफपित्तकृत् ॥३३॥

द्रोणपुष्पीगुणाः—

द्रोणपुष्पीदलं स्वादु रूक्षं गुरु च पित्तकृत् ।
भेदनं कामलाशोथमेहज्वरहरं कटु ॥३४॥

यवानीनामानि गुणाश्च—

यवानी शाकमाग्नेयं रुच्यं वाकफप्रसृत् ।
उष्णं कटु च तिक्तं च पित्तलं लघुशूलहृत् ॥३५॥

❀ दद्रुघ्नगुणाः—

दद्रुघ्नपत्रं दोषघ्नमम्लं वातकफापहम् ।
कण्डूकासकृमिश्वासददुकुष्ठप्रणुल्लघु ॥३६॥

सुषुणी शाक । म०—कुरडू । गु०—ओटीगण । तै०—सुविषण्णमनेशाकमु । फा०—अंजरा । अ०—बजहुल अज़रा ।

❀ सं०—दद्रुघ्न । हि०—पमार ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सेहुण्डगुणाः—

सेहुण्डस्य दलं तीक्ष्णं दीपनं रेचनं हरेत् ।
आध्मानाष्ठीलिकागुल्मशूलशोथोदराणि च ॥३७॥

पर्पटगुणाः—

पर्पटो हन्ति पित्तास्रज्वरतृड् रेचनं हरेत् ।
संग्राही शीतलस्तिक्तो दाहनुद्वातलो लघुः ॥३८॥

गोजिह्वगुणाः—

गोजिह्वा कुष्ठमेहास्रकृच्छ्रज्वरहरी लघुः ।

पटोलपत्रगुणाः—

पटोलपत्रं पित्तघ्नं दीपनं पाचनं लघु ॥३९॥
स्निग्धं वृष्यं तथोष्णं च ज्वरकासकृमिप्रणुत् ।

गुडूचीगुणाः—

गुडूचीपत्रमाग्नेयं सर्वज्वरहरं लघु ॥४०॥
कषायं कटु तिक्तं च स्वादु पाके रसायनम् ।
बल्यमुष्णं च संग्राहि हन्याद्दोषत्रयं नृणाम् ॥४१॥
दाहप्रमेहकासासृक्कामलाकुष्ठपाण्डुताः ।

❀ कासमर्दनामानि गुणाश्च—

कासमर्दोऽरिमर्दश्च कासारी कर्कशस्तथा ।

सं०—कासमर्द । हि०—कसौंदी । बं०—कालका

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

कासमर्ददलं रुच्यं वृष्यं कासविपास्रनुत् ॥४२॥
मधुरं कफवातघ्नं पाचनं कण्ठशोधनम् ॥४३॥
विशेषतः कासहरं पित्तघ्नं ग्राहकं लघु ।

चणकशाकगुणाः—

रुच्यं चणकशाकं स्याद् दुर्जरं कफवातकृत् ॥४४॥
अम्लं विष्टंभजनकं पित्तनुद्दन्तशोथहृत् ।

कलायशाकगुणाः—

कलायशाकं भेदि स्याल्लघु तिक्तं त्रिदोषजित् ।४५।

सार्षपनामानि गुणाश्च—

कटुकं सार्षपं शाकं बहुमूत्रमलं गुरु ।
अम्लं पाकं विदाहि स्यादुष्णं रूक्षं त्रिदोषकृत् ।४६।
सक्षारं लवणं तीक्ष्णं स्वादु शाकेषु निन्दितम् ।

पुष्पशाकअगस्तिककुसुमगुणाः—

अगस्तिकुसुमं शीतं चातुर्थिकनिवारणम् ॥४७॥
नक्तान्ध्यनाशनं तिक्तं कषायं कटुपाकि च ।
पीनसश्लेष्मपित्तघ्नं वातघ्नं मुनिभिर्मतम् ॥४८॥

सुन्दा । म०—रानकासविन्दा । गु०—कांसोंदरी । क०—कासवदी । तै०—गुरंपुताढयम् । इं०—राउण्ड, पोडेड केसिया (Round poded cassia)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कदलीकुसुमगुणाः—

कदल्याः कुसुमं स्निग्धं मधुरं तुवरं गुरु ।
वातपित्तहरं शीतं रक्तपित्तक्षयप्रणुत् ॥४९॥

शिग्रुपुष्पगुणाः—

कृमिहृत्कफपित्तघ्नं विद्रधिप्लीहगुल्मजित् ॥५०॥
मधुशिग्रुस्त्वचिहितं रक्तपित्तप्रसादनम् ।

शाल्मलीनामानि गुणाश्च—

शाल्मलीपुष्पशाकं तु घृतसैन्धवसाधितम् ॥५१॥
प्रदरं नाशयत्येव दुःसाध्यं च नसंशयः ।
रसे पाके च मधुरं कषायं शीतलं गुरु ॥५२॥
कफपित्तास्रजिद् ग्राहि वातलं च प्रकीर्तितम् ।

❀ फलशाककूष्मांडकनामानि गुणाश्च—

कूष्माण्डजं स्यात्पुष्पफलं पीतपुष्पं बृहत्फलम् ।५३।
कूष्माण्डं बृंहणं वृष्यं गुरु पित्तास्रवातनुत् ।
बालं पित्तापहं शीतं मध्यमं कफकारकम् ॥५४॥
वृद्धं नातिहिमं स्वादु सक्षारं दीपनं लघु ।
बस्तिशुद्धिकरं चेतोरोगहृत्सर्वदोषजित् ॥५५॥

❀सं०-कूष्माण्ड । हि०-सफेद कुम्हड़ा, पेठा, खबहा । बं०-कुमड़ा । मा०-कोहला । गु०-भूरु कोलुं । कु०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

❀ कूष्माण्डीजातिर्गुणाश्च—

कूष्माण्डी तु भृशं लघ्वी कर्मारुरपि कीर्तिता।
कर्कारुर्ग्राहिणी रुच्या शीता पित्तहरी गुरुः ॥५६॥
पक्वा पित्ताग्निजननी सक्षारा कफवातनुत्।

+ मिष्टतुम्बीनामानि गुणाश्च—

मिष्टतुम्बीफलं हृद्यं पित्तश्लेष्मापहं गुरु ॥५७॥
पुष्पं रुचिकरं प्रोक्तं धातुपुष्टिविवर्द्धनम् ॥५८॥

× कटुतुम्बीनामानि गुणाश्च—

इक्ष्वाकुः कटुतुम्बी स्यात्सा तुम्बी च बृहत्फला।

दारकोहोडा। तै०—पुल्लाहा। इं०—पंपकिन (Pumpkin) फा०—भूराकुदु। अ०—महद्देवा।

❀ सं०—पीतकूष्माण्ड। हि०—कोहड़ा, काशीफल। बं०—विलाती कुमडा। म०—तांबडा भोपला। गु०—वत्तकोलु। क०—डंगर। तै०—तिब्बगुवडकाया। इं०—दि गोर्ड (The gourd) फा०—बादरंग।

+ सं०—अलाबू, तुम्बी। हि०—कद्दू, लौआ, लौकी। बं०—कउडुबलकायि। तै०—तीयातुरवडीकाया। इं०—ह्वाइट गोर्ड (White gourd)। फा०—कुदुशिरिन्। अ०—युक्तिनेहुलुकरा।

× सं०—कटुतुम्बी। हि०-तितलौंकी। बं०—तितकाउ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

कटुतुम्बी हिमा हृद्या पित्तकासविषापहा ॥५९॥
तिक्ता कटुविपाके च वातपित्तज्वरान्तकृत् ।

❀ कर्कटीनामानि गुणाश्च—

एर्वारुः कर्कटी प्रोक्ता कथ्यन्ते तद्गुणा अथ ॥६०॥
कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः ।
रुच्या पित्तहरा सामा पक्वा तृष्णाग्निपित्तकृत् ।६१।

× चिचिंडानामानि गुणाश्च—

चिचिण्डा श्वेतराजिः स्यात्सुदीर्घा गृहकूलकः ।
चिण्डलो वातपित्तघ्नो बल्यः पथ्यो रुचिप्रदः ।६२।
शोषणोऽतिहिमः किञ्चिद्गुणैर्न्यूनः पटोलतः ।

म०—कडूभोंपड़ा । गु०—कडवी तुंबड़ी । क०—कही-सोरे । तै०—चेति आनव । इं०—बेटल गोर्ड (battle gourd) फा०—कदुदुतल्ख । अ०—करउलमुर ।

❀ सं०—कर्कटी । हि०—ककड़ी । क०—क्येय-सौत । तै०—दोसकाया । इं०—कंकंबर (Cucumber) फा०—स्याटजाप । अ०—किस्सा कदस ।

× सं०—चिचिण्डा, श्वेतराजि । हि०—चिचेंडा । बं०—चिचिण्डा । म०—उरकांकड़ी । गु०—पंडोला । तै०—पोटला काया । इं०—स्नेकगोर्ड (Snakegourd)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ कारवेल्लनामानि गुणाश्च—

कारवेल्लं कटिवेल्लं स्यात्कारवेल्ली ततो लघुः ।६३।
कारवेल्लं हिमं भेदि लघु तिक्तं च वातलम् ।
ज्वरपित्तकफास्रघ्नं पाण्डुमेहक्रिमीन् हरेत् ॥६४॥
तद्गुणा कारवेल्ली स्याद्विशेषाद्दीपनी लघुः ।

× महाकोशातकीनामानि गुणाश्च—

महाकोशातकी ज्योत्स्ना हस्तिघोषा महाफला ६५
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः ।
महाकोशातकी स्निग्धा रक्तपित्तानिलापहा ॥६६॥

❀ राजकोशातकीनामानि गुणाश्च—

धामार्गवः पीतपुष्पो जालनी कृतवेधनः ।
राजकोशातकी चेति तथोक्ता राजिमत्फला ॥६७॥

❀ सं०—कारवेल्ल । हि०—करेला । बं०-करेला उच्छे । म०—कारले । गु०—कारेला । क०—हागल । तै०—करिला । इं०—हेरीमोर्डिका (Hairy mordica) फा०—कोरलाह । अ०—किस्सा ।

× सं०—महाकोशातकी । हि०—घिया तरोई, नेनुआँ । बं०—हस्तिघोषा । म०—घोसाली । गु०—गलकाँ । क०—अरहिरे । तै०—एनुगबीर । फा०—खियार ।

❀ सं०—राजकोशातकी । हि०—कड़वी तरोई ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

राजकोशातकी शीता मधुरा कफवातला।
पित्तघ्नी दीपनी श्वासज्वरकासकृमिप्रणुत् ॥६८॥

❀ पटोलनामानि गुणाश्च—

पटोलः कूलकस्तिक्तः पाण्डुकः कर्कशच्छदः।
राजीफलः पाण्डुफलो राजेयश्चामृताफलः ॥६९॥
बीजगर्भः प्रतीकश्च कुष्ठहा कासभञ्जनः।
पटोलं पाचनं हृद्यं वृष्यं लघ्वग्निदीपनम् ॥७०॥
स्निग्धोष्णं हन्ति कासास्रज्वरदोषत्रयक्रिमीन्।
पटोलस्य भवेन्मूलं विरेचनकरं सुखात् ॥७१॥
नालं श्लेष्महरं पत्रं पित्तहारि फलं पुनः।
दोषत्रयहरं प्रोक्तं तद्वत्तिक्तपटोलकम् ॥७२॥

बं०—झींगा। म०—दीवाली। गु०—कडवा तुरीया। क०—काहिरे। तै०—चेट्टुविर्काया। इं०—बिटर ल्यूफा (Better luffa)

❀ सं०—पटोल, तिक्त पटोल। हि०—परवल, कडवे परवल। बं०—पलतालता, पटोल। म०—पडवल, कडुपडवल। गु०—पटोल, कडवा पटोल। क०—पडवल, कडिपडवल। ते०—सेसपदूला। ता०—कोम्बु पुडले।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ बिन्दीनामानि गुणाश्च—

बिम्बी रक्तफला तुण्डी तुण्डकेरी च बिम्बिका।
अष्टोपमफला प्रोक्ता पीलुपर्णी च कथ्यते ॥७३॥
बिम्बीफलं स्वादु शीतं गुरुपित्तास्रवातजित्।
स्तम्भनं लेखनं रुच्यं विबन्धाध्मानकारकम् ॥७४॥

× शिम्बीद्वयनामानि गुणाश्च—

शिम्बी शिम्बिः पुस्तशिम्बः तथा पुस्तकशिम्बिका।
शिम्बीद्वयं च मधुरं रसे पाके हिमं गुरु ॥७५॥
बल्यं दाहकरं प्रोक्तं श्लेष्मलं वातपित्तजित्।
कोलशिम्बी कृष्णफला तथा पर्यंकपादिका ॥७६॥
कोलशिम्बी समीरघ्नी गुर्व्युष्णा कफपित्तकृत्।
शुक्राग्निसादकृत् वृष्या रुचिकृद्बद्धविड् गुरुः ।७७॥

❀ सं०—बिम्बी। हि०—कन्दूरी। बं०—तेलाकुच। म०—कोंडवली। गु०—गोलामिठां। क०—सीहि दोंडे। ता०—कोवे। तै०—दोंडतिगे।

× सं०—शिम्बी। हि०—सेम। बं०—शेमगाछ। मा०—खससांवल। गु०—परबेलिया। तै०—कारुचिकचु। अ०—[illegible]।

Dr. Umakant Sama Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सौभाञ्जनगुणाः—

सौभाञ्जनं फलं स्वादु कषायं कफपित्तनुत् ।
शूलकुष्ठक्षयश्वासगुल्महृद्दीपनं परम् ॥७८॥

❀ वृन्ताकनामानि गुणाश्च—

वृन्ताकं स्त्री तु वार्ताकु भण्टाकी भण्ट कापि च ।
वृन्ताकं स्वादु तीक्ष्णोष्णं कटुपाकमपित्तलम् ।७९॥
वरवातबलासघ्नं दीपनं शुक्रलं लघु ।
तद्बालं कफपित्तनं वृद्धं पित्तकरं लघु ॥८०॥
वृन्ताकं पित्तलं किंचिदंगारपरिपाचितम् ।
कफमेदोऽनिलामघ्नमत्यर्थं लघु दीपनम् ॥८१॥
तदेव हि गुरु स्निग्धं तत्तैलं लवणान्वितम् ।
अपरं श्वेतवृन्ताकं कुक्कुटाण्डसमं भवेत् ॥८२॥
तदंशस्तु विशेषेण हितं हीनं च पूर्वतः ।

❀ सं०—वृन्ताक, वार्ताकु । हि०—बैंगन, भंटा । बँ०—बेगुन । म०—वांगे । गु०—रिंगणा । क०—बदने । तै०—बंकाया । ता०—कुठिरेकई । इं०—ब्रिंजल (Bringle) फा०—बादंगान । अ०—बादंजान ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

❀ तिण्डिशनामानि गुणाश्च—

तिण्डिशो रोमशफलो मुनिनिर्मित इत्यपि ॥८३॥
तिण्डिशो रुचिकृद्भेदी पित्तश्लेष्मापहः स्मृतः ।
सशीतो वातलो रूक्षो मूत्रलश्चाश्मरीहरः ॥८४॥

पिण्डारगुणाः—

पिण्डारं शीतलं बल्यं पित्तघ्नं रुचिकारकम् ।
पाके लघु विशेषेण विषशान्तिकरं स्मृतम् ॥८५॥

× कर्कोटकीनामानि गुणाश्च—

कर्कोटकी पीतपुष्पा महाजालीति चोच्यते ।
कर्कोटक्याः फलं कुष्ठहृल्लासारुचिनाशनम् ॥८६॥
श्वसकासज्वरान् हन्ति कटु पाकं च दीपनम् ।

डोण्डिकानामानि गुणाश्च—

डोण्डिका विषमुष्टिश्च डोण्डीत्यपि समुष्टिका ॥८७॥
डोण्डिका पुष्टिदा वृष्या रुच्या वह्निपदा लघुः ।
वातपित्तकफार्शांसि कृमिगुल्मविषामयान् ॥८८॥

❀ सं०—तिण्डिश, रोमफल । हि०—टेंडा ।
× सं०-कर्कोटकी, पीतपुष्पा । हि०-खेखसी, खेखसा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कण्टकारीगुणाः—

कण्टकारीफलं तिक्तं कटुकं दीपनं लघु ।
रूक्षोष्णं श्वासकासघ्नं ज्वरानिलकफापहम् ॥८९॥

नालशाकगुणाः—

तीक्ष्णोष्णं सार्षपं नालं वातश्लेष्मव्रणापहम् ।
कण्डूवमिहरं दद्रुकुष्ठघ्नं रुचिकारकम् ॥९०॥

❀ मूलकनामानि गुणाश्च—

भवेन्मूलकनालं तु विष्टम्भि फलकारकम् ।
वातपित्तहरं रुच्यं सुशुष्कं तद्गुणाभिधम् ॥९१॥

† कन्दशाक सूरणनामानि गुणाश्च—

सूरणः कन्द औलश्च कण्डूलोऽर्शोघ्न इत्यपि ।
सूरणो दीपको रूक्षः कषायः कण्डुकृत्कटुः ॥९२॥
विष्टम्भी विशदो रुच्यः कफार्शः कृन्तनो लघुः ।
विशेषादर्शसां पथ्यः प्लीहगुल्मविनाशनः ॥९३॥

❀ सं०—मूलक । हि०—मूली । बँ०—मुला । म०—मूला । गु०—मूला, मोगरी । क०—मुलंगी । तै०—शूतिदंपा । इं०—रेडिश (Radish) । फा०—तुखतुख्मतुख । अ०—फजल बजरुल ।

† सं०—सूरण । हि०—सूरन, जिमीकन्द । बं०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

सर्वेषां कन्दशाकानां सूरणः श्रेष्ठ उच्यते ।
दद्रूणां रक्तपित्तानां कुष्ठिनां न हितो हि सः ॥९४॥
सन्धानयोगं संप्राप्तः सूरणो गुणकृत्परः ।

आलुकनामानि गुणाश्च—

आलुकं वीरसेनं च वीरं वीरारुकं तथा ॥९५॥
आलुकं शीतलं सर्यं विष्टम्भि मधुरं गुरु ।
सृष्टमूत्रमलं रूक्षं दुर्जरं रक्तपित्तनुत् ॥९६॥
कफानिलकरं बल्यं वृष्यं स्वल्पाग्निवर्धनम् ।

❀ रक्तालुभेदः गुणाश्च—

रक्तालुभेदो या दीर्घा तन्वी च प्रथितालुकी ॥९७॥
आलुकी बलकृत्स्निग्धा गुर्वी हृत्कफनाशिनी ।
विष्टंभकारिणी तैले तालतोऽतिरुचिप्रदा ॥९८॥

ओल । म०—सुरण । गु०—क०—ता०—सुरण । तै०—मंचा कन्दा । फा०—ओल ।

❀ सं०—रक्तालु, पिण्डालु । हि०—रतालू, शकरकन्दी । बँ०—गोल आलू । म०—लाल रतालें । गु०—रतालु । क०—केपिन हेंडल, विलय हेंडल । ते०—चिरगेड् । ता०—वामस्कोल्लं । इ०—स्वीट पोटेटो (Sweet potato) फा०—जरकादलाहोरी ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

मूलकभेदः गुणाश्च—

मूलकं द्विविधं प्रोक्तं तत्रैकं लघु मूलकम् ।
शालामर्कटकं विस्रं शालेयं मरुसम्भवम् ॥९९॥
चाणक्यमूलकं तीक्ष्णं तथा मूलिकपोतिका ।
नेपालमूलकं चान्यत्तद्भवेद्गजदन्तवत् ॥१००॥
लघुमूलं कटूष्णं स्याद्रुच्यं च लघु पाचनम् ।
दोषत्रयहरं स्वर्य्यं ज्वरश्वासविनाशनम् ॥१०१॥
नासिकाकण्ठरोगघ्नं नयनामयनाशनम् ।
महत्तदेव रूक्षोष्णं गुरु दोषत्रयप्रदम् ॥१०२॥
स्नेहसिद्धं तदेव स्याद्दोषत्रयविनाशनम् ।

❀ गाजरनामानि गुणाश्च—

गाजरं गर्जरी प्रोक्ता तथा नारंगवर्णकम् ॥१०३॥
गाजरं मधुरं तीक्ष्णं तिक्तोष्णं दीपनं लघु ।
संग्राहि रक्तपित्तार्शोग्रहणीकफवातजित् ॥१०४॥

कदलीगुणाः—

शीतलः कदलीकन्दो बल्यः केश्योऽम्लपित्तजित् ।

❀सं०—गाजर, गृञ्जन । हि०—गाजर । बं०—गाजर । म०—गु०—गाजर । क०—सेठीमूलम् । तै०—गृंजनम् । इ०—कैरट रूट (Carrot root) कैरट सीड्स (Carrot seeds) फा०—जदक । अ०—जजर ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वह्निकृद्दाहहारी च मधुरो रुचिकारकः ॥१०५॥

मानकनामानि गुणाश्च—

मानकः स्यान्महापत्रः कथ्यन्ते तद्गुणा अथ।
मानकः शोथहृच्छीतः पित्तरक्तहरो लघुः ॥१०६॥

❀ वाराहीगुणाः—

वाराही पित्तला बल्या कटुतिक्ता रसायनी।
आयुःशुक्राग्निकृन्मेहकफकुष्ठानिलापहा ॥१०७॥

+ गजकर्णीगुणाः—

गजकर्णी तु तिक्तोष्णा तथा वातकफौ जयेत्।
शीतज्वरहरी स्वादुः पाके तस्यास्तु कन्दकः ॥१०८॥
पाण्डुशोथकृमिप्लीहगुल्मानाहोदरापहा।
ग्रहण्यर्शोविकारघ्नी वनसूरणकन्दवत् ॥१०९॥

❀ सं०—वाराहीकन्द। हि०—गोंठी। बँ०—चामालु। म०—डुकरकन्द। गु०—वाराहीकन्द। क०—हेदिगेड्डे। तै०—पाचितोके।

+ सं०—हस्तिकर्णी, गजकर्णी। हि०—अरुई, घुइया। म०—अलावाचा कांदा। गु०—अलवी। तै०—सारकंद। इं०—ग्रेट लीव्ड केलेडियम् (Great leaved Caledium) अ०—द्वयां कलकास।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

× केम्बुकगुणाः—

केम्बुकं कटुकं पाके तिक्तं ग्राहि हिमं लघु।
दीपनं पाचनं हृद्यं कफपित्तज्वरापहम् ॥११०॥
कुष्ठकासप्रमेहास्रनाशनं वातलं कटु।

† कसेरुकभेदः—

कसेरु द्विविधं तत्तु महद्राजकसेरुकम् ॥१११॥
मुस्ताकृति लघु स्याद्यत्तच्चिचोडमिति स्मृतम्।
कसेरुकद्वयं शीतं मधुरं तुवरं गुरु ॥११२॥
पित्तशोणितदाहघ्नं नयनामयनाशनम्।
ग्राहि शुक्रानिलश्लेष्मरुचिस्तन्यकरं स्मृतम् ।११३।

+ शालूकनामानि गुणाश्च—

पद्मादिकन्दः शालूकः करहाटश्च कथ्यते।
मृणालमूलं भिस्साडं लाजलूकं च कथ्यते ॥११४॥
शालूकं शीतलं वृष्यं पित्तास्रदाहनुद्गुरु।

× सं०—केम्बुक। हि०—केऊँज्या। बं०—केलूप, पेंचा। म०—कोवी। गु०—कोवी। इं०—केबेज (Cabbage)। फा०—कलाम। अ०—कर्द्दकलब।

† सं०—कसेरुक। हि०—कसेरू। बं०—केशुर। म०—कचरा। क०—सेकिनगड्डे। तै०—इट्टिकोति।

+ सं०—शालूक। हि०—भसींड। बं०—पद्मकन्द।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

दुर्जरं स्वादुपाकं च स्तन्यानिलकफप्रदम् ॥११५॥
संग्राहि मधुरं रूक्षं भिस्साडमपि तद्गुणम् ।

वर्जनीयशाकम्—

बालं ह्यनार्त्तवं जीर्णव्याधितं कृमिभक्षितम् ॥११६॥
कन्दं विवर्जयेत्सर्वं यद्वाग्न्यादिविदूषितम् ।
अति जीर्णमकालोत्थं रूक्षसिद्धमदेशजम् ॥११७॥
कर्कशं कोमलं चातिशीतं व्यालादिदूषितम् ।
संशुष्कं सकलं शाकं नाश्नीयान्मूलकं विना ।११८।

❀ संस्वेदजनामानि गुणाश्च—

उक्तं संस्वेदजं शाकं भूमिच्छत्रं शिलीन्द्रजम् ।
क्षितिगोमयकाष्ठेषु वृक्षादिषु च तद्भवेत् ॥११९॥
सर्वे संस्वेदजाः शीता दोषलाः पिच्छिलाश्च ते ।
गुरवश्छर्द्यतीसारज्वरश्लेष्मामयप्रदाः ॥१२०॥
श्वेताः श्वभ्रस्थलीकाष्ठवंशगोव्रजसम्भवाः ।
नातिदोषकरास्ते स्युः शेषास्तेभ्यो विगर्हिताः ।१२१।

इति शाकवर्गः ।

❀ सं०—संस्वेद । हि०—छाता, छत्ता, भुइँफोर । बँ०—छाताकुड । म०—अलम्बी । गु०—फुग्यमींद डानीवली । इं०—मशरूम (Mushroom)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वारिवर्गः ।

❀ जलनामानि गुणाश्च—

पानीयं सलिलं नीरं कीलालं कं जलाम्बु च।
आपो वार्वारिकं तोयं पयः पाथस्तथोदकम् ॥१॥
जीवनं वनमम्भोर्णोऽमृतं घनरसोऽपि च ॥२॥
पानीयं श्रमनाशनं क्लमहरं मूर्च्छापिपासाहरं
तन्द्राच्छर्दिविबन्धहृद्बलकरं निद्राहरं तर्पणम्।
हृद्यं गुप्तरसं ह्यजीर्णशमकं नित्यं हितं शीतलं
लघ्वच्छं रसकारणं निगदितं पीयूषवज्जीवनम् ॥३॥

भेदाः—

पानीयं मुनिभिः प्रोक्तं दिव्यं भौममिति द्विधा ॥४॥
दिव्यं चतुर्विधं प्रोक्तं धाराजं करकाभवम्।
तौषारं च तथा हैमं तेषु धारं गुणाधिकम् ॥५॥

धाराजललक्षणं गुणाश्च—

धाराभिः पतितं तोयं गृहीतं स्फीतवाससा।

❀ सं०-पानीय, सलिल। हि०-जल, पानी। बँ०-जल। म०—उदक, पाणी। क०-मुनीक। तै०—नीरु। इं०—वाटर (Water)। फा०-आब। अ०-माय।

Dr. Umila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

शिलायां वसुधायां वा धौतायां पतितं च तत् ॥६॥
सौवर्णे राजते ताम्रे स्फाटिके काचनिर्मिते ।
भाजने मृण्मये वापि स्थापितं धारमुच्यते ॥७॥
धारानीरं त्रिदोषघ्नमनिर्देश्यकरं लघु ।
सौम्यं रसायनं बल्यं तर्पणं ह्लादि जीवनम् ॥८॥
पाचनं मतिकृन्मूर्छातन्द्रादाहश्रमक्लमान् ।
तृष्णां हरति तत्पथ्यं विशेषात्प्रावृषि स्मृतम् ॥९॥

तद्भेदौ—

धाराजलं च द्विविधं गाङ्गसामुद्रभेदतः ।
आकाशगङ्गासम्बन्धि जलमादाय दिग्गजाः ॥१०॥
मेघैरन्तरिता वृष्टिं कुर्वन्तीति वचः सताम् ।
गङ्गामाश्वयुजे मासि प्रायो वर्षति वारिदः ॥११॥
सर्वथा तज्जलं देयं तथैव चरके वचः ।

गांगजललक्षणं गुणाश्च

स्थापितं हेमजे पात्रे राजते मृन्मयेऽपि वा ॥१२॥
शाल्यन्नं येन संसिक्तं भवेदक्लेदि वर्णवत् ।
तद्गांगं सर्वदोषघ्नं ज्ञेयं सामुद्रमन्यथा ॥१३॥
तत्तु सक्षारलवणं शुक्रदृष्टिबलापहम् ।
विस्रं च दोषलं तीक्ष्णं सर्वकर्मसु गर्हितम् ॥१४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

सामुद्रं त्वाश्विने मासि गुणैर्गाङ्गवदादिशेत् ।

साधारणं जलम्—

अगस्त्यस्य तु देवर्षेरुदयात्सकलं जलम् ॥१५॥
निर्मलं निर्विषं स्वादु शुक्लं स्याददोषलम् ।

अत एवाह—

फूत्कारविषवत्तेन नागानां व्योमचारिणाम् ॥१६॥
वर्षासु सविषं तोयं दिव्यमप्याश्विनं विना ।

❀ अनार्त्तवं जलम्—

अनार्तवं प्रमुञ्चन्ति वारि वारिधरास्तु यत् ॥१७॥
तद्धि दोषाय सर्वेषां देहिनां परिकीर्त्तितम् ।

× करकाजलं गुणाश्च—

दिव्यवाय्यग्निसंयोगात्संहताःखात्पतंतियाः॥१८॥
पाषाणखण्डवच्चापस्ताः कारक्योऽमृतोपमाः ।
करकाजं जलं रूक्षं विशदं गुरु चास्थिरम् ॥१९॥
दारणं शीतलं स्यन्द्रं पित्तहृत्कफवातकृत् ।

तौषारजलम्—

अपि नद्याः समुद्रान्ते वहिरापश्च तद्भवाः ॥२०॥

❀ अनार्तवम् = वर्षाकालादतिरिक्ते समये वर्षाभवं जलम् ।

× करकाजलम् = करकाभिः गालितं जलम् ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

धूमावयवनिर्मुक्तास्तुषाराख्यास्तु ताः स्मृताः।
अपथ्याःप्राणिनां प्रायो भूरुहाणां तु ता हिताः॥२१॥
तुषाराम्बु हितं रूक्षं स्याद्वातलमपित्तलम्।
कफोरुस्तम्भकण्ठाग्निमेदोगण्डादिरोगकृत्॥२२॥

× हैमं जलं गुणाश्च—

हिमवच्छिखरादिभ्यो द्रवीभूयाभिवर्षति।
यत्तदेव हिमं हैमं जलमाहुर्मनीषिणः॥२३॥
हिमाम्बु शीतं पित्तघ्नं गुरु वातविवर्द्धनम्।
हिमं तु शीतलं रूक्षं दारणं सूक्ष्ममित्यपि॥२४॥
न तद्दूषयते वातं न च पित्तं न वा कफम्।

❀ भौमं जलम्—

भौममम्बु निगदितं प्रथमं त्रिविधं बुधैः॥२५॥
जाङ्गलं च तथानूपं ततः साधारणं क्रमात्।
अल्पोदकोऽल्पवृक्षश्च पित्तवातामयान्वितः॥२६॥

जांगलम्—

ज्ञातव्यो जाङ्गलो देशस्तत्रत्यं जाङ्गलं जलम्।
बह्वम्बुर्बहुवृक्षश्च वातश्लेष्मामयान्वितः॥२७॥

× हिमैर्गलितं जलम्। ❀ कूप-तडागादिभिरुत्पन्नम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

आनूपं जलम्—

देशोऽनूप इति ख्यात आनूपं तद्भवं जलम् ।

साधारणम्—

मिश्रचिह्नस्तु यो देशः हि साधारणः स्मृतः ॥२८॥
तस्मिन्देशे यदुदकं तत्तु साधारणं स्मृतम् ।

तत्तज्जलानां गुणाः—

जाङ्गलं सलिलं रूक्षं लवणं लघु पित्तनुत् ॥२९॥
वह्निहृत्कफकृत्पथ्यं विकारान् कुरुते बहून् ।
आनूपं वार्य्यभिष्यन्दि स्वादु स्निग्धं घनं गुरु॥३०॥
वह्निहृत्कफकृन्नित्यं विकारान्हरते बहून् ।
साधारणं तु मधुरं कोपनं शीतलं लघु ॥३१॥
तर्पणं रोचनं तृष्णादाहदोषत्रयप्रणुत् ।

भौमनादेयं जलम्—

नद्या नदस्य वा नीरं नादेयमिति कीर्तितम् ॥३२॥
नादेयमुदकं रूक्षं वातलं लघु दीपनम् ।
अनभिष्यन्दि विशदं कटुकं कफपित्तनुत् ॥३३॥
नद्यः शीघ्रवहा लघ्व्यः सर्वा याश्चामयोदकाः ।
गुर्व्यः शैवलसंछन्ना मन्दगाः कलुषाश्च याः ॥३४॥
हिमवत्प्रभवाः पथ्या नद्योऽमाहतपाथसः ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitized by eGangotri

गङ्गाशतद्रुसरयूयमुनाद्या गुणोत्तमाः ॥३५॥
सह्यशैलभवा नद्यो वेणीगोदावरीमुखाः ।
कुर्वन्ति प्रायशः कुष्ठमीषद्वातकफावहाः ॥३६॥
नदीसरस्तडागस्थे कूपप्रस्रवणादिजे ।
उदके देशभेदेन गुणान्दोषांश्च लक्षयेत् ॥३७॥

औद्भिदं जलं गुणाश्च—

विदार्य भूमिं निम्नां यन्महत्या धारया स्रवत् ।
तत्तोयमौद्भिदं नाम वदन्तीति महर्षयः ॥३८॥
औद्भिदं वारि पित्तघ्नमविदाह्यतिशीतलम् ।
प्रीणनं मधुरं बल्यमीषद्वातकरं लघु ॥३९॥

नैर्झरं जलं गुणाश्च—

शैलसानुस्रवद्वारिप्रवाहो निर्झरो झरः ।
स तु प्रस्रवणश्चापि तत्रत्यं नैर्झरं जलम् ॥४०॥
नैर्झरं रुचिकृन्नीरं कफघ्नं दीपनं लघु ।
मधुरं कटुपाकं च वातलं स्यादपित्तलम् ॥४१॥
नद्याः शैलादिरुद्धायाः तत्र संमुह्य तिष्ठति ।
तत्सरोजदलच्छन्नं तदद्भ्यः सारसं स्मृतम् ॥४२॥

सारसं जलं गुणाश्च—

सारसं सलिलं बल्यं तृष्णाघ्नं मधुरं लघु ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रोचनं तुवरं रुक्षं बद्धमूत्रमलं स्मृतम् ॥४३॥

तडागजलं गुणाश्च—

प्रशस्तभूमिभागस्थो बहुसंवत्सरोषितः।
जलाशयस्तडागःस्यात्ताडागं तज्जलं स्मृतम् ॥४४॥
ताडागमुदकं स्वादु कषायं कटुपाकि च।
वातलं बद्धविण्मूत्रमसृक्पित्तकफापहृत् ॥४५॥

वापीजलं गुणाश्च—

पाषाणैरिष्टकाभिर्वा बद्धः कूपो बृहत्तरः।
ससोपाना भवेद्वापी तज्जलं वाप्यमुच्यते ॥४६॥
वाप्यं वारि यदि क्षारं पित्तकृत्कफवातहृत्।
तदेव मिष्टं कफकृद्वातपित्तहरं भवेत् ॥४७॥

कौपं जलं गुणाश्च—

भूमौ खातोल्पविस्तारो गम्भीरो मण्डलाकृतिः।
बद्धोऽबद्धः स कूपः स्यात्तदम्भः कौपमुच्यते ॥४८॥
कौपं पयो यदि स्वादु त्रिदोषघ्नं हितं लघु।
तत्क्षारं कफवातघ्नं दीपनं पित्तकृत्परम् ॥४९॥

चौण्ड्यं जलं गुणाश्च—

शिलाकीर्णं स्वयं श्वभ्रं नीलाञ्जनसमोदकम्।
लताविवानसंछन्नं चौण्ड्यमित्यभिधीयते ॥५०॥

Shama Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

अश्मादिभिरबद्धं यत्तच्चौण्ड्यमिति वापरे ।
तत्रत्यमुदकं चौण्ड्यं मुनिभिस्तदुदाहृतम् ॥५१॥
चौण्ड्यं वह्निकरं नीरं रूक्षं कफहरं लघु ।
मधुरं पित्तनुद्रुच्यं पाचनं विशदं स्मृतम् ॥५२॥

पाल्वलं जलं गुणाश्च—

अल्पं सरः पल्वलं स्याद्यत्र चन्द्रर्क्षगे रवौ ।
तत्तिष्ठति जलं किञ्चित्तत्रत्यं वारि पाल्वलम्॥५३॥
पाल्वलं वार्य्यभिष्यन्दि गुरु स्वादु त्रिदोषकृत् ।

विकरं जलं गुणाश्च —

नद्यादिनिकटे भूमिर्या भवेद्वालुकामयी ॥५४॥
उद्धाव्यते यत्तोयं तु तज्जलं विकरं विदुः ।
विकरं शीतलं स्वच्छं निर्दोषं लघु च स्मृतम्॥५५॥
तुवरं स्वादु पित्तघ्नं क्षारं तत्पित्तलं मनाक् ।

कैदारं जलं गुणाश्च—

कैदारं क्षेत्रमुद्दिष्टं कैदारं तज्जलं स्मृतम् ॥५६॥
कैदारं वार्य्यभिष्यन्दि मधुरं गुरु दोषकृत् ।

वृष्टिजलम्—

वार्षिकं तदहर्वृष्टं भूमिस्थमहितं जलम् ॥५७॥
त्रिरात्रमुषितं तत्तु प्रसन्नममृतोपमम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

ऋतुपरत्वेन विहितं जलम्—

हेमन्ते सारसं तोयं ताडागं वा हितं स्मृतम् ॥५८॥

हेमन्ते विहितं तोयं शिशिरेऽपि प्रशस्यते ।
वसन्तग्रीष्मयोः कौपं वाप्यं वा नैर्झरं जलम् ॥५९॥

नादेयं वारि नो देयं वसन्तग्रीष्मयोर्बुधैः ।
विषवद्घनवृक्षाणां पत्राद्यैर्दूषितं यतः ॥६०॥

औद्भिदं चान्तरिक्षं वा कौपं वा प्रावृषि स्मृतम् ।
शस्तं शरदि नादेयं नीरमंशूदकं परम् ॥६१॥

दिवा रविकरैर्जुष्टं निशि शीतकरांशुभिः ।
ज्ञेयमंशूदकं नाम स्निग्धं दोषत्रयापहम् ॥६२॥

गुणाः—

अनभिष्यन्दि निर्दोषमान्तरिक्षजलोपमम् ।
बल्यं रसायनं मेध्यं शीतं लघु सुधासमम् ॥६३॥

सुश्रुतमतेन मासपरत्वेन जलगुणाः—

पौषे वारि सरोजातं माघे तत्तु तडागकम् ।
फाल्गुने कूपसंभूतं चैत्रे चौण्ड्यं हितं मतम् ॥६४॥

वैशाखे नैर्झरं नीरं ज्येष्ठे शस्तं तथोद्भिदम् ।
आषाढे शस्यते कौपं श्रावणे दिव्यमेव च ॥६५॥

भाद्रे कौपं पयः शस्तमाश्विने चौण्ड्यमेव च ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain, Digitization by eGangotri

कार्तिके मार्गशीर्षे च जलकालं प्रशस्यते ॥६६॥

जलग्रहणकालमाह—

भौमानामम्भसां प्रायो ग्रहणं प्रातरिष्यते ।
शीतत्वं निर्मलत्वं च यतस्तेषां मता गुणाः ॥६७॥

जलपानगुणान् प्रकाराँश्चाह—

अत्यम्बुपानान्न विपच्यतेऽन्नं
निरम्बुपानाच्च स एव दोषः ।
तस्मान्नरो वह्निविवर्धनाय
मुहुर्मुहुर्वारि पिबेदभूरि ॥६८॥

शीतलजलपानकालः—

मूर्च्छादिपित्तदाहेषु विषे रक्ते मदात्यये ।
श्रमे भ्रमे विदग्धेऽन्ने तमके छर्दिथौ तथा ॥६९॥
ऊर्ध्वगे रक्तपित्ते च शीतमम्बु प्रशस्यते ।

शीतलजलपाननिषिद्धकालः—

पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे ॥७०॥
आध्माने स्तमिते कोष्ठे सद्यः शुद्धौ नवज्वरे ।
अरुचिग्रहणीगुल्मश्वासकासेषु विद्रधौ ॥७१॥
हिक्कायां स्नेहपाने च शीताम्बु परिवर्जयेत् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

अरोचके प्रतिश्याये मन्देऽग्नौ श्वयथौ क्षये ॥७२॥
मुखप्रसेके जठरे कुष्ठे नेत्रामये ज्वरे।
व्रणे च मधुमेहे च पिबेत्पानीयमल्पकम् ॥७३॥

परिहारः—

जीवनं जीविनां जीवो जगत्सर्वं तु तन्मयम्।
अतोऽत्यन्तनिषेधेऽपि न क्वचिद्वारि वार्य्यते ॥७४॥

हारीतमतेन जलावश्यकता—

तृष्णा गरीयसी घोरा सद्यः प्राणविनाशिनी।
तस्माद्देयं तृषार्ताय पानीयं प्राणधारणम् ॥७५॥
तृषितो मोहमायाति मोहात्प्राणान्विमुंचति।
अतः सर्वास्ववस्वस्थासु न क्वचिद्वारि वर्जयेत्॥७६॥

प्रशस्तं जलम्—

अगन्धमव्यक्तरसं सुशीतं तर्षनाशनम्।
स्वच्छं लघु च हृद्यं च तोयं गुणवदुच्यते ॥७७॥

निन्दितजलमाह—

पिच्छिलं कृमिलं क्लिन्नं पर्णशैवालकर्दमैः।
विवर्णं विरसं सान्द्रं दुर्गन्धं न हितं जलम् ॥७८॥
कलुषं छन्नमम्भोजपर्णनीलीतृणादिभिः।
दुःस्पर्शनमसंस्पृष्टं सौरचन्द्रमरीचिभिः ॥७९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

अनार्तवंतं वार्षिकं तु प्रथमं तच्च भूमिगम् ।
व्यासन्नं परिहर्तव्यं सर्वदोषप्रकोपनम् ॥८०॥
तत्कुर्यात्स्नानपानाभ्यां तृष्णाध्मानचिरज्वरान् ।
कासाग्निमांद्याभिष्यन्दकण्डुगण्डादिकं तथा ॥८१॥

परिहारः—

निंदितं चापि पानीयं क्वथितं सूर्यतापितम् ।
सुवर्णं राजतं लोहं पाषाणं सिकतामपि ॥८२॥
भृशं सन्ताप्य निर्वाप्य सप्तधा साधितं तथा ।
कर्पूरजातिपुन्नागपाटलादिसुवासितम् ॥८३॥
शुचि सांद्रपटस्रावि क्षुद्रजन्तुविवर्जितम् ।
स्वच्छं कनकमुक्ताद्यैः शुद्धं स्याद्दोषवर्जितम् ॥८४॥
पर्णमूलविसग्रंथिमुक्ताकनकशैवलैः ।
गोमेदेन च वज्रेण कुर्यादंबुप्रसादनम् ॥८५॥

जलानां जीर्णकालः—

पीतं जलं जीर्यति यामयुग्मात्
यामकमात्राच्छृतशीतलं च ।
तदर्द्धमात्रेण शृतं कदुष्णं
पयःप्रपाके त्रय एव कालाः ॥८६॥

इति वारिवर्गः ।

———

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

दुग्धवर्गः ।

❀ दुग्धनामानि—

दुग्धं क्षीरं पयः स्तन्यं कालजीवनमित्यपि ।

गुणाः—

दुग्धं सुमधुरं स्निग्धं वातपित्तहरं परम् ॥ १ ॥
शद्यः शुक्रकरं पीतं सात्म्यं सर्वशरीरिणाम् ।
जीवनं बृंहणं बल्यं मेध्यं बाजीकरं परम् ॥ २ ॥
वयःस्थापनमायुष्यं संधिकारि रसायनम् ।
विरेकवान्तिबस्तीनां तुल्यमोजोविवर्द्धनम् ॥ ३ ॥

दुग्धपानकालः—

जीर्णज्वरे मनोरोगे शोषमूर्च्छाभ्रमेषु च ।
ग्रहण्यां पाण्डुरोगे च दाहे तृषि हृदामये ॥ ४ ॥
गर्भस्रावे च सततं हितं मुनिवरैः स्मृतम् ।
बालवृद्धक्षतक्षीणक्षुद्व्यवायकृशाश्च ये ॥ ५ ॥
तेभ्यः सदातिशयितं हितमेतदुदाहृतम् ।

❀ सं०—दुग्ध, क्षीर, पय । हि०—दूध । बँ०—दुध । म०—दूध । गु०—दुध । क०—हांफु । तै०—पालु । इं०—मिल्क (Milk) फा०—शीरे । अ०—लुबनुल ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गोदुग्धगुणाः—

गव्यं दुग्धं विशेषेण मधुरं रसपाकयोः ॥ ६ ॥
शीतलं स्तन्यकृत् स्निग्धं वातपित्तास्रनाशनम्।
दोषधातुमलस्रोतः किंचित् क्लेदकरं गुरु ॥७॥
जरासमस्तरोगाणां शान्तिकृत्सेविनां सदा।
कृष्णाया गोर्भवं दुग्धं वातहारि गुणाधिकम् ॥ ८ ॥
पीताया हरते पित्तं तथा वातहरं भवेत्।
श्लेष्मलं गुरु शुक्लाया रक्ताचित्रातिवातहृत् ॥९॥
बालवत्सविवत्सानां गवां दुग्धं त्रिदोषकृत्।
बष्कयिण्यास्त्रिदोषघ्नं तर्पणं बलकृत्पयः ॥१०॥

देशविशेषे चरन्तीनां गवां दुग्धस्य श्रैष्ठ्यम्—

जाङ्गलानूपशैलेषु चरन्तीनां यथोत्तरम्।
पयो गुरुतरं स्नेहं यथाहारं प्रवर्तते ॥११॥

आहारविशेषेण दुग्धगुणाः

स्वल्पान्नभक्षणाज्जातं क्षीरं गुरु कफप्रदम्।
तत्तु बल्यं परं वृष्यं स्वस्थानां गुणदायकम् ॥१२॥
पलालतृणकार्पासबीजजातं गुणाहतम्।

महिषीदुग्धगुणाः—

माहिषं मधुरं गव्यादिस्निग्धं शुक्रकरं गुरु ॥१३॥

Dr. Kumila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

निद्राकरमभिष्यन्दि क्षुधाधिककरं हितम् ।

छागीदुग्धगुणाः—

छागं कषायं मधुरं शीतं ग्राहि तथा लघु ॥१४॥
रक्तपित्तातिसारघ्नं क्षयकासज्वरापहम् ।
अजानामल्पकायत्वात्कटुतिक्तनिषेवणात् ॥१५॥
स्तोकांबुपानाद्व्यायामात्सर्वरोगापहं पयः ।

मृगीदुग्धगुणाः—

मृगीणां जाङ्गलोत्थानामजाक्षीरगुणं पयः ॥१६॥

मेषीदुग्धगुणाः—

आविकं लवणं स्वादु स्निग्धोष्णं चाश्मरिप्रणुत् ।
अहृद्यं तर्पणं वृष्यं शुक्रपित्तकफप्रदम् ॥१७॥
गुरु कासेऽनिलोद्भूते केवले चानिले वरम् ।

अश्वीदुग्धगुणाः—

रूक्षोष्णं वडवाक्षीरं बल्यं शोषानिलापहम् ॥१८॥
अम्लं पटु लघु स्वादु सर्वमेकशफं तथा ।

उष्ट्रीदुग्धगुणाः—

उष्ट्रीदुग्धं लघु स्वादु लवणं दीपनं तथा ॥१९॥
कृमिकुष्ठकफानाहशोथोदरहरं सरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हस्तिनीदुग्धगुणाः—

बृंहणं हस्तिनीदुग्धं मधुरं तुवरं गुरु ॥२०॥
वृष्यं बल्यं हिमं स्निग्धं चक्षुष्यं स्थिरताकरम् ।

नारीदुग्धगुणाः—

नार्य्या लघु पयः शीतं दीपनं वातपित्तजित् ॥२१॥
चक्षुःशूलाभिघातघ्नं नस्याश्चद्योतनयोर्हितम् ।

धारोष्णदुग्धगुणाः—

धारोष्णं गोः पयो बल्यं लघु शीतं सुधासमम् ॥२२॥
दीपनं च त्रिदोषघ्नं तद्धाराशिशिरं त्यजेत् ।
धारोष्णं शस्यते गव्यं धाराशीतं तु माहिषम् ॥२३॥
शृतोष्णमाविकं पथ्यं शृतशीतमजापयः ।
आमं क्षीरमभिष्यन्दि गुरु श्लेष्मामवर्द्धनम् ॥२४॥
ज्ञेयं सर्वपमथ्यं तु गव्यमाहिषवर्जितम् ।
नारीक्षीरं त्वाममेव हितं न तु शृतं हितम् ॥२५॥
* शृतोष्णं कफवातघ्नं शृतशीतं तु पित्तनुत् ।
† अर्द्धोदकं क्षीरशिष्टमामाल्लघुतरं × पयः ॥२६॥

---

* शृतं पक्वं अत उष्णं इति शृतोष्णम् । † अर्धजलमिश्रितं दुग्धम् । × आमात् अपक्वदुग्धात् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

जलेन रहितं दुग्धमतिपक्वं यथा यथा।
तथा तथा गुरु स्निग्धं वृष्यं बलविवर्द्धनम् ॥२७॥

पीयूषदुग्धम्—

क्षीरं तत्कालसूताया घनं पीयूषमुच्यते।

किलाटकम्—

नष्टदुग्धस्य पक्वस्य पिण्डःप्रोक्तःकिलाटकः॥२८॥

क्षीरशाकम्—

अपक्वमेव यन्नष्टं क्षीरशाकं हि तत् पयः।

तक्रपिण्डम्—

दध्ना तक्रेण वा नष्टं दुग्धं बद्धं सुवाससा॥२९॥
द्रवभागेन रहितस्तक्रपिण्डः स उच्यते।

मोरटम्—

नष्टदुग्धभवं नीरं मोरटं जय्यटोऽब्रवीत् ॥३०॥
पीयूषश्च किलाटं च क्षीरशाकं तथैव च।

एतेषां गुणाः—

तक्रपिण्डा इमे वृष्या बृंहणा बलवर्द्धनाः ॥३१॥
गुरवः श्लेष्मला हृद्या वातपित्तविनाशनाः।
दीप्ताग्नीनां विनिद्राणां विद्रधौ चाभिपूजिताः ॥३२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुखशोषतृषादाहरक्तपित्तज्वरप्रणुत् ।
लघुर्बलकरो रुच्यो मोरटः स्यात्सितायुतः ॥३३॥
सन्तानिका गुरुःशीतावृष्या पित्तास्रवातनुत् ।
तर्पणी बृंहणी स्निग्धा बलासबलशुक्रला ॥३४॥
खण्डेन सहितं दुग्धं कफकृत्पवनापहम् ।
सितासितोपलायुक्तं शुक्रलं त्रिमलापहम् ॥३५॥
रात्रौचन्द्रगुणाधिक्याद्व्यायामाकरणात्तथा ।
प्राभातिकं तदा प्रायः प्रदोषाद् गुरु शीतलम् ॥३६॥
दिवाकरकराघाताद्व्यामानिलसेवनात् ।
प्राभातिकं तु प्रादोषं लघुवातकफापहम् ॥३७॥

समयपरत्वेन दुग्धपानगुणाः—

वृष्यं बृंहणमग्निदीपनकरं पूर्वाह्णपीतं पयो
मध्याह्ने बलदायकं कफहरंपित्तापहं दीपनम् ।
बाल्ये वह्निकरं ततो बलकरं वृद्धेषु रेतोवहं*
रात्रौ पथ्यमनेकदोषशमनं क्षीरं सदा सेव्यते ॥३८॥

विशेषः—

वदन्ति पेयं निशि केवलं पयो
भोज्यं न तेनेह सहौदनादिकम् ।

---

*. रेतोवहं—शुक्रवर्द्धनम्।

Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

भवेदजीर्णं यदि न स्वपेन्निशि
क्षीरस्य पीतस्य न शेषमुत्सृजेत् ॥३९॥

दुग्धपानसमयनिर्देशः—

विदाहीन्यन्नपानानि दिवा भुंक्ते हि यन्नरः।
तद्विदाहप्रशान्त्यर्थं रात्रौ क्षीरं सदा पिबेत् ॥४०॥

स्वभावपरत्वेन दुग्धपानविधिः—

दीप्तानले कृशे पुंसि बाले वृद्धे पयःप्रिये।
मतं हिततमं दुग्धं दद्यः शुक्रकरं यतः ॥४१॥
क्षीरं गव्यमथाजं वा कोष्णं दण्डाहतं पिबेत्।
लघु वृष्यं ज्वरहरं वातपित्तकफापहम् ॥४२॥
गोदुग्धप्रभवं किं वा छागीदुग्धसमुद्भवम्।
भवेदेतत्त्रिदोषघ्नं रोचनं बलवर्द्धनम् ॥५३॥
वह्निवृद्धिकरं वृष्यं सद्यस्तृप्तिकरं लघु।
अतीसारेऽग्निमान्द्ये च ज्वरेऽजीर्णे प्रशस्यते ॥४४॥

निन्दितं दुग्धम्—

विवर्णं विरसं चाम्लं दुर्गन्धं प्रमितं पयः।
वर्जयेदम्ललवणयुक्तं बुद्ध्यादिहृद्यतः ॥४५॥

इति दुग्धवर्गः।

———

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

दधिवर्गः ।

❀ दधिगुणाः—

दध्युष्णं दीपनं स्निग्धं कषायानुरसं गुरु ।
पाकेऽम्लं श्वासपित्तास्रशोथमेदःकफप्रदम् ॥ १ ॥
मूत्रकृच्छ्रे प्रतिश्याये शीतगे विषमज्वरे ।
अतीसारेऽरुचौ कार्श्ये शस्यते बलशुक्रकृत् ॥ २ ॥

दधिभेदाः—

आदौ मन्दं ततः स्वादु स्वाद्वम्लं च ततःपरम् ।
अम्लं चतुर्थमत्यम्लं पञ्चमं दधि पञ्चधा ॥ ३ ॥

एषां गुणाः—

मन्दं दुग्धवदव्यक्तरसं किंचिद्घनं भवेत् ।
मन्दं स्यात्सृष्टविण्मूत्रदोषत्रयविदाहकृत् ॥ ४ ॥
यत्सम्यग्घनतां यातं व्यक्तस्वादुरसं भवेत् ।

अव्यक्ताम्लदधिगुणाः—

अव्यक्ताम्लरसं तत्तु स्वादु विज्ञैरुदाहृतम् ॥ ५ ॥

❀ सं०—दधि । हि०—दही । बं०—दई । म०—दही । गु०—दहि । क०—मसरू । ते०—पेरुग । इं०—कर्डल्ड मिल्क (Curdled Milk) फा०—दोग । अ०—जुगरात ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वादु स्यादत्यभिष्यंदि वृष्यं मेदःकफापहम् ।
वातघ्नं मधुरं पाके रक्तपित्तप्रसादनम् ॥ ६ ॥

स्वाद्वम्लदधिगुणाः—

स्वाद्वम्लं मधुरं सान्द्रं कषायानुरसं भवेत् ।
स्वाद्वम्लस्य गुणा ज्ञेयाः सामान्यदधिवज्जनैः॥७॥

अम्लदधिगुणाः—

यत्तिरोहितमाधुर्यं व्यक्ताम्लत्वं तदम्लकम् ।
अम्लं तु दीपनं पित्तरक्तश्लेष्मविवर्द्धनम् ॥ ८ ॥

अत्यम्लदधिगुणाः—

तदत्यम्लं दंतरोमहर्षकण्ठादिदाहकृत् ।
अत्यम्लं दीपनं रक्तवातपित्तकरं परम् ॥ ९ ॥

गोदधिगुणाः—

गव्यं दधि विशेषेण स्वाद्वम्लं च रुचिप्रदम् ।
पवित्रं दीपनं हृद्यं पुष्टिकृत्पवनापहम् ॥१०॥
उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम् ।

माहिषदधिगुणाः—

माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तनुत्॥११॥
स्वादु पाकमभिष्यंदि वृष्यं गुर्वम्लदूषकम् ।

CC-0. Dr. Kamla Sharma Collection, Varanasi

2020. In Public Domain. Digitization by eGangotri

अजादधिगुणाः—

आजं दध्युष्णकं ग्राहि लघु दोषत्रयापहम् ॥१२॥

पक्वदुग्धभवदधिगुणाः—

शस्यते श्वासकासार्शःक्षयकार्श्येषु दीपनम् ।
पक्वदुग्धभवं रुच्यं दधि स्निग्धगुणोत्तमम् ॥१३॥

असारदधिगुणाः—

पित्तानिलापहं सर्वधात्वग्निबलवर्द्धनम् ।
असारं दधि संग्राहि शीतलं वातलं लघु ॥१४॥

गालितदधिगुणाः—

विष्टंभि दीपनं रुच्यं ग्रहणीरोगनाशनम् ।
गालितं दधि सुस्निग्धं वातघ्नं कफकृद्गुरु ॥१५॥

सशर्करदधिगुणाः—

बलतुष्टिकरं रुच्यं मधुरं नातिपित्तकृत् ।
सशर्करं दधि श्रेष्ठं तृष्णापित्तास्रजित् परम् ॥१६॥

रात्रौ दधिभक्षणनिषेधः—

सगुडं वातनुत् वृष्यं बृंहणं तर्पणं गुरु ।
न नक्तं दधि भुंजीत न चाप्यघृतशर्करम् ॥१७॥

परिहारः—

नामुद्गसूपं नाक्षौद्रं नोष्णैर्नामलकैर्विना ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

शस्यते दधि नो रात्रौ शस्तं चांबुघृतान्वितम्॥१८॥
रक्तपित्तकफोत्थेषु विकारेषु च नैव तत्।

ऋतुपरत्वेन दधिभक्षणनिषेधः—

हेमन्ते शिशिरे चापि वर्षासु दधि शस्यते ॥१९॥
शरद्ग्रीष्मवसन्तेषु प्रायशस्तद्विगर्हितम्।
ज्वरासृक्पित्तवीसर्पकुष्ठपाण्ड्वामयभ्रमान् ॥२०॥
प्राप्नुयात्कामलां चोग्रां विधिं हित्वा दधिप्रियः।

सरस्य गुणाः—

दध्नस्तूपरि यो भागो घनः स्नेहसमन्वितः ॥२१॥
स लोके सर इत्युक्तो दध्नो मण्डस्तु मस्त्विति।

मस्तुगुणाः—

सरः स्वादुर्गुरुर्वृष्यो वातवह्निप्रणाशनः ॥२२॥
साम्लो बस्तिप्रशमनः पित्तश्लेष्मविवर्द्धनः।
मस्तु* क्लमहरं बल्यं लघुभक्ताभिलाषकृत्॥२३॥
स्रोतोविशोधनं ह्लादि कफतृष्णानिलापहम्।
अवृष्यं प्रीणनं शीघ्रं भिनत्ति मलसञ्चयम् ॥२४॥

इति दधिवर्गः।

---

* लोके 'मक्खन' इति नाम्ना प्रसिद्धम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

तक्रवर्गः ।

❀ तक्रनामानि—

घोलं तु मथितं तक्रमुदश्चिच्छच्छिकापि च ।

भेदः—

ससरं निर्जलं घोलं मथितं त्वसरोदकम् ॥ १ ॥
तक्रं पादजलं प्रोक्तमुदश्चित्त्वर्द्धवारिकम् ।
छच्छिका सारहीना स्यात्त्वच्छा प्रचुरवारिका ॥ २ ॥
घोलं तु शर्करायुक्तं गुणैर्ज्ञेयं रसालवत् ।

गुणाः—

वातपित्तहरं ह्लादि मथितं कफपित्तनुत् ॥ ३ ॥
तक्रं ग्राहि कषायाम्लं स्वादुपाकरसं लघु ।
वीर्योष्णं दीपनं वृष्यं प्रीणनं वातनाशनम् ॥ ४ ॥
ग्रहण्यादिमतां पथ्यं भवेत्संग्राहि लाघवात् ।
किंचित्स्वादुविपाकित्वान्न च पित्तप्रकोपनम् ॥ ५ ॥

❀ सं०—तक्र । हि०—मट्ठा, छाँछ । बँ०—घोल । म०—ताक । गु०—छास । क०—मज्जिगे । तै०—चल्ला । इँ०—बटर मिल्क (Butter Milk) हे (Whay) फा०—मस्त, मठा । अ०—हमीज ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

अम्लोष्णं दीपनं वृष्यं प्रीणनं वातनाशनम् ।
कषायोष्णविकासित्वाद्रौक्ष्याच्चापिकफापहम् ॥६॥

गुणविशेषमाह—

न तक्रसेवीव्यथतेकदाचिन्नतक्रदग्धाःप्रभवंतिरोगाः
यथासुराणाममृतंसुखाय तथा नराणां भुवितक्रमाहुः
अम्लेनवातंमधुरेणपित्तंकफकंषायेणनिहन्तिसद्यः ७
उदश्वित्कफकृद्धल्यमामघ्नं परमं मतम् ॥ ८ ॥
छच्छिका*शीतला लघ्वीपित्तश्रमतृषाहरी।
वातनुत्कफकृत्सा तु दीपनी लवणान्विता ॥ ९ ॥

ऊद्धृतघृतस्तोकोद्धृतघृतानुद्धृततक्रगुणानाह—

समुद्धृतघृतं तक्रं पथ्यं लघु विशेषतः ।
स्तोकोद्धृतघृतं तस्माद्गुरु वृष्यं कफावहम् ॥१०॥
अनुद्धृतघृतं सान्द्रं गुरु पुष्टिकफप्रदम् ।
वातेऽम्लं शस्यते तक्रं शुण्ठीसैन्धवसंयुतम् ॥११॥
पित्ते स्वादु सितायुक्तं सव्योषमधिकं कफे।
हिंगुजीरयुतं घोलं सैन्धवेन च संयुतम् ॥१२॥
भवेदतीववातघ्नमर्शोऽतीसारहृत्परम् ।

---

* छच्छिका लोके 'छाँछ' इति नाम्ना प्रसिद्धा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुरुच्यं पुष्टिदं बल्यं बस्तिशूलविनाशनम् ॥१३॥
मूत्रकृच्छ्रे तु सगुडं पाण्डुरोगे सचित्रकम् ।
तक्रमामं कफं कोष्ठे हन्ति कण्ठे करोति च ॥१४॥
पीनसश्वासकासादौ पक्वमेव प्रयुज्यते ।
शीतकालेऽग्निमान्द्ये च तथा वातामयेषु च ॥१५॥
अरुचौ स्रोतसां रोधे तक्रं स्यादमृतोपमम् ।
तत्तु हन्ति गरच्छर्दिप्रसेकविषमज्वरान् ॥१६॥
पांडुमेदोग्रहण्यर्शोमूत्रग्रहभगन्दरान् ।
मेहं गुल्ममतीसारं शूलप्लीहोदरारुचीः ॥१७॥
श्वित्रकोष्ठगतव्याधीन् कुष्ठशोथतृषाकृमीन् ।

निषेधः—

नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्बले ॥१८॥
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपित्तजे ।
यान्युक्तानि दधीन्यष्टौ तद्गुणं तक्रमादिशेत् ॥१९॥

इति तक्रवर्गः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

नवनीतवर्गः ।

❀ नवनीतनामानि—

नवनीतं हितं गव्यं वृष्यं वर्णबलाग्निकृत् ।
संग्राहि वातपित्तासृक्क्षयार्शोर्दितकासहृत् ॥ १ ॥
तद्धितं बालके वृद्धे विशेषादमृतं शिशोः ।
नवनीतं महिष्यास्तु वातश्लेष्मकरं गुरु ॥ २ ॥
दाहपित्तश्रमहरं मेदःशुक्रविवर्धनम् ।
दुग्धोत्थं नवनीतं तु चक्षुष्यं रक्तपित्तनुत् ॥ ३ ॥
वृष्यं बल्यमतिस्निग्धं मधुरं ग्राहि शीतलम् ।
नवनीतं तु सद्यस्कं स्वादु ग्राहि हिमं लघु ॥ ४ ॥
मेध्यं किंचित्कषायाम्लमीषत्तक्रांशसंक्रमात् ।
सक्षारकटुकाम्लत्वाच्छ्वर्यर्शःकुष्ठकारकम् ॥ ५ ॥
श्लेष्मलं गुरु मेदस्यं नवनीतं चिरन्तनम् ॥ ६ ॥

इति नवनीतवर्गः ।

❀ सं०—नवनीत । हि०—मक्खन, नैनू, नोनी । बँ०—ननी । म०—लोणी । गु०—माखण । क०—वेण्णी । तै०—पेन्ना । इं०—वटर (Butter) फा०—मसका । अ०—जुब्द ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

घृतवर्गः ।

❀ घृतनामानि—

घृतमाज्यं हविः सर्पिः कथ्यते तद्गुणा अथ ।

गुणाः—

घृतं रसायनं स्वादु चक्षुष्यं वह्निदीपनम् ॥ १ ॥
शीतवीर्यं विषालक्ष्मीपापपित्तानिलापहम् ।
अल्पाभिष्यन्दि कान्त्योजस्तेजोलावण्यबुद्धिकृत् ।२।
स्वरस्मृतिकरं मेध्यमायुष्यं बलकृद्गुरु ।
उदावर्तज्वरोन्मादशूलानाहव्रणान् हरेत् ॥ ३ ॥
स्निग्धं कफहरं वृष्यं क्षयि वीसर्परक्तनुत् ।

गव्यघृतगुणाः—

गव्यं घृतं विशेषेण चक्षुष्यं वृष्यमग्निकृत् ॥ ४ ॥
स्वादुपाकरसं शीतं वातपित्तकफापहम् ।

❀ सं०—घृत । हिं०—घी । बँ०—घिउ, घृत । म०—तूप । गु०—घी । तै० नेई । इं०—क्लेरी फाइटेड बटर (Clerry fited Butter) फा०—रोघनजर्द । अ०—समन् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

मेधालावण्यकान्त्योजस्तेजोवृद्धिकरं परम् ॥ ५ ॥
अलक्ष्मीपापरक्षोघ्नं वयसः स्थापनं गुरु ।
बल्यं पवित्रमायुष्यं सुमंगल्यं रसायनम् ॥ ६ ॥
सुगन्धं रोचकं चारु सर्वाज्येषु गुणाधिकम् ।

माहिषघृतगुणाः—

माहिषं तु घृतं स्वादु पित्तरक्तानिलापहम् ॥ ७ ॥
शीतलं श्लेष्मलं वृष्यं गुरु स्वादु विपच्यते ।

अजाघृतगुणाः—

आजमाज्यं करोत्यग्निं चक्षुष्यं बलवर्धनम् ॥ ८ ॥
कासे श्वासे क्षये चापि हितं पाके भवेत्कटु ।

उष्ट्रघृतगुणाः—

औष्ट्रं कटु घृतं पाके शोषक्रिमिविषापहम् ॥ ९ ॥
दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम् ।

अविघृतगुणाः—

पाके लघ्वाविकं सर्पिः सर्वरोगविनाशनम् ॥१०॥
वृद्धिं करोति चास्थीनामश्मरीशर्करापहम् ।
चक्षुष्यमग्निसंधुक्ष्यं वातदोषनिवारणम् ॥११॥
कफेऽनिले योनिदोषे पित्ते रक्ते च तद्धितम् ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

स्त्रीघृतगुणाः—

चक्षुष्यमाज्यं स्त्रीणां वा सर्पिःस्यादमृतोपमम् ॥१२॥

वडवाघृतगुणाः—

पुष्टिं करोति देहाग्नेर्लघुः पाके विषापहम् ।
तर्पणं नेत्ररोगघ्नं दाहनुद्वडवाघृतम् ॥१३॥
घृतं दुग्धभवं ग्राहि शीतलं नेत्ररोगहृत् ।
निहन्ति पित्तदाहास्रमदमूर्च्छाभ्रमानिलान् ॥१४॥

हैयङ्गवीनगुणाः—

हविर्ह्यस्तनदुग्धोत्थं तत्स्याद्धैयङ्गवीनकम् ।
हैयङ्गवीनं चक्षुष्यं दीपनं रुचिकृत्परम् ॥१५॥
बलकृद्बृंहणं वृष्यं विशेषाज्ज्वरनाशनम् ।

पुराणघृतगुणाः—

वर्षादूर्ध्वं भवेदाज्यं पुराणं तत्त्रिदोषनुत् ॥१६॥
मूर्च्छाकुष्ठविषोन्मादापस्मारतिमिरापहम् ।
यथा यथाखिलं सर्पिः पुराणमधिकं भवेत् ॥१७॥
तथा तथा गुणैः सर्वैरधिकं तदुदाहृतम् ।

घृतप्रयोगविधिः—

योजयेन्नवमेवाज्यं भोजने तर्पणे श्रमे ॥१८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

बलक्षये पाण्डुरोगे कामलानेत्ररोगयोः ।
राजयक्ष्मणि बाले च वृद्धे श्लेष्मकृते गदे ॥१९॥

निषेधः—

रोगे सामे विषूच्यां च विबन्धे च मदात्यये ।
ज्वरे च दहने मन्दे न सर्पिर्बहु मन्यते ॥२०॥

इति घृतवर्गः ।

मूत्रवर्गः ।

❀ गोमूत्रगुणाः—

गोमूत्रं कटु तीक्ष्णोष्णं क्षारं तिक्तकफापहम् ।
लघ्वग्निदीपनं मेध्यं पित्तकृत्कफवातहृत् ॥ १ ॥
शूलगुल्मोदरानाहकण्ड्वक्षिमुखरोगजित् ।
किलासगदवातामवस्तिरुक्कुष्ठनाशनम् ॥ २ ॥
कासश्वासापहं शोथकामलापाण्डुरोगहृत् ॥ ३ ॥

❀ सं०—मूत्र, स्रवण, मेहन । हि०—मूत, पेशाब । बं०—मुत । म०—मूत, मूत्र । गु०—मुतर । क०—मूत्र, आकलसोत । तै०—उचा । इं०—युरिन (Urin) ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

कण्डूकिलासगुदशूलमुखाक्षिरोगान्
गुल्मातिसारमरुदामयमूत्ररोधान् ।
कासं सकुष्ठजठरक्रिमिपाण्डुरोगान्
गोमूत्रमेकमपि पीतमपाकरोति ॥ ४ ॥
सर्वेष्वपि च मूत्रेषु गोमूत्रं गुणतोऽधिकम् ॥ ५ ॥
अतो विशेषात्कथितं मूत्रं गोमूत्रमुच्यते ।
प्लीहोदरश्वासकासशोथवर्चोग्रहापहम् ॥ ६ ॥
शूलगुल्मरुजानाहकामलापाण्डुरोगहृत् ।
कषायं तिक्ततीक्ष्णं च पूरणात्कर्णशूलनुत् ॥ ७ ॥

नरमूत्रगुणाः—

नरमूत्रं गरं हन्ति सेवितं तद्रसायनम् ।
रक्तपामाहरं तीक्ष्णं सक्षारं लवणं स्मृतम् ॥ ८ ॥

गोऽजाविकादीनां मूत्रगुणाः—

गोजाविमहिषीणां तु स्त्रीणां मूत्रं प्रशस्यते ।
खरोष्ट्रेभनराश्वानां पुंसां मूत्रं हितं स्मृतम् ॥ ९ ॥

इति मूत्रवर्गः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तैलवर्गः ।

❀ तैलोत्पत्तिः —

तिलादिस्निग्धवस्तूनां स्नेहस्तैलमुदाहृतम् ।

गुणाः—

तत्तु वातहरं सर्वं विशेषात्तिलसम्भवम् ॥ १ ॥
तिलतैलं गुरु स्थैर्य्यबलवर्णकरं सरम् ।
वृष्यं विकासि विशदं मधुरं रसपाकयोः ॥ २ ॥
सूक्ष्मं कषायानुरसं तिक्तं वातकफापहम् ।
वीर्य्येणोष्णं हिमं स्पर्शे बृंहणं रक्तपित्तकृत् ॥ ३ ॥
लेखनं बद्धविण्मूत्रं गर्भाशयविशोधनम् ।
दीपनं बुद्धिदं मेध्यं व्यवायि व्रणमेहनुत् ॥ ४ ॥
श्रोत्रयोनिशिरःशूलनाशनं लघुताकरम् ।
त्वच्यं केश्यं च चक्षुष्यमभ्यङ्गे भोजनेऽन्यथा ॥ ५ ॥

अस्य प्रयोगविधिः—

छिन्नभिन्नच्युतोत्पिष्टमथितक्षतपिच्चिते ।

❀ सं०—तैल । हि०—तेल । बँ०—तैल, तेल । म०—गु०—तेल । क०—तैलम् । ते०—नुने । इँ०—आयल (Oil) । फा०—रोगन । अ०—दोहनु सिमसिग ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

भग्नस्फुटितविद्धाग्निदग्धविश्लिष्टदारिते ॥ ६ ॥
तथाभिहतनिर्भुग्नमृगव्याघ्रादिविक्षते ।
वस्तौ पानेऽन्नसंस्कारे नस्ये कर्णाक्षिपूरणे ॥ ७ ॥

तिलतैलगुणाः—

सेकाभ्यङ्गावगाहेषु तिलतैलं प्रशस्यते ।
घृतमब्दात्परं पक्वं हीनवीर्य्यं प्रजायते ॥ ८ ॥
तैलं पक्वमपक्वं वा चिरस्थायी गुणाधिकम् ।

सर्षपतैलगुणाः—

दीपनं सार्षपं तैलं कटुपाकरसं लघु ॥ ९ ॥
लेखनं स्पर्शवीर्य्योष्णं तीक्ष्णं पित्तास्रदूषकम् ।
कफमेदोनिलार्शोघ्नं शिरःकर्णामयापहम् ॥१०॥
कंडूकुष्ठकृमिश्वित्रकोठदुष्टक्रिमिप्रणुत् ।

राजिकातैलगुणाः—

तद्वद्राजिकयोस्तैलं विशेषान्मूत्रकृच्छ्रकृत् ॥११॥

तुवरीतैलगुणाः—

तीक्ष्णोष्णं तुवरीतैलं लघु ग्राहि कफास्रजित् ।
वह्निकृद्विषहृत्कंडूकुष्ठकोठक्रिमिप्रणुत् ॥१२॥
मेदोदोषापहं चापि व्रणशोथहरं परम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

अतसीतैलगुणाः—

अतसीतैलमाग्नेयं स्निग्धोष्णं कफपित्तकृत् ॥१३॥
कटुपाकमचक्षुष्यं बल्यं वातहरं गुरु ।
मलकृद्रसतः स्वादु ग्राहि त्वग्दोषहृद्धनम् ॥१४॥
बस्तौ पाने तथाभ्यङ्गे नस्ये कर्णस्य पूरणे ।
अनुपानविधौ चापि प्रयोज्यं वातशान्तये ॥१५॥

कुसुम्भतैलगुणाः—

कुसुम्भतैलमम्लं स्यादुष्णं गुरु विदाहि च ।
चक्षुर्भ्यामहितं वृष्यं रक्तपित्तकफप्रदम् ॥१६॥

खसतैलगुणाः—

तैलं तु खसबीजानां बल्यं वृष्यं गुरु स्मृतम् ।
वातहृत्कफहृच्छीतं स्वादुपाकरसं च तत् ॥१७॥

एरण्डतैलगुणाः—

एरण्डतैलं तीक्ष्णोष्णं दीपनं पिच्छिलं गुरु ।
वृष्यं त्वच्यं वयःस्थायि मेदःकान्तिबलप्रदम् ॥१८॥
कषायानुरसं सूक्ष्मं योनिशुक्रविशोधनम् ।
विस्रं स्वादु रसे पाके सतिक्तं कटुकं सरम् ॥१९॥
विषमज्वरहृद्रोगपृष्ठगुह्यादिशूलनुत् ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

हन्ति वातोदरानाहगुल्माष्ठीलाकटिग्रहान् ॥२०॥
वातशोणितविड्बन्धब्रध्नशोथामविद्रधीन् ।
आमवातगजेन्द्रस्य शरीरवनचारिणः ॥२१॥
एक एव निहन्तायमेरण्डस्नेहकेसरी ।

सर्ज्जरसतैलगुणाः—

तैलं सर्ज्जरसोद्भूतं विस्फोटव्रणनाशनम् ॥२२॥
कुष्ठपामाकृमिहरं वातश्लेष्मामयापहम् ।
तैलं स्वयोनिगुणकृद्वाग्भटेनाखिलं स्मृतम् ।
अतः शेषस्य तैलस्य गुणा ज्ञेयाः स्वयोनिवत् ॥२३॥

इति तैलवर्गः ।

मधुवर्गः ।

❀ मधुनामानि—

मधु माक्षिकमाध्वीकक्षौद्रसारघमीरितम् ।

❀ स०—मधु, माक्षिक, क्षौद्र, सारघ । हि०—मधु, शहद । बँ०—मधु, मौ । म०—मध । गु०—मध । क०—जेनतुप्य । तै०—तेनी । इं०—हनी (Honey) फा०—शहद, आगबीन । अ०—असलुल, नहल ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

जातिः—

मक्षिकावरटीभृङ्गवान्तं पुष्परसोद्भवम् ॥ १ ॥

गुणाः—

लघु शीतं लघु स्वादु रूक्षं ग्राहि विलेखनम् ।
चक्षुष्यं दीपनं स्वर्य्यं व्रणशोधनरोपणम् ॥ २ ॥
सौकुमार्य्यकरं सूक्ष्मं परं स्रोतोविशोधनम् ।
कषायानुरसं ह्लादि प्रसादजनकं परम् ॥ ३ ॥
वर्ण्यं मेधाकरं वृष्यं विशदं रोचनं हरेत् ।
कुष्ठार्शःकासपित्तास्रकफमेहक्लमक्रिमीन् ॥ ४ ॥
मेदस्तृष्णावमिश्वासहिक्कातीसारविड्ग्रहान् ।
दाहक्षतक्षयास्रं तु योगवाह्यल्पवातजम् ॥ ५ ॥

जातयः—

माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं छात्रमित्यपि ।
आर्घ्यमौद्दालकन्दालमित्यष्टौ मधुजातयः ॥ ६ ॥

पिंगवर्णमाक्षिकमधुगुणाः—

माक्षिकाः पिङ्गवर्णास्तु महत्यो मधुमक्षिकाः ।
ताभिः कृतं तैलवर्णं माक्षिकं परिकीर्तितम् ॥ ७ ॥
माक्षिकं मधषु श्रेष्ठं नेत्रामयहरं लघु ।
कामलार्शःक्षतश्वासकासक्षयविनाशनम् ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

किंचित्सूक्ष्मः प्रसिद्धेभ्यः पटपदेभ्योऽलिमिश्रितम् ।

भ्रामरं मधु—

निर्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम् ॥ ९ ॥

गुणाः—

भ्रामरं रक्तपित्तघ्नं मूत्रजाड्यकरं गुरु ।
स्वादुपाकमभिष्यन्दि विशेषात्पित्तलं हिमम् ॥१०॥

कपिलमक्षिकामधुगुणाः—

मक्षिकाः कपिलाः सूक्ष्माः क्षुद्राख्यास्तत्कृतं मधु ।
मुनिभिः क्षौद्रमित्युक्तं तद्वर्णात्कपिलं भवेत् ॥११॥
गुणैर्माक्षिकवत् क्षौद्रं विशेषान्मेहनाशनम् ॥१२॥

पौत्तिकं मधु गुणाश्च—

कृष्णा या मशकोपमा लघुतरा प्रायो महापिण्डका
बध्नानास्तरुकोटरान्तरगताः पुष्पासवं कुर्वते ।
तास्तज्ज्ञैरिह पुत्तिका निगदितास्ताभिः कृतं सर्पिषा
तुल्यं यन्मधु तद्वनेचरजनैः संकीर्तितं पौत्तिकम् ।
पौत्तिकं मधु रूक्षोष्णं पित्तदाहास्रवातकृत् ॥१३॥
विदाहि मेहहृच्छस्तं ग्रंथ्यादिक्षतशोथिषु ॥१४॥

छात्रं मधु गुणाश्च

वरटाः कपिलाः पीताः प्रायो हिमवतो वने ॥१५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

कुर्वंति छत्रकाकारं तज्जं छात्रं मधु स्मृतम् ।
छत्रं कपिलपीतं स्यात् पिच्छिलं शीतलं गुरु ॥१६॥
स्वादुपाकं कृमिश्वित्ररक्तपित्तप्रमेहजित् ।
भ्रमतृण्मोहविषहृत्तर्पणं च गुणाधिकम् ॥१७॥

श्वेतकं मधु—

मधूकवृक्षान्निर्यासं जरत्कार्वाश्रमोद्भवाः ।
स्रवन्त्यार्घं तदाख्यातं श्वेतकं मालवे पुनः ॥१८॥

आर्घ्यं मधु गुणाश्च—

तीक्ष्णतुण्डास्तु याः पीता मक्षिकाः षट्पदोपमाः ।
अर्घास्तास्तत्कृतं यत्तु तदार्घ्यमितरे जगुः ॥१९॥
आर्घ्यं मध्वतिचक्षुष्यं कफपित्तहरं परम् ।
कषायं कटुकं पाके तिक्तं च बलपुष्टिकृत् ॥२०॥

औद्दालकं मधु गुणाश्च—

प्रायो वल्मीकमध्यस्थाः कपिलाः स्वल्पकीटकाः ।
कुर्वन्ति कपिलं स्वल्पं तत्स्यादौद्दालकं मधु ॥२१॥
औद्दालकं रुचिकरं स्वर्ग्यं कुष्ठविषापहम् ।
कषायमुष्णमम्लं च कटुपाकं च पित्तकृत् ॥२२॥

दालं मधु गुणाश्च—

संस्रुत्य पतितं पुष्पाद्यत्तु पत्रोपरि स्थितम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

मधुराम्लकषायं च तद्दालं मधु कीर्तितम् ॥२३॥
दालं मधु लघु प्रोक्तं दीपनीयं कफापहम् ।
कषायानुरसं रूक्षं रुच्यं प्रच्छर्दि मेहजित् ॥२४॥
अधिकं मधुरं स्निग्धं बृंहणं गुरु भारिकम् ।
नवं मधु भवेत्पुष्ट्यै नातिश्लेष्महरं सरम् ॥२५॥

पुराणमधुगुणाः—

पुराणं ग्राहकं रूक्षं मेदोघ्नमतिलेखनम् ।
मधुनः शर्करायाश्च गुडस्यापि विशेषतः ॥२६॥
एकसंवत्सरेऽतीते पुराणत्वं स्मृतं बुधैः ।
विषपुष्पादपि रसं सविषा भ्रमरादयः ॥२७॥
गृहीत्वा मधु कुर्वन्ति तच्छीते गुणवन्मधु ।
विषान्वयात्तदुष्णं तु द्रव्येणोष्णेन वा सह ॥२८॥
उष्णतास्योष्णकाले च स्मृतं विषसमं मधु ।

मधूच्छिष्टम्—

मदनं* तु मधूच्छिष्टं मधुशेषं च सिक्थकम् ॥२९॥

---

* सं०—मदन, सिक्थक । हि०—मोम । बं०—मोम । म०—मेण । गु०—मिण । तै०—मोतदर । इं०—एल्लोवेक्स । फा०—मोमेजर्द । अ०—शया ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

मध्वाधारो मदनकं मधूषितमपि स्मृतम्।

मदनकगुणाः—

मदनं तु मृदु स्निग्धं भूतघ्नं व्रणरोपणम्।
भग्नसंधानकृद्वातकुष्ठवीसर्परक्तजित् ॥३०॥

इति मधुवर्गः।

इक्षुवर्गः।

❀ इक्षुनामानि—

इक्षुर्दीर्घच्छदः प्रोक्तस्तथा भूमिरसोऽपि च।
गुडमूलोऽसिपत्रश्च तथा मधुतृणः स्मृतः ॥१॥

गुणाः—

इक्षवो रक्तपित्तघ्ना बल्या वृष्याः कफप्रदाः।
स्वादुपाकरसाः स्निग्धा गुरवो मूत्रला हिमाः ॥२॥

❀ सं०—इक्षु। हि०—ऊँख, ईख, गन्ना, पौंडा। बँ०—आक, कुशिर। म०—ऊँख। गु०—शेरडी। क०—कबु। ते०—चिरकु। इं०—सूगरकेन (Sugar Cane) फा०—नेशकर। अ०- केसबुक शक्कर।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

भेदाः—

पौण्ड्रको भीरुकश्चापि वंशकः शतपोरकः ।
कान्तारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः ॥३॥
नैपाली दीर्घपत्रश्च नीलपोरोऽप्यकोशकृत् ।
इत्येता जातयस्तेषां कथयामि गुणानपि ॥४॥

❀ पौण्ड्रकेक्षुगुणाः—

वातपित्तप्रशमनो मधुरो रसपाकयोः ।
सुशीतो बृंहणो बल्यः पौण्ड्रको❀भीरुकस्तथा ॥५॥
कोशकारो गुरुः शीतो रक्तपित्तक्षयापहः ।

कान्तारेक्षुगुणाः—

कान्तारेक्षुर्गुरुर्वृष्यः श्लेष्मलो बृंहणः सरः ॥६॥

दीर्घपोरगुणाः—

दीर्घपोरः सुकठिनः सक्षारो वंशकः स्मृतः ।

शतपोरगुणाः—

शतपोरो भवेत्किञ्चित्कोशकारगुणान्वितः ॥७॥
विशेषात्किञ्चिदुष्णश्च सक्षारः पवनापहः ।

❀ 'पौंड्र भल्ल' इति कालान्तरे प्रसिद्धः ।

Dr. Umesh Chandra Pandey Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तापसेक्षुगुणाः—

तापसेक्षुर्भवेन्मृद्वी मधुरा श्लेष्मकारिणी ॥८॥

❀ काष्ठेक्षुगुणाः—

एवं गुणैस्तु काष्ठेक्षुः स तु वातप्रकोपनः ॥९॥

भेदाः—

सूचीपत्रो नीलपोरो नैपालो दीर्घपत्रकः ।

गुणाः—

वातलाः कफपित्तघ्नाः सकषाया विदाहिनः ॥१०॥

मनोगुप्तागुणाः—

मनोगुप्ता वातहरी तृष्णामयविनाशिनी ।
सुशीता मधुरातीव रक्तपित्तप्रणाशिनी ॥११॥

बालेक्षुगुणाः—

बाल इक्षुः कफं कुर्यान्मेदोमेहकरश्च सः ।
युवा तु वातहृत्स्वादुरीषत्तीक्ष्णश्च पित्तनुत् ॥१२॥
रक्तपित्तहरो वृद्धः क्षयहृद्बलवीर्यकृत् ।
मूले तु मधुरोऽत्यर्थं मध्येऽपि मधुरः स्मृतः ॥१३॥
अग्रे ग्रंथिषु विज्ञेय इक्षुः पटुरसो जनैः ॥

❀ म०—काष्ठेक्षु । हि०—काठौआ ऊँख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चूषितरसगुणाः—

दन्तनिष्पीडितस्येक्षो रसः पित्तास्रनाशनः ॥१४॥
शर्करः समवीर्य्यः स्यादविदाही कफप्रदः ।
मूलाग्रजं तु ग्रन्थ्यादिपीडनान्मलसंस्करात् ॥१५॥
किंचित्कालविधृत्या च विकृतिं याति यांत्रिकः ।

यांत्रिकरसगुणाः—

तस्माद्विदाही विष्टंभी गुरुः स्याद्यान्त्रिको रसः।१६।

पर्युषितरसावगुणाः—

रसः पर्य्युषितो नेष्टो ह्यम्लो वातापहो गुरुः ।
कफपित्तकरः शोषी मेदनश्चातिमूत्रलः ॥१७॥

पक्वरसगुणाः—

पक्वो रसो गुरुः स्निग्धः सतीक्ष्णःकफवातनुत् ।
गुल्मानाहप्रशमनः किञ्चित्पित्तकरः स्मृतः ॥१८॥

गुडगुणाः—

इक्षोर्विकारास्तृड्दाहमूर्च्छापित्तास्रनाशनाः।
गुरवो मधुरा बल्याः स्निग्धा वातहराः सराः ॥१९॥
वृष्या मोहहराः शीता बृंहणा विषहारिणः ।

Prof. Satya Vrat Shastri Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

फाणितं तद्गुणाश्च—

इक्षो रसस्तु यः पक्वः किञ्चिद्गाढो बहुद्रवः ॥२०॥
स एवेक्षुविकारेषु ख्यातः फाणितसंज्ञया ।
फाणितं गुर्वभिष्यन्दि बृंहणं कफशुक्रकृत् ॥२१॥
वातपित्तश्रमान्हन्ति मूत्रबस्तिविशोधनम् ।

मत्स्यण्डी तद्गुणाश्च—

इक्षौ रसो यः सम्पक्वो घनः किञ्चिद्द्रवान्वितः।२२।
मन्दं यत्स्यन्दते तस्मान्मत्स्यण्डीति निगद्यते ।
मत्स्यण्डी भेदनी बल्या लघ्वी पित्तानिलापहा।२३।
मधुरा बृंहणी वृष्या रक्तदोषावहा स्मृता ।

❀ गुडः तद्गुणाश्च—

इक्षो रसो यः सम्पक्वो जायते लोष्ठवद्दृढम् ॥२४॥
स गुडो गौडदेशे तु मत्स्यण्डयेव गुडो मतः ।
गुडो वृष्यो गुरुः स्निग्धो वातघ्नो मूत्रशोधनः॥२५॥
नातिपित्तहरो मेदःकफक्रिमिबलप्रदः ।

❀ सं०—गुड । हि०—गुड । बँ०—गुड । म०—लागू । गु०—गोल । क०—होसवेल्लंद हेलरु । तै०—वेल्लामु । इं०—ट्रीकल मोसेस (Treacle Moiasses) फा०—केदेसिया । अ०—कंदे अस्वद ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जीर्णगुडगुणाः—

गुडो जीर्णो लघुः पथ्योऽनभिष्यन्द्यग्निपुष्टिकृत् ।२६।
पित्तघ्नो मधुरो वृष्यो वातघ्नोऽसृक्प्रसादनः ।
गुडो नवः कफश्वासकासक्रिमिकरोऽग्निकृत् ॥२७॥

गुडभक्षणोपायमाह—

श्लेष्माणमाशु विनिहन्ति सदार्द्रकेण
पित्तं निहन्ति च तदेव हरीतकीभिः ।
शुण्ठ्या समं हरति वातमशेषमित्थं
दोषत्रयक्षयकराय नमो गुडाय ॥२८॥

† खण्डगुणाः—

खण्डं तु मधुरं वृष्यं चक्षुष्यं बृंहणं हिमम् ।
वातपित्तहरं स्निग्धं बल्यं वान्तिहरं परम् ॥२९॥

❀ सितानामानि गुणाश्च—

खण्डं तु सिकतारूपं सुश्वेता शर्करा सिता ।

---

† सं०—खण्ड। हि०—खांड। बँ०—खांड। म०—साखर। गु०—खांड। क०—मालखंड। तै०—पांचदारा। इं०—शूगर (Sugar) फा०—अ०—शक्कर।

❀ सं०—सिता। हि०—चीनी। बँ०—चिनी। म०—पिठी साखर। गु०—शाकर। क०—गुडगुडातु-गीतु। तै०—कोटिक पांचदारा। इं०—ब्यूराकाइड शूगर

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिता सुमधुरा रुच्या वातपित्तास्रदाहनुत् ॥३०॥
मूर्च्छाछर्दिज्वरान् हन्ति सुशीता शुक्रकारिणी ।

† पुष्पसितागुणाः—

शीता पुष्पसिता वृष्या रक्तपित्तहरी लघुः ॥३१॥

❀ सितोपलागुणाः—

सितोपला सरा लघ्वी वातपित्तहरी हिमा ।
मधुजा शर्करा रूक्षा कफपित्तहरी गुरुः ॥३२॥
छर्द्यतीसारतृड्दाहरक्तहृत्तुवरा हिमा ॥३३॥
यथा यथा स्यान्नैर्मल्यं मधुरत्वं यथा यथा ॥३४॥
स्नेहलाघवशैत्यानि सरत्वं च तथा तथा ।

इति इक्षुवर्गः ।

कैंडी (Purified sugar Candy) फा०—खडी शक्कर, नवात । अ०—शक्करे अवीयद ।

† सं०—पुष्पसिता । हि०—गुलकन्द ।

❀ सं०—सितोपला । हि०—कूजेकी मिश्री ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सन्धानवर्गः ।

❀ काञ्जिकम्—

सन्धितं धान्यमण्डादि काञ्जिकं कथ्यते जनैः ।

गुणाः—

काञ्जिकं भेदि तीक्ष्णोष्णं रोचनं पाचनं लघु ॥ १ ॥
दाहज्वरहरं स्पर्शात्पानाद्वातकफापहम् ।
माषादिवटकैर्युक्तं क्रियते तद्गुणाधिकम् ॥ २ ॥
लघु वातहरं तत्तु रोचनं पाचनं परम् ।
शूलाजीर्णविबन्धामनाशनं वस्तिशोधनम् ॥ ३ ॥

निषेधः—

शोषमूर्च्छाभ्रमार्तानां मदकण्डुविशोषिणाम् ।
कुष्ठिनां रक्तपित्तानां काञ्जिकं न प्रशस्यते ॥ ४ ॥
पाण्डुरोगे यक्ष्मरोगे तथा शोषातुरेषु च ।
क्षतक्षीणे तथा श्रान्ते मन्दज्वरनिपीडिते ॥ ५ ॥
एतेषां त्वहितं प्रोक्तं काञ्जिकं दोषकारकम् ।

तुषोदकगुणाः—

तुषोदकं यवैरामैः सतुषैः शकलीकृतैः ॥ ६ ॥

❀ सं०—कांजिक । हि०—कांजी ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

तुषाम्बु दीपनं हृद्यं पाण्डुक्रिमिगदापहम् ।
तीक्ष्णोष्णं पाचनं पित्तरक्तकृद्धस्तिशूलनुत् ॥ ७ ॥

सौवीरगुणाः—

सौवीरं तु यवैरामैः पक्वैर्यन्निस्तुषैः कृतम् ।
गोधूमैरपि सौवीरमाचार्य्याः केचिदूचिरे ॥ ८ ॥
सौवीरं तु ग्रहण्यर्शःकफघ्नं भेदि दीपनम् ।
उदावर्ताङ्गमर्दास्थिशूलानाहेषु शस्यते ॥ ९ ॥

आरनालगुणाः—

आरनालं तु गोधूमैरामैः स्यान्निस्तुषीकृतैः ।
पक्वैर्वा सन्धितैस्तत्तु सौवीरसदृशं गुणैः ॥१०॥

धान्याम्लगुणाः—

धान्याम्लं शालिचूर्णाच्च कोद्रवादिकृतं भवेत् ।
धान्याम्लं धान्ययोनित्वात्प्रीणनं लघु दीपनम्।११।
अरुचौ वातरोगेषु सर्वेष्वास्थापने हितम् ।

शिण्डाकीलक्षणं गुणाश्च—

शिण्डाकी राजिकायुक्तैः स्यान्मूलकदलद्रवैः ॥१२॥
सर्षपस्वरसैर्वापि शालिपिष्टकसंयुतैः ।
शिण्डाकी रोचनी गुर्वी पित्तश्लेष्मकरी स्मृता॥१३॥

Dr. Urmila Sharma Collection, Varanasi

CC-0. Public Domain. Digitized by eGangotri

शुक्तलक्षणं गुणाश्च—

कन्दमूलफलादीनि सस्नेहलवणानि च।
यत्र द्रवेऽभिषूयन्ते तच्छुक्तमभिधीयते ॥१४॥
शुक्तं कफघ्नं तीक्ष्णोष्णं रोचनं पाचनं लघु।
पाण्डुक्रिमिहरं रूक्षं भेदनं रक्तपित्तकृत् ॥१५॥
कन्दमूलफलाढ्यं यत्तत्तु विज्ञेयमासुतम्।
तद्रुच्यं पाचनं वातहरं लघु विशेषतः ॥१६॥

मद्यनामानि गुणाश्च—

मद्यं तु सीधुर्मैरेयमिरा च मदिरा सुरा।
कादम्बरी वारुणी च हालापि बलवल्लभा ॥१७॥
पेयं यन्मादकं लोके तन्मद्यमभिधीयते।
यथारिष्टं सुरासीधुरासवाद्यमनेकधा ॥१८॥
मद्यं सर्वं भवेदुष्णं पित्तकृद्वातनाशनम्।
भेदनं शीघ्रपाकं च रूक्षं कफहरं परम् ॥१९॥
अम्लं च दीपनं रुच्यं पाचनं चाशुकारि च।
तीक्ष्णं सूक्ष्मं च विशदं व्यवायि च विकाशि च ॥२०॥

❀ अरिष्टं तद्गुणाश्च—

पक्वौषधाम्बुसिद्धं यन्मद्यं तत्स्यादरिष्टकम्।

❀ सं—अरिष्ट, मद्य, मदिरा। बँ०—मदिरा, मद। गु०—दारू। म०—मद्य, दारू। हि०—दारू, शराब। क०—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

अरिष्टं लघुपाकेन सर्वतश्च गुणाधिकम् ॥२१॥
अरिष्टस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः।

सुरागुणाः—

शालिषष्टिकपिष्टाद्यैः कृतं मद्यं सुरा स्मृता ॥२२॥
सुरा गुर्वी बलस्तन्यपुष्टिमेदःकफप्रदा।
ग्राहिणी शोथगुल्मार्शोग्रहणीमूत्रकृच्छ्रनुत् ॥२३॥

वारुणीलक्षणं गुणाश्च—

पुनर्नवाशालिपिष्टविहिता वारुणी स्मृता।
संहितैस्तालखर्जूररसैर्या सापि वारुणी ॥२४॥
सुरावद्वारुणी लघ्वी पीनसाध्मानशूलनुत्।

सीधुलक्षणं गुणाश्च—

इक्षोः पक्वै रसैः सिद्धः सीधुः पक्वरसश्च सः ॥२५॥
आमैस्तैरेव यः सीधुः स च शीतरसः स्मृतः।
सीधुः पक्वरसः श्रेष्ठः स्वराग्निबलवर्णकृत् ॥२६॥
वातपित्तकरः सद्यः स्नेहनो रोचने हरेत्।
विबन्धमेदःसोफार्शःशोषोदरकफामयान् ॥२७॥
तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः।

शरे, साराइ।-तै०—कल्लु। फा०—शराब। इं०—वाइन (Wine)

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitized by eGangotri

आसवः—

यदपक्वौषधांबुभ्यां सिद्धं मद्यं स आसवः ॥२८॥

नवमद्यगुणाः—

मद्यं नवमभिष्यन्दि त्रिदोषजनकं सरम् ।
अहृद्यं बृंहणं दाहि दुर्गन्धं विशदं गुरु ॥२९॥

जीर्णमद्यगुणाः—

जीर्णं तदेव रोचिष्णु कृमिश्लेष्मानिलापहम् ।
हृद्यं सुगंधि गुणवल्लघु स्रोतोविशोधनम् ॥३०॥

सात्त्विकादीनां गुणाः—

सात्त्विके गीतहास्यादि राजसे साहसादिकम् ।
तामसे निन्द्यकर्माणि निद्रां च मदिरी चरेत् ॥३१॥
विधिना । मात्रया काले हितैरन्नैर्यथाबलम् ।
प्रहृष्टो यः पिबेन्मद्यं तस्य स्यादमृतोपमम् ॥३२॥

गन्धनाशप्रकारः

मुस्तैलबालगुडजीरकधान्यकैला
यश्चर्वयन् सदसि वाचमभिव्यनक्ति ।
स्वाभाविकं मुखजमुज्झति पूतिगन्ध--
गन्धं च मद्यलशुनादिभवं च नूनम् ॥३३॥

इति सन्धानवर्गः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

भल्लातकीपरीक्षाप्रकारमाह—

सूक्ष्मास्थिमांसला पथ्या सर्वकर्मणि पूजिता।
क्षिप्ताम्भसि निमज्जेद्या भल्लातक्यस्तथोत्तमाः॥ १॥

वाराहीकन्दः—

वाराहमूर्द्धवत्कन्दो वाराहीकन्दसंज्ञकः।

सौवर्चलपरीक्षा—

सौवर्चलं तु काचाभं सैन्धवं स्फटिकप्रभम्॥ २॥

स्वर्णमाक्षिकम्—

सुवर्णच्छविकं ज्ञेयं स्वर्णमाक्षिकमुत्तमम्।

मनीहा—

इन्द्रगोपप्रतीकाशा मनीहा चोत्तमा मता॥ ३॥

शिलाजतु—

श्रेष्ठं शिलाजतु ज्ञेयं प्रक्षिप्तं न विशीर्य्यते।
तोयपूर्णे कांस्यपात्रे प्रतानेन विवर्द्धते॥ ४॥

कर्पूरादीनां परीक्षा—

कर्पूरस्तुवरः स्निग्ध स्थूला सूक्ष्मफलावरा।
श्वेतचन्दनमत्यन्तं सुगन्धि गुरु पूजितम्॥ ५॥
रक्तचन्दनमत्यन्तं लोहितं प्रवरं मतम्।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

काकतुण्डनिभः स्निग्धो गुरुः श्रेष्ठोऽगुरुर्मतः ॥ ६ ॥
सुगन्धि लघु रूक्षं च सुरदारु वरं मतम् ।
सरलं स्निग्धमत्यर्थं सुगन्धि च गुणावहम् ॥ ७ ॥
अतिपीता प्रशस्ता तु ज्ञेया दारुनिशा बुधैः ।
जातीफलं गुरु स्निग्धं समं शुभ्रान्तरं वरम् ॥ ८ ॥
मृद्वीका सोत्तमा ज्ञेया या स्याद्गोस्तनसन्निभा ।
करमर्दफलाकारा मध्यमा सा प्रकीर्तिता ॥ ९ ॥

खण्डम्—

खण्डं तु विमलं श्रेष्ठं चन्द्रकान्तिसमप्रभम् ।
गव्याज्यसदृशं गन्धं रुच्यं मधु वरं स्मृतम् ॥१०॥

स्वभावतो हितानि द्रव्याणि—

शालीनां लोहिता शाली षष्टिकेषु च षष्टिका ।
शूकधान्येष्वपि यवो गोधूमः प्रवरो मतः ॥११॥
शिम्बिधान्ये वरो मुद्गो मसूरश्चाढकी तथा ।
रसेषु मधुरः श्रेष्ठो लवणेषु च सैन्धवम् ॥१२॥
दाडिमामलकं द्राक्षा खर्जूरं च परूषकम् ।
राजादनं मातुलुंगं फलवर्गे प्रशस्यते ॥१३॥
पत्रशाकेषु वास्तूकं जीवन्ती पोतिका वरा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

पटोलं फलशाकेषु कन्दशाकेषु सूरणम् ॥१४॥
एणः कुरङ्गो हरिणो जाङ्गलेषु प्रशस्यते ।
पक्षिणां तित्तिरो लावो वरो मत्स्येषु रोहितः ॥१५॥
जलेषु दिव्यं दुग्धेषु गन्धमाज्येषु गोभवम् ।
तैलेषु तिलजं तैलमैक्षवेषु सिता हिता ॥१६॥

स्वभावतोऽहितानि द्रव्याणि—

शिम्बीषु माषान् ग्रीष्मर्तौ लवणेष्वौषरं त्यजेत् ।
फलेषु लकुचं शाके सार्षपं न हितं मतम् ॥१७॥
गोमांसं ग्राम्यमांसेषु न हिता महिषीवसा ।
मेषीपयः कुसुम्भस्य तैलं त्याज्यं च फाणितम् ॥१८॥

संयोगविरुद्धानि द्रव्याणि—

मत्स्यमानूपमांसं च दुग्धयुक्तं विवर्जयेत् ।
कपोतं सर्षपस्नेहभर्जितं परिवर्जयेत् ॥१९॥
मत्स्यानीक्षुविकारेण तथा क्षौद्रेण वर्जयेत् ।
सक्तून्मांसपयोयुक्तानुष्णैर्दधि विवर्जयेत् ॥२०॥
उष्णैर्नभोऽम्बुना क्षौद्रं पायसं कृशरान्वितम् ॥२१॥
दशाहमुषितं सर्पिः कांस्ये मधु घृतं समम् ।
कृच्छ्राम्लं च कषायं च पुनरुष्णीकृतं त्यजेत् ॥२२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

एकत्र बहुमांसानि विरुध्यन्ते परस्परम् ।
मधु सर्पिर्वसा तैलं पानीयं वा पयस्तथा ॥२३॥

भेषजसंकेतः—

लवणं सैन्धवं प्रोक्तं चन्दनं रक्तचन्दनम् ।
चूर्णलेहासवस्नेहाः साध्या धवलचन्दने ॥२४॥
कषायलेपयोः प्रायो युज्यते रक्तचन्दनम् ।
अन्तः सम्मार्जने ज्ञेया ह्यजमोदा यवानिका ॥२५॥
बहिः संमार्जने सैव विज्ञातव्याऽजमोदिका ।
पयःसर्पिःप्रयोगेषु गव्यमेव हि गृह्यते ॥२६॥
शकृद्रसो गोमयकं मूत्रं गोमूत्रमुच्यते ।

उक्तद्रव्याणामभावे प्रतिनिधिः—

चित्रकाभावतो दन्ती क्षारः शिखरिजोऽथवा ॥२७॥
अभावे धन्वयासस्य प्रक्षेप्या तु दुरालभा ।
तगरस्याप्यभावे तु कुष्ठं दद्याद् भिषग्वरः ॥२८॥
मूर्वाभावे त्वचो ग्राह्या जिङ्गनीप्रभवा बुधैः ।
अहिस्त्राया अभावे तु मानकन्दः प्रकीर्तितः ॥२९॥
लक्ष्मणाया अभावे तु नीलकण्ठशिखा मता ।
वकुलाभावतो देयं कह्लारोत्पलपंकजम् ॥३०॥
नीलोत्पलस्याभावे तु कुमुदं देयमिष्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

जातीपुष्पं न यत्रास्ति लवङ्गं तत्र दीयते ॥३१॥
अर्कपर्णादि पयसो ह्यभावे तद्रसो मतः।
पौष्करामावतः कुष्ठं तथा लाङ्गल्यभावतः ॥३२॥
स्थौणेयकस्याभावे तु भिषग्भिर्दीयते गदः।
चविकागजपिप्पल्यौ पिप्पलीमूलवत् स्मृतौ ॥३३॥
अभावे सोमराज्यास्तु प्रपुन्नाटफलं मतम्।
यदि न स्याद्दारुनिशा तदा देया निशा बुधैः॥३४॥
रसाञ्जनस्याभावे तु सम्यग् दार्वी प्रयुज्यते।
सौराष्ट्र्यभावतो देया स्फुटिका तद्गुणा जनैः॥३५॥
तालीसपत्रकाभावे स्वर्णताली प्रशस्यते।
भार्ङ्ग्यभावे तु तालीसं कण्टकारीजटाथवा ॥३६॥
रुचकाभावतो दद्यात् लवणं पांसुपूर्वकम्।
अभावे मधुयष्ट्यास्तु धातकीं च प्रयोजयेत् ॥३७॥
अम्लवेतसकाभावे चुक्रं दातव्यमिष्यते।
द्राक्षा यदि न लभ्येत प्रदेयं काश्मरीफलम् ॥३८॥
तयोरभावे कुसुमं बन्धूकस्य मतं बुधैः।
लवङ्गकुसुमं देयं नखस्याभावतः पुनः ॥३९॥
कस्तूर्य्यभावे कक्कोलं क्षेपणीयं विदुर्बुधाः।
कक्कोलस्याप्यभावे तु जातीपुष्पं प्रदीयते ॥४०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

सुगन्धिमुस्तकं देयं कर्पूराभावतो बुधैः ।
कर्पूराभावतो देयं ग्रन्थिपर्णं विशेषतः ॥४१॥
कुंकुमाभावतो दद्यात्कुसुंभकुसुमं नवम् ।
श्रीखंडचन्दनाभावे कर्पूरं देयमिष्यते ॥४२॥
अभावे त्वेतयोर्वैद्यः प्रक्षिपेद्रक्तचन्दनम् ।
रक्तचन्दनकाभावे नवोशीरं विदुर्बुधाः ॥४३॥
मुस्ता चातिविषाभावे शिवाभावे शिवा मता ।
अभावे नागपुष्पस्य पद्मकेसरमिष्यते ॥४४॥
मेदाजीवककाकोलीऋद्धिद्वंद्वेऽपि चामति ।
वरीविदार्य्यश्वगन्धावाराहीश्च क्रमात् क्षिपेत्॥४५॥
वाराह्याश्च तथाभावे चर्मकारालुको मतः ।
वाराहीकन्दसंज्ञस्तु पश्चिमे गृष्टिसंज्ञकः ॥४६॥
वाराहीकंद एवान्यश्चर्मकारालुको मतः ।
अनूपे स भवेद्देशे वाराह इव लोमवान् ॥४७॥
भल्लातकासहत्वे तु रक्तचंदनमिष्यते ।
भल्लाताभावतश्चित्रं नलश्चेक्षोरभावतः ॥४८॥
सुवर्णाभावतः स्वर्णमाक्षिकं प्रक्षिपेद्बुधः ।
वेतं तु माक्षिकं ज्ञेयं बुधै रजतवद्ध्रुवम् ॥४९॥
माक्षिकस्याप्यभावे तु प्रदद्यात् स्वर्णगैरिकम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

सुवर्णमथवा रौप्यं मृतं यत्र न लभ्यते ॥५०॥
तत्र कान्तेन कर्माणि भिषक्कुर्याद्विचक्षणः ।
कान्ताभावे तीक्ष्णलोहं योजयेद्वैद्यसत्तमः ॥५१॥
अभावे मौक्तिकस्यापि मुक्ताशुक्तिं प्रयोजयेत् ।
मधु यत्र न लभ्येत तत्र जीर्णगुडो मतः ॥५२॥
मत्स्यण्ड्यभावतो दद्युर्भिषजः शितशर्कराम् ।
असंभवे सितायास्तु बुधः खण्डं प्रयोजयेत् ॥५३॥
क्षीराभावे रसो मौद्गो मासूरो वा प्रदीयते ।
अत्र प्रोक्तानि वस्तूनि यानि तेषु च तेषु च ॥५४॥
योज्यमेकतराभावे परं वैद्येन जानता ।
रसवीर्य्यविपाकाद्यैः समं द्रव्यं विचिंत्य च ॥५५॥
युंज्याद्विविधमन्यद्वा द्रव्याणां तु रसादिवित् ।
योगे यदप्रधानं स्यात्तस्य प्रतिनिधिर्मतः ॥
यत्तु प्रधानं तस्यापि सदृशं नैव गृह्यते ॥५६॥

इति द्रव्यपरीक्षादिवर्गः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

अनेकार्थवर्गः ।

द्व्यर्थानि—

अश्मंतकः—अम्लोणिका । कोविदारश्च ॥ कुलकः—पटोलः । कुपीलुश्च ॥ कोशातकी—महा कोशातकी । राजकोशातकी च ॥ चुक्रिका—अम्लिका । चांगेरी च ॥ तिंतिडीकम्—वृक्षाम्लाम्लिका च । दीप्यका—यवान्यजमोदा च ॥ फणिज्जकः—पिंडीतकश्च ॥ रुचकम्—सौवर्चलम् । बीजपूरकं च ॥ लोणिका—लोणीशाकं चांगेरीशाकं च ॥ वाह्लीकम्—कुंकुमम् । हिंगु च । स्वादुकण्टकः—गोक्षुरो विकंकतश्च ॥ अग्निमुखी—मल्लातकी लांगली च ॥ अग्निशिखम्—कुंकुमम् । कुसुंभश्च ॥ अजशृङ्गी—मेषशृङ्गी कर्कटशृङ्गी च ॥ प्रियङ्गुः—फलिनी । कंगुश्च ॥ भृंगः—भृंगराजस्त्वक् च । समंगा—मंजिष्ठा । लज्जालुश्च ॥ अमोघा—विडंगम् । पाटला च ॥ मोचा—कदली । शाल्मलिश्च ॥ कुटन्नटः—स्योनाकः । कैवर्ती मुस्तं च ॥ कुनटी—धनिका । मनःशिला च ॥ घोंटा—पूगः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

वदरी च । त्रिपुटा–त्रिवृत् । सूक्ष्मैला च ॥ शटी–कर्चूरः । गंधपलाशो च ॥ दंतशठः–जंबीरः । कपित्थश्च ॥ दंतशठा–अम्लिका । चांगेरी च ॥ अरुणा–मंजिष्ठा अतिविषा च ॥ कणा–पिप्पली । जीरकं च ॥ तालपर्णी–मुसली । मुरा च ॥ पीलुपर्णी–मूर्वा । बिंबी च ॥ ब्राह्मी—ब्राह्मणी । भार्ङ्गी । स्पृक्का च ॥ अपराजिता–विष्णुक्रांता । शालपर्णी च ॥ आस्फोता–अपराजिता । शारिवा च ॥ पारावतपदी—ज्योतिष्मती काकजंघा च ॥ शारदी – शारिवा । जलपिप्पली च ॥ उग्रगंधः–वचा । यवानी च ॥ परिव्याधः—कर्णिकारः । जलवेतसश्च । अञ्जनम्—स्रोतोञ्जनम् । सौवीर च ॥ अग्निः—चित्रकः । भल्लातकश्च ॥ क्रिमिघ्नः–विडंगः । हरिद्रा च ॥ तेजनः—शरः । वेणुश्च ॥ तेजनी—तेजोवती मूर्वा च ॥ रोचना—गोरोचना । रक्तोत्पलं च ॥ राजादनम्—क्षीरिका । प्रियालश्च ॥ शकुलादनी–कटुका । जलपिप्पली

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

च ॥ गोलोमी—श्वेतदूर्वा । वचा च ॥ पद्मा—पद्मचारिणी । भार्ङ्गी च ॥ श्यामा-सारिवा । प्रियंगुश्च ॥ उत्तमा-त्रिफला । सर्वतोभद्रा च ॥ धान्यं धान्याकं । शाल्यादि च ॥ सहस्रवीर्या—नीलदूर्वा । महाशतावरी च । सेव्यम्—उशीरम् । लामज्जकं च ॥ उदुंबरः—जंतुफलः । ताम्रं च ॥ ऐन्द्री—इन्द्रवारुणी । इन्द्राणी च ॥ कटंभरा—कटुका । स्योनाकं च ॥ क्षारः—यवक्षारः । स्वर्णिका च ॥ गांधारी—दुरालभा । गंधपलाशी च ॥ चित्रा—इन्द्रवारुणी । बृहद्दंती च ॥ तुण्डिकेरी—कार्पासी । बिंबी च ॥ धारा—गुडूची । क्षीरकाकोली च ॥ बालपत्रा—खदिरः । यवासश्च ॥ वारि—बालकम् । उदकं च ॥ अङ्गारवल्ली—भार्ङ्गी । गुंजा च ॥ अमृणालम्—उशीरम् । लामज्जकं च ॥ कुण्डली—गुडूची । कोविदारश्च ॥ गंधफली—प्रियंगुः । चंपककलिका च ॥ पुष्पफलः—कपित्थः । कूष्मांडश्च ॥ पोटगलः—नलः । कासश्च ॥ यव-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

फलः कुटजो वंशश्च ॥ विश्वा-शुंठ्यतिविषा च ॥ शीतशिवम्-सैन्धवम्। मिश्रेया च ॥ कर्कशः—कपिल्लः। कासमर्दश्च ॥ चर्मकषा-शातला। मांसरोहिणी च ॥ नंदिवृक्षः—अश्वत्थभेदः। तुणिश्च ॥ पयः-क्षीरमुदकं च ॥ रुहा-दूर्वा। मांसरोहिणी च ॥ सिंही-बृहती। वासा च। कतकम्—विडलवणम्। निर्मलीफलं च ॥ कंटकाढ्यः-कुब्जकः। शाल्मली च ॥ यक्षधूपः-सरलनिर्यासः। रालश्च ॥ द्राविडी—शटी। सूक्ष्मैला च ॥ हट्टविलासिनी-हरिद्रा। नखी च ॥ तिलपर्णम्-रक्तचंदनम्। ग्रन्थिपर्णं च ॥ मधुरः-जीवकः। जीवनीयगणश्च ॥ लोहद्रावणी—गंडदूर्वा। अम्लवेतसश्च ॥ नागिनी—तांबूली। नागपुष्पी च ॥ मृदुरेचनी-त्रिवृत्। मार्कंडिका च ॥ नटः-श्योनाकः। अशोकश्च ॥ वनस्पतिः-वटः नंदिवृक्षश्च ॥ मंदारः-श्वेतार्कः। महानिंबश्च ॥ अंबुजः-कमलम्। इज्जलश्च ॥ कवरी-वर्वरी। हिंगुपत्री च ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

कुमारी—घृतकुमारिका। शतपत्री च ॥ वरतिक्तकः—पाठा। पर्पटश्च। चित्रकः—पाठा। अनलनामा च ॥ यज्ञियः—खादिरः। पलाशश्च ॥ रक्तबीजः—अरिष्टकः। कन्दूरी च ॥ क्षारश्रेष्ठः—पलाशः मोचकश्च ॥ श्वेतपुष्पं—श्वेतार्कः। इन्द्रवारुणी च ॥ तुवरी—सौराष्ट्री। आढकी च ॥ कुंभिका—पूगफला। शारिपर्णी च ॥ राजपुत्रिका—रेणुका। जाती च ॥ रक्तपुष्पः—रक्तोऽर्कः। कंदूरी च ॥ सप्तलका—शातला वासंती च ॥ विषमुष्टिः—महानिंबः। विषतिंदुकश्च ॥ रक्तफला—स्वर्णवल्ली। वचश्च ॥ चन्द्रहासा—गुडूची। लक्ष्मणा च।

अथर्थानि—

क्रमुकः—पूगः। तूदः। पट्टिकालोध्रश्च॥क्षुरकः—कोकिलाक्षः। गोक्षुरः। तिलकपुष्पं च ॥ प्रियकः—प्रियंगुः। कदंबोऽसनश्च ॥ पृथ्वीका—कालाजाजी। बृहदेला। हिंगुपत्री च ॥ भूतीकम्—भूनिंबः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

कत्तृणम् । भूस्तृणं च ॥ सोमवल्कः—कट्फलः । श्वेतखदिरः ॥ घृतपूर्णकरंजश्च ॥ सौगंधिकम्—रह्लारम् । कत्तृणम् । गन्धकं च ॥ भृंगः—भृंगराजः । त्वक् । भ्रमरश्च ॥ अरिष्टः—निंबः । रसोनम् । मद्यं च ॥ मर्कटी—कपिकच्छूः अपामार्गः । करञ्जी च ॥ कृष्णा—पिप्पली । कालाजाजी । नीली च ॥ क्षीरिणी—दुग्धिका । क्षीरकाकोली । श्वेतसारिवा च ॥ मधुपर्णी—गुडूची । गंभारी । नीली च ॥ मंडूकपर्णः—स्योनाकः । मंजिष्ठा । ब्रह्ममंडूकी च । श्रीपर्णी—गंभारी । गणिकारिका ॥ कट्फलश्च ॥ अमृता—गुडूची । हरीतकी । धात्री च ॥ अनन्ता—दुरालभा । नीलदुर्वा । लांगली च ॥ ऋष्यप्रोक्ता—अतिबला । महाशतावरी । कपिकच्छूश्च ॥ कृष्णवृंता—पाटला । गंभारी । माषपर्णी च ॥ जीवंती—गुडूची । शाकभेदः । वृंदा च ॥ लता—सारिवा । प्रियंगुः । ज्योतिष्मती ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

च। समुद्रान्ता—दुरालभा। कार्पासी। स्पृक्का च॥ हैमवती—हरीतकी। श्वेतवचा। पीतदुग्धसेहुण्डश्च॥ अव्यथा—हरीतकी। महाश्रावणी। पद्मचारिणी च॥ षडग्रंथा-गन्धपलाशी। वचा। करंजी च॥ ताम्रपुष्पी—धातकी। पाटला। वरदा च॥ वरदा—अश्वगंधा। सुवर्चला। वाराही च॥ इक्षुगंधा—काशः। कोकिलाक्षः। क्षीरविरादरी च॥ कालस्कन्धः—तमालः। तिंदुकः। कालखदिरश्च॥ महौषधम्—शुंठी। रसोनः। विषं च॥ मधु—क्षौद्रम्। पुष्परसः। मद्यं च॥ कपीतनः—आम्रातकः। शिरीषः। गर्दभांडश्च॥ मदनः—पिंडीतकः। धत्तूरः। सिक्थकं च॥ शतपर्वा—वंशः। दूर्वा। वचा च॥ सहस्रवेधी—अम्लवेतसः। मृगमदः। हिंगु च॥ ताम्रपुष्पी-धातकी। पाटला। श्यामा त्रिवृच्च। सदापुष्पः—श्वेतार्कः। रक्तार्कः। कुन्दश्च॥ सुरभिः—शल्लकी। मुरैलाबालुकं च॥ लक्ष्मीः—ऋद्धिर्वृद्धिः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शमी च ॥ कालानुसार्य्यम्—कालीयकम्। तगरम्। शैलेयं च ॥ चांपेयः—चंपकः। नागकेसरः। पद्मकेसरश्च ॥ नादेयी—गणिकारिका। जलजंबू। जलवेरूपश्च ॥ पाक्यम्—विडम्। सौवर्चलम्। यवक्षारश्च ॥ विशल्या—लांगली गुडूची लघुदन्ती च ॥ इन्द्रद्रुः—ककुभः। देवदारुः। कुटजश्च ॥ काश्मीरम्—कुंकुमम्। पुष्करमूलम्। गम्भारी च ॥ गुन्द्रः—पटेरकः। मुंजः। शरश्च ॥ गुन्द्रा—प्रियंगुः। फलिनी। भद्रमुस्तकश्च ॥ चुक्रम्—शुक्तकम्। अम्लवेतसम्। वृक्षाम्लश्च ॥ पारिभद्रः—निम्बः। पारिजातः। देवदारु च ॥ पीतदारु—हरिद्रा। देवदारु। सरलश्च ॥ वीरः—ककुभः। वीरणम्। काकोली च ॥ वीरतरुः—ककुभः। वीरणम्। शरश्च ॥ मयूरः—अपामार्गः। अजमोदा। तुत्थं च ॥ रक्तसारः—रक्तचंदनम्। पतंगः। खदिरश्च ॥ बदरी—सुवर्चला। अश्वगन्धा। वाराही च ॥ वशिरः—रक्तापामार्गः। [illegible] लली। समुद्रलवणं

CC-0. Unit. Gurukul Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

च ॥ सौवीरम्—अंजनभेदः । बदरम् । संधान-
भेदश्च ॥ वंजुलः—अशोकः । वेतसः । तिनिशश्च ॥
शिला—शिलाजतु । शैलेयं । गैरिकं च ॥ सोमवल्ली—
वाकुची । गुडूची । ब्राह्मी च ॥ अक्षीवः—शोभ
ञ्जनः । समुद्रलवणं च । धामार्गवः—रक्तापामार्गः ।
राजकोशातकी । महाकोशातकी च ॥ दुःस्पर्शः—
यवासः । कण्टकारी । कपिकच्छुश्च ॥ पलाशः—
किंशुकः । गन्धपलाशी । पत्रं च ॥ कालमेषी—
मञ्जिष्ठा । वाकुची । श्यामा त्रिवृच्च ॥ पलङ्कषा—
गुग्गुलुः । क्षुरः । लाक्षा च ॥ मधुरसा—द्राक्षा मूर्वा
गम्भारी च । रसा—रास्ना शल्लकी पाठा च ॥
श्रेयसी—हरीतकी रास्ना गजपिप्पली च ॥ लोहम्—
अयः कांस्यमगुरु च ॥ सहा—मुद्गपर्णी बलाभेदः
शतपत्री च ॥ सुवहा—रास्ना नाकुली सिन्धुवा-
रश्च ॥ कठिल्लकः—कारवेल्लम् रक्तपुनर्नवा कृष्ण-
वर्वरी च ॥ मधूलिका—मूर्वा यष्टी मधूकश्च ॥
वितुन्नकम्—धान्यकम् तुम्बकम् गोनर्दश्च ॥ देवी—

Dr. Urmila Sharma Collection, Jammu

CC0. In Public Domain, Digitizagtion by eGangotri

स्पृक्का मूर्वा कर्कोटी च ॥ वसुकः—शिववल्ली श्वेतार्कः रोमकं च ॥ गण्डीरः—शाकविशेषः मञ्जिष्ठा गण्डदूर्वा च ॥ लाङ्गली—कलिहारी रोलपिप्पली नारिकेलश्च ॥ पिच्छिला—शिंशपा शाल्मलिः भूतवृक्षश्च ॥ महासहा-माषपर्णी अम्लातकः कुब्जकश्च ॥ चन्द्रिका—मेथी चन्द्रशूरः श्वेतकण्टकारी च ॥

चतुरर्थकम् ।

श्वेतपुष्पा—इन्द्रवारुणी सिन्दुवारः श्वेतार्कः सैरेयकश्च ॥ कवरी—पृथ्वीका शतपुष्पा कालाजाजी अजमोदा च ॥ अम्बष्ठा—पाठा चांगेरी मोचिका यूथिका च ॥

बहुर्थं भेषजम्—

अक्षशब्दः स्मृतोऽष्टासु सौवर्चलविभीतके ।
कर्षपद्मालरुद्राक्षशकटेन्द्रियपाशके ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

काकाख्यः काकमाची च काकोली काकणन्तिका।
काकजङ्घा काकनासा काकोदुम्बरिकापि च ॥२॥
सप्तस्वर्थेषु कथितः काकशब्दो विलक्षणैः।
सर्पद्विरदमेषेषु सीसके नागकेसरे ॥ ३ ॥
नागवल्ल्यां नागदन्त्यां नागशब्दश्च युज्यते।
मांसे द्रवे चेक्षुरसे पारदे मधुरादिषु।
बोले रोगे विषे नारे रसो नवसु वर्तते ॥ ४ ॥

इति श्रीसाहित्यशास्त्रीत्युपाधिधारिणा पं० रामतेज-
पाण्डेयेन कृतया टिप्पण्या समलंकृतो
भावप्रकाशनिघण्टुः समाप्तः।

———

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi